No. १२५१

Title खण्डन मुक्तामणिः

Author ×

Extent १६ पी Age ×

Subject न्याय शास्त्रं

[illegible]

१५१४

१६६ पत्राणि

योगिनापि संस्कारं संदेहःस्यादितिभावः। अथमिंद्रियसंबंधविशेषणतासंस्काराघटितादोषविशिष्टासंशयहेतुः संस्कारस्यान्वयव्यतिरेकग्रहा
दित्याशंक्याह वस्तुप्रकाशिनि चेति अभेदमिंद्रियविशेषणतयासंबंधं यदि दोषोभापयति तदा तस्यदोषत्वमेवस्यादित्याशयः। अथयत्रनद
भेदोनास्ति तत्रावस्तुप्रकाशकतयादोषत्वंन हि चक्षुरादावप्यतिव्याप्तिःस्यादित्याह। कापीति स्वरूपेवस्तुप्रकाशकत्वमेवदोषत्वं नच
चक्षुषः स्वरूपेणतथात्वं किंतु दोषविशिष्टस्येत्याशंकते विशिष्टत्वेन तथात्वस्यात्। अस्यविशेषणतासंबंधसन्निकर्षस्यतयाचयत्रार्थो [illegible]
स्तितत्र दोषएवनेतिदोषविशिष्टसन्निकर्षाभावात् कथंसंशयइत्याशयः। अथार्थसत्वं नदोषविरोधीतिसन्निकर्षोदुष्टएवेत्याशयेना
ह सत्यप्रथ इति तथाचदुष्टसन्निकर्षात्ऽसंतमेवाभेदं भासयतीतिसंशयोनानुपपन्नइति। अर्थस्यदोषाविरोधित्वेदोषमाह प्रेदावन्
१२ प्रवृत्त्यादेरिति आदिपदेन रजनार्थिनोरागेप्यनिवृत्त्यापत्तिस्त्राप्यसतोरजतत्वस्यभानादितिभावः निश्चयार्थस्येति निश्चयस्ययोविषयो
भावरूपोघट इत्यादौ घटत्वं तस्यभानात् नघटाभावज्ञानेनखंडनं तथाचद्वयोरप्येकस्मिन्ज्ञाने विषयतयाप्रमाणसिद्धतयाभावाभावात्म
६० कमेववस्तुस्यादिति- एतेन यत्कुत्रकेवाशंक्या हि विकल्पार्थो विकल्पोप्येकवस्तुनोविरोधरूपोऽभिमतः समारोपितरूपयोरितितदपा
स्तं प्रतीतयोर्विरोधासंभवात्। अपि किंस्यादिति घटोयमितिनिश्चयाद्विलक्षणमिदमेवनतुसंशयत्वमितिभावः एतेनाभावांशेभ्रम

116 र्द इत्यपि न युक्तं बाधाभावात् विशेषदर्शनदशायामस्ति बाध इति चेन्न तस्येदन्तोभिन्नत्वात् यद्वा घटत्वं भासत एव तच्च यद्यास्ति तदा तन्निश्चय एव सः
परं तु भावोप्यधिकस्तत्र भासते तथा चोभयनिश्चयरूपमेवं न तु संशयात्मकप्रमितिभावः कुत्रकोटाव निश्चयत्वं घटत्वाभावांशे संशयः
स्यादित्यपि नास्ति तस्यापि घटत्वाभावमात्रविषयत्वेन निश्चयात्मकत्वात् एककोटिकस्य संशयस्याभावः तथा च विरुद्धानेककोटिकं ज्ञानं संश
य इत्युपास्तं न च तदभावाप्रकारकं तत्प्रकारकज्ञानं संशयः स चाभावकोटिप्रकारत्वेन संभवतीति वाच्यं विरुद्धसमुच्चयात्मकनिश्चयाव्या
प्तेः विरुद्धत्वे भासमानानाथाकोटिस्तदप्रकारकत्वमिति चेन्न पीनशंख इति निश्चयाव्याप्तेः विरोधज्ञानाजन्यत्वमपि विवक्षितमिति चेन्न
बोधज्ञानजन्यतावच्छेदकस्याप्रसिद्ध्यात्तदभावस्य ज्ञातुमशक्यत्वात् अत्र संकेते जातिरिति अर्थनिर्देशोऽर्थस्य वाचकः शब्दस्तेन सम
न्वयः सामानाधिकरण्यं न स्यात् वा शब्दस्य प्रतीतिर्व्यवहारश्च तस्य प्रयोग इत्यर्थः अयमासयः संशय द्वौ रूपौ विषयः स्थाणुत्वपुरुषत्वे च त
न्निर्देशः स्थाणुशब्दश्च पुरुषशब्दश्च तेन समर्पित एव वा शब्दः प्रतीयते पुरस्क्रियते वेन न स्थाणुत्वपुरुषत्वयोरव्यवहितत्वमेव वा शब्दार्थस्तथा च वि
षयकृतमेव वैलक्षण्यं विरोधज्ञानजन्यतावच्छेदकं न संशयत्वं जातिर्मानाभावात् चाक्षुषत्वादिना सांकर्यापत्तेर्धर्म्यंशेपि संशयत्वापत्तेः।
अत एव संशयत्वं मानसत्वव्याप्या जातिरप्यपास्ता अप्यूह्येश्चत्वमप्यपास्तमपि सिद्धान्तानां तात् अथ संशयसूत्रे च वर्द्धमानोपाध्यायेन तथास्वीकृतेनापत्ति वे

ङ्गतः नवाविषयवैलक्षण्यं किंचदस्तिनदभावातिरिक्तं न ज्ञाना दृश निश्चयविषयत्वेनाप्युपपत्तेः नच संदेह इत्यनुव्यवसायविरोधस्तावता
पि विषयवैलक्षण्यानिर्वचनात् ... नाधावां विरुद्धसमुच्चये विषयस्तावताऽधिकस्याप्रकाशात् वाकारार्थोऽधिकोऽव्यवस्थित
त्वं कोट्योर्विषय इति चेत् किमव्यवस्थितत्वं विशेषप्रकारेणावस्थितिर्वस्तुनोऽव्यवस्था यथा कस्यचित् स्थाणुत्वेन कस्यचित् पुरुष
त्वेन नद्विरहोऽव्यवस्थेति चेत् किमियं संशयविषयः उभितिचेन्न मानाभावात् विरुद्धत्वेन निर्णीतयोः कोट्योः प्रकारता मात्रं
नत्वंत ज्ञशंत्वेपीतद्द्वयोरपीतिनततो विशेषः अत्र विरोधोपि भाषत इति चेन्न चापितज्ज्ञानसंभवात् किंच स्थाणुपुरुषत्वयोरेकधर्मि
गतत्वेन प्रतीतयोर्विशेष एवमिथ्या नर्हि सर्वत्रैव पुरुषे स्थाणुत्वभानं स्यादिति चेन्न कुचिदेव प्रतीतेः कुचिदेव समाविष्टं इति अन्यथा श्रा
वाकारो निर्विकल्पार्थः विकल्पश्च पाक्षिकत्वात्मकं न तन्न ... स्य विषयसंबंधे कदाचित् स्थाणुः कदाचित् पुरुष इत्यर्थः स्यात् नचैवं सं
भवतीति वाकारप्रतीतिगतमेव पाक्षिकत्वमुपस्थापयति तदाह वाका ... रार्थस्यापि प्रतीतेः स्वप्रकाशतया प्रत्येमीति वन्नस्याः
पाक्षिकत्वे कदाचित् प्रत्येमि कदाचिन्न प्रत्येमीत्येवं संशयाकारस्यात् नत्विदं स्थाणुर्वा पश्यामि पुरुषं वेत्याकारस्यात् विद्या
सागरस्तु यथा गुणत्वस्य ज्ञानगतस्य ज्ञाने गुण इत्येवं प्रतीतिरेवं संशयत्वस्यापि ज्ञानगतस्य वाकारेण समन्वये प्रत्येमि न वेति

117

कोर

प्रतीत्याकारः स्यादित्यर्थः इति व्याचष्टे ननु न संशयत्वस्य वार्थत्वे संशयपदसमानार्थत्वस्यैवोचितत्वेन स्थाणुं पुरुषं संदिह इति
वत् स्थाणुं पुरुषं वा पश्यामीत्याकारस्यैवापत्तेः। ननु संशयत्वस्य ज्ञानधर्मता सर्वसम्मता कथं सप्रदूयत आह वार्थस्येति स इत्यत
संशयत्वं ज्ञानधर्मो ननु वाकारार्थः निश्चयवदिति यथा निश्चयत्वं ज्ञानधर्मो नार्थनिष्ठमिति तथा वाकारार्थोऽपि यदि संशयत्वेन
दाविषये नान्वितं स्यात् अन्वयश्चेह साक्षादेव विवक्षित इत्याह स्थाणुमानयेति इममानय स्थाणुं पुरुषं वेत्याकारेण
तु निश्चितः साक्षात्कृत इति वत् परंपरया संदिग्धोऽहं त्वा [illegible] सयः साक्षात्कारित्ववदिति साक्षात्कारिज्ञानमित्येवा
न्वयो ननु विषयो यथा तथा वाक्यार्थस्य संशयत्वे पुरुषः संशय इति वत् स्थाणुर्वा पुरुषो वेत्यन्वयो न स्यादित्यर्थः अनुभू
तिस्वरूपे तु वस्तुत्वद्भाषितत्वेऽपि संशयत्वजातिर्दोषेण व्यज्यत इति न स्य दोषत्वं भविष्यतीत्याशंकते जातिरिति विक
ल्पितरूपत्वं संशयत्वेन तस्य ज्ञानगतजातित्वेऽर्थे विकल्पितव्यवहारो न स्यादतः संशयत्वं न जातिरिति ज्ञानगतेनैव विक
ल्पितरूपेणार्थेऽपि विकल्पितव्यवहारो भविष्यतीति न वाक्यमित्याह वाकारार्थस्येति अन्यगतेन विकल्पितरूपत्वे ना
र्थे विकल्पितरूपत्वे नार्थे विकल्पितरूपत्वेऽतिप्रसंगात् यथा निश्चितेऽर्थे प्रामाणिकव्यवहारो निश्चयत्वं च न भवति तथा।

तथा संशयितेपि तस्यानुवृत्त्युपपत्तेश्चातः संशयत्वजातिव्यंजकत्वेन वस्तुत्वावभासिनोपि दोषत्वमित्ययुक्तमित्यर्थ इति प्रघट्टकार्थो व्याख्या-
तः। ननु संशयत्वं ज्ञानगतजात्यंवाकारगतधर्मस्तु न द्वितीयपक्ष एवाचेतनत्वेन तथैव प्रतीतेः प्रतीतिर्हि नियामकेति नातिप्रसंग इति चेन्न विषयग-
तवाकारगतधर्मोल्लेखिज्ञानत्वमेव संशयत्वं न जातिस्तत्र प्रमाणाभावात् इत्याशयात् प्रत्यासत्त्यपुरस्कारात् दोषात् प्रतिबंधात् संस्का-
रस्य सतोप्यपुरस्कारादहेतुत्वादिति यावत्। अभेदज्ञानं प्रत्यक्षं नोत्पद्यते किंतु दोषादिवतन्नप्रकोशर इत्याशयः दोषस-
त्यपीति दोषो यद्यपि हेतुस्तथापि तस्य विशेषादर्शनत्वेनोद्बोधकस्य संस्कारप्रत्यासत्तितायां न प्रतिबंधकँमुपपद्यते न हि त्व
तेन संस्कारस्वरूपोत्पत्तिप्रतिबंधकः संभवी तस्य प्रागुत्पन्नत्वात् नवा तच्छक्तिप्रतिबंधकस्तस्यास्तत्वयानभ्युपगमान्नवा तन्नाशकत्वं निवृत्ते दो-
षेऽनंतरं सोऽयमेवेति निश्चयादित्याशयः। दोषस्याव्याप्ये सत्वे संस्कारस्य कारणत्वे किं वीजमित्याशंकां तस्याप्यावश्यकतामाह यदिति
ति अननुभवे कालव्यवधानादिना संस्कारनाशे वा संशयो नोत्पद्यत इति तस्याप्यावश्यकत्वमित्यर्थः। अत्र शंकरमिश्राः अप्रामा-
ण्यावच्छिन्नकार्यताप्रतियोगिककारणतावच्छेदकरूपवत्त्वेन प्रमाप्रतिबंधकत्वेन वापि त्वादिदोषत्वमिति दोषत्वखंडनमयुक्तं तथा
इमं धर्मिणं स्थाणुत्वेन पुरुषत्वेन वा न निश्चिनोमि किंतु संदिहानोऽस्मीति निश्चयविरुद्धस्य सर्वलोकसिद्धस्य संशयस्यानिश्चयत्वमापा

६ द्योपमा पितुमशक्यत्वे कारणस्य च समानासाधारणधर्मदर्शनविप्रतिपत्तिरूपस्य प्रतित्वं निश्चयकारणविलक्षणस्यानुभवात्
संशये च विधिकोटिनिषेधकोट्योः प्राधान्यमनुभूयमानमशक्यापलापं वाकारार्थश्च विरोध एव स्थाणुर्वा पुरुषो वेति शब्दश्रवणा
७ नंतरं स्थाणुपुरुषविशेषज्ञाने विरोधप्रतिसंधायिनश्चैवं शब्दप्रयोग इति प्रतिसंधानादिति साधु तत्र अप्रमात्वस्यानुगतस्याभावात्
दप्रमात्वं तथा वाच्यं तथा च तद्घटितदोषत्वाननुगमः कारणतावच्छेदकं च यदि पित्तत्वेन दाकाच कामलादावव्याप्तिं पित्तस्य च
दोषता या पित्तप्रमाया भ्रमस्तापत्तिः स्वप्रमायां पित्तेन दोष इति चेन्न तु किं पित्तं किं वा अप्रमाजनने तावच्छेदकरूपवत्ता द्वितीयाद्या
नः द्वितीये तु किं तदिति वक्तुमशक्यं यच्च प्रमाप्रतिबंधकत्वेन तन्निरुक्तिः सापि न युक्ता दोषस्य प्रमाकारणीभूताभावप्रति
योगित्वे गुणस्य प्रमाकारणत्वाभावप्रसंगात् गदुपसिद्धांतपाताच्च ।संदेहानोत्पत्तिस्य च विरुद्धकोटिद्वयनिश्चयत्वमेव विषयः
कारणमपि नादृशा निश्चय एव विधिकोटिनिषेधकोट्योः प्राधान्यं च निश्चयविशेषेऽस्मिन्नानुपपन्नं लोकप्रसिद्धिश्च भ्रममूलेति न
किंचिदेतन्न । संस्कारद्वारा विशेषणतायाः प्रत्यासत्तित्वमभ्युपेत्य संशयानुपपत्तिरूपपत्तिरुक्ता संप्रति तस्याः प्रत्यासत्तित्वमेव खंडयति
वस्तुतस्त्विति तन्नावच्छिन्नाभेदोनुभूयेत यथा मनोग्राह्यस्य संबंधस्य ज्ञानादेर्विशेषणमज्ञानभिन्नत्वम्मनसानुभूयते संस्कारस्त्वती

नविन्नं

भेरः किं मनसाऽनुभूयते चक्षुरादिना वा उभयथाप्यनुपपत्तिः यदि हि मनसा चक्षुरादिना वा संस्कारो गृह्येत तदा तस्य संबंधस्य विशेषणीभूतत्वज्ञानावच्छिन्नत्वा ।

न्द्रियत्वादग्राह्यः चक्षुरादिना तद्ग्रहणे अधिकमाह त्वाग्राहित्वेति यथा चक्षुर्ग्राह्यस्य संबंधस्य रूपादेर्विशेषणमद्रव्यत्वं
चक्षुर्षा गृह्यते तथा यद्यात्मा चक्षुषा गृह्येत तदात्मसमवेतस्यापि ग्राह्यत्वं कथं चिदाशंक्येत गुणगुणिनोः शक्तिर्भिन्नोर्वा अभेदमाश्रि शक्ति
त्य आत्मनश्चक्षुराद्यग्राह्यत्वेतु नेयं शंकाकथमप्यवतरतीत्याशयः इतिविद्यासागरः। वस्तुतस्तु संस्कारविशेषणतां किं म
३ नस एव प्रत्यासत्तिः श्रोत्रादिकं तु तत्प्रत्यासन्नमेव जनकं जनकेंद्रियसन्निकर्षो हि तु ज्ञानजनकेंद्रियसन्निकर्षो हेतुरित्याशयेनाह
मनसा संस्कारग्राहित्वेति यदि चाक्षुषी प्रत्यभिज्ञा चक्षुः प्रत्यासत्तिमपेक्षते तदा चक्षुः संयुक्तात्मसमवेतसंस्कारविशेषणता प्रत्यासत्ति
रित्युच्यते तदाह चक्षुषा चेति तथा च तस्यात्माग्राहकत्वे तत्समवेतसंस्कारग्राहकत्वं दूरपरास्तं ततश्चक्षुः संयुक्तात्मसमवेतसंस्कारस्य
विशेषणतया तद्ग्रहणसंकापि नेत्याशयः संबंधस्य ज्ञानमपेक्ष्यमात्रे हेतुमाह नियमेनेत्यादि स्वेनेंद्रियेन ग्राह्यश्चासौ संबंधश्च स्वग्राह्य
संबंधस्तस्य विशेषणं तस्य भावस्तत्ता तस्या एव प्रत्यासत्तित्वात् यदिंद्रियं ग्राहकं तद्ग्राह्यं यत् संबंधं तद्विशेषणतायां व्यभिचारमुत्सा ८
शंक्याह तदिंद्रियेति शब्दाभावादिग्राहकश्रोत्रादितद्व्यते तेन श्रोत्रादिना न ग्राह्य आकाशादिराश्रयो यस्य शब्दादेः स तदिंद्रि
याग्राह्याश्रयकः शब्दादिः स प्रतियोगी यस्य शब्दाभावादेस्तदितरस्य ग्रहणेऽयं नियम इत्यर्थः इत्यप्युक्तं शब्दाभावस्याप्रसक्तत्वात् प्रत्य

तैकतस्य प्रत्यासत्तिर्यथा चक्षुषो भूतलस्य तादृशो विशेषणीभूतेन घटाभावेनानुकूलं तर्कमन्यथेत्यादिनावदतिन्तु शब्दाभावे श्रोत्राग्राह्याकाशविशेषणत्व

त्वत्वपक्षेपि संबंधविशेषणतायामवाय्यं नियमो न तु विशेषणतामिति मूल एव व्यक्तं तस्मात् घटसाभाववये ग्राहिकायां संबंधविशे
षणतायां व्यभिचारवारणायैवइदमित्यत्र स्वग्राह्यत्वविशेषणप्रवेशे गौरवमाशंक्य निराकरोति नियमेनेत्यथा चान्वयव्यतिरेकप्रमा
णसिद्धत्वान्न गौरवं दोषायेत्याशयः इति यद्वा रूपाश्रयस्य कुचित्चक्षुर्ग्राह्यत्वात् परमाणुनिष्ठश्यामत्वाभावोपींद्रियग्राह्याश्रय
२ प्रतियोगिकत्व इति तद्धेहपि स्वग्राह्यसंबंधविशेषणतायाः प्रत्यासत्तित्वं प्रसज्येतेति नियमेनेति विद्यासागरस्तु न्यायमते त्वेने
नैव गौरवस्य निरस्यान्नियमेनेत्यस्यपौनरुक्त्यापत्तेः यद्वृत्त्याद्यपुक्तं यत्र प्रत्यक्षत्वं तत्र स्वग्राह्यसंबंधविशेषणताप्रत्यासत्तिर्न तु
तदिंद्रियाग्राह्याश्रयकप्रतियोगिकेतरत्वं यत्र तत्र स्वग्राह्येंद्रियविशेषणताप्रत्यासत्तिकत्वमिति तस्माद्यत्र संबंधविशेषणतायाः
प्रत्यासत्तित्वं तत्र स्वग्राह्यसंबंधप्रतियोगिकत्वमिति व्याप्तेः परिच्छेदेन घटाभावस्य संबंधविशेषणतायां संभवात् तस्य तदिंद्रि
याग्राह्याश्रयप्रतियोगिकत्वात् गृह्यते हि घटस्याश्रये भूतलमगृहीत्वापि कदाचिद्घट इति तदिंद्रियाग्राह्याश्रयप्रतियो
गिकेतरग्रहणत्वं तत्राप्रसिद्धं स्यादिति नियमेनेति तेन नियमतो यस्याश्रयो न तदिंद्रियेण गृह्यत इति तथा च यस्याभा
वस्य प्रतियोगिनश्चाश्रयस्तदिंद्रियग्रहणस्वरूपायोग्य इति पर्यवसिते भवति घटाभावोपि तदितर इति न तु प्रत्यक्षस्य

व्याप्तिग्रहः अन्तएव नियमो नेत्यं तत्ताफक्किकानां दृशप्रत्यासत्त्या ग्रहणानुपपत्तिनियमादित्यर्थ इति मिश्रास्यापव्याख्यानं व्याप्ति
त ग्रहस्य तलाभावापत्तेः न चैवं दिंद्रियाग्राह्यत्वस्यैव तदिंद्रियस्वरूपायोग्यत्वपूर्थी वाच्यस्तथापि ग्रहणानुपपत्तेरित्येतावतैवोपपत्तौ
नियमेनेत्यस्य व्यर्थतापत्तेरिति स्वग्राह्यसंबंधविशेषणतायाः प्रत्यासत्तेति स्वग्राह्यस्य भूतलादेर्व्यवधानदशायामपि
घटाभावप्रत्यक्षतास्यादिति संबंधेत्याह तावन्मात्रेत्यस्वरूपायोग्यसंबंधमादायाति प्रसंगद्ति स्वग्राह्यपदं अयं तदिंद्रि
याग्राह्यावाश्रयप्रतियोगिनो यस्य तदितरेति व्याख्यायशब्दाविशाणं पिशाचो न भवतीत्यथमभाव प्रत्यये व्यभिचार =
वारणायोपात्तमिति स्वरूपस्य भ्रमः ग्रहणपदस्य प्रत्यक्षपरत्वेन तत्र तादृशप्रत्यक्षाभावान्नूवायोरूपाभावप्रत्यक्षे अग्राह्यसंबंधविशे
षणतायाव्यभिचारस्यादिति तदिंद्रियाग्राह्याश्रयकेतरेति विशेषणं ततथापि गंधप्रागभावप्रसंगो तादृशप्रत्यासत्त्यैव्यभिचारस्त
स्यापि ग्राह्यो घ्राणाग्राह्याश्रयकां धेनरप्रत्यक्षत्वादिति तस्य च तदिंद्रियाग्राह्यावाश्रयप्रतियोगिकत्वायस्यतद्भिन्नत्वमर्थः
गंधप्रागभावस्तु यद्यपि घ्राणाग्राह्याश्रयकं तथापि घ्राणग्राह्यप्रतियोगिकइति न तदितरद्भिन्न तद्ग्रहे स्वग्राह्यसंबंधवि
त्या शेषणताप्रसक्तिरेव नेति कथं व्यभिचारः एवं रूपाभावोपि न चक्षुग्राह्यप्रतियोगिक इति न तद्ग्रहे स्वग्राह्यसंबंधविशेषण

ताद्धेतुरितिनतद्व्यभिचारोदोषाययेनुयस्याभावस्यप्रतियोगीतदिंद्रियाग्राह्याश्रयकस्तदितरप्रत्यक्षेग्राह्यसंबंधविशेषणता
हेतुरितिव्याचक्षाणेनैपतेषांव्यभिचारोदुरुद्धरः यत्प्रतियोगिग्राहकेंद्रियाग्राह्योऽधिकरणेयः प्रतियोगीसमारोप्यनिषिध्य
तेसएवतदिंद्रियाग्राह्याश्रयकप्रतियोगीतादृशः प्रतियोगीयस्याभावस्येतिरूपाभावेपिनतदितरत्वंशंकरमिश्राणामा
रोप्यसंबंधेनरूपाभावाधिकरणमपिरूपाश्रयद्रव्यत्वाशयेनव्याचक्षुनेनदारोपस्यहेतुतायादुष्टत्वादतिदुष्टः आरोपे
विशेष्ययोग्यतायाःसंत्रत्वात् नचवायुर्योग्यः नचाभावप्रत्यक्षतः प्रागाहार्यारोपःसंभवत्यपि २ नचारोपादाश्रयोभ
वतिसर्वस्यसर्वाश्रयतापत्तेः आश्रयपदेनदर्शणापत्तेः यस्याभावस्याश्रयइंद्रियग्राह्यस्तादितरग्रहणइत्येवमुपपन्नेप्र
तियोगिपर्यवसितापन्नश्चेति। अन्यथेति ननुयोग्यानुपलब्धेरिंद्रियसहकारिण्याविरहादेवतत्रकार्यानुत्पादोऽस्तु
ननुप्रत्यासत्तिविरहादितिचेन्नानुपलब्धेः कारणत्वेमानाभावात् प्रतियोगिमतिप्रतियोग्युपलंभरूपाभावदशायां
मभावभ्रमोत्पन्नोसोपिहेतुरितिचेदस्तुतदभावाद्भ्रमाभावः प्रमानुतयाविनापिस्यादित्याशयेनाहजलपरमा
ण्वादौपृथिवीत्वाभावादेवेतियदिवानुपलब्धिरपेक्षितातदासाप्यस्त्येवेत्याशयेनजलपरमाणाविति नचानुपल



द्रव्ये योग्यतापि विशेषणं सा च प्रतियोगिसत्त्वविरोधित्वरूपा नेह संभवति सत्त्वेपि पृथिवीत्वे जलत्वत्वेव उपलंभकाभावेन
उपलंभाभाससंभवादिति वाच्यं अधिकरणे प्रतियोगिसत्त्वस्यापत्यंताभावग्रहस्थलेऽसत्त्वापादितेन प्रतियोगिसत्त्वेन
यस्यानुपलंभैरभावआपादयितुं शक्यते तदुत्पादनयोग्यताया निरूपयितुमशक्यत्वात् । किं च जलपरमाणुनिष्ठतया
पृथिवीत्वाभावस्य प्रत्यक्षयोग्यतायां कदाचिदुत्पादापत्तिः सन्निकर्षस्य तद्धेतोः सत्त्वात् न चानवस्थान स्वरूपयोग्यता पृथि
वीत्वाभावस्य स्थूले जले प्रत्यक्षत्वात् न च तदेवाधिकरणविशेषयोग्यं भवति स्वरूपस्यानपायात् तस्माद्भूतलसंबंधस्या
पि घटाभावस्य घटस्मृतिमतो भूतलज्ञानकाले प्रत्यक्षोदयो नान्यदेति निर्णीयाज्जलपरमाणोः प्रत्यक्षत्वादेव तत्तद्ग्र
हणमिति निरुच्यते किं न स्यात् सन्निकर्षसंपादकत्वं स्यात्तंत्रेणवा कारणत्वमिति चिंतायामाद्यमेव रूपयोनन च लाघवेन संबंध
विशेषणताज्ञानेन प्रत्यासत्तित्वे सति अधिकरणप्रसक्तस्य कारणत्वकल्पनं फलमुखमिति वाच्यं संबंधविशेषणतामात्र
स्य प्रत्यासत्तित्वे मनसा सदैवानुभूतस्य संस्कारविशेषणतया प्रत्यक्षापत्तिरतः अतः संस्कारस्य ज्ञानस्य विशेषणता
याः प्रत्यासत्तित्वनिरासाय ज्ञातस्यैव प्रत्यासत्तिघटकत्वं अधिकरणप्रत्यक्षस्यावच्छेदकत्वमेवोचितमिति दिक् ।
त

अथ परमाणोरिंद्रियग्राह्यतावदिंद्रियसंबंधताविनास्तीति कथं न तद्विशेषणतया पृथिवीत्वाभावग्रहः प्रसज्येतेत्याशंकामपनुद
ति नहीति परमाणुनः सर्वत्र संचारित्वादिंद्रियसंचारदेशेपि संभवादिंद्रियसंयुक्तत्वासंभवति ननु ग्राह्यतावदिंद्रियायो
ग्यत्वेनाभाववदिंद्रियसंबंधतायाः अप्यभावे किंचित्कारणमस्ति किं चेंद्रियसंचारदेशे परमाणोरभावेन तत्कार्यस्य स्थूलस्या
भावप्रसंगात् परमाणूनाम विरलतयाऽवस्थानमित्युक्तमिति इंद्रियसंबंधता दुर्वारा। ननु शब्दाभावो न प्रत्यक्ष इति मते स्वग्राह्यसं
बंधविशेषणतास्तु प्रत्यासत्तिः तन्न प्रत्यक्षमते तत्र हि एवं स्वग्राह्यसंबंधविशेषणतायाः प्रत्यासत्तित्वे व्यभिचार इत्याशंक्याह
श्रोत्रेंद्रियविशेषणतासप्तमभिन्नसंबंधविशेषणतासंबंधस्य ग्राह्यत्वं न व्यभिचरतीति मतं न विशेषणभावस्य ग्राहकत्वे
पि न व्यभिचरति इतो पीति न दिंद्रियाग्राह्ये न वेत्युक्तरीत्यापि न व्यभिचार इत्यग्रे स्पष्टः चक्षुषा सह संनायाश्चक्षुः संयुक्तमनः
संयोगात्मसमवेतसंस्कारविशेषणतामात्मस्तु प्रत्यासत्तिर्मनसस्तु संस्कार एव प्रत्यासत्तिरस्तु पूर्वानुभूतार्थे न सह मनसः सं
स्काराभावात् कथं सप्रत्यासत्तिरित्याशंक्याह आत्मसंयुक्तं मनः प्रतीति मनसा सह संयुक्तसमवायः संस्कारस्यास्तीति साक्षात्
संबंधाभावेपि न क्षतिरिति भावः पूर्वानुभूतेनार्थेन सो यं घट इत्यादौ सोहमित्यादौ वात्मनानेन परगोचरस्त्वात्मसमवेतोपि

संस्कारोनाननुभूतघटादिनामनसःप्रत्यासत्तिरितिनातिप्रसंगः प्रत्यभिज्ञेयाः अर्थश्चात्मा चेतिसमाहारद्वंद्वःपूर्वानुभू
नेत्यनेनकर्मधारयःपूर्वानुभूतार्थस्वरूपेणेतिवा आत्मपदव्याख्यायंयद्वासंस्कारःस्वरूपेणप्रत्यासत्तिरेवननुपुप्रत्या
सत्तिघटकःतदीन्द्रियत्वंसंस्कारस्यातीन्द्रियत्वेचक्षुःसंयोगस्यातीन्द्रियस्यैवप्रत्यासत्तित्वादितिभावः अचाक्षुषतापत्तिरितिसोहमिति
श्या प्रत्यभिज्ञायासंभवेपिसोयंघटइतिप्रत्यभिज्ञानस्यादित्यर्थइतिविद्यासागरः। अचाक्षुषपरमुपलक्षणंस्पार्शनादीनामपि अतएवाग्रेदृगा
दिनेतिसंगच्छते अचाक्षुषत्वेकांक्षानिरासाशंकाहत्वेदेतद्भेदस्त्वितियद्यपिचाक्षुषमानसयोरेकदानोत्पत्तिःसंभवतितथाप्यनु
पेक्षोक्तं अथवाएकंचाक्षुषमेवास्तुमनसागृह्यतामितितुनमानसप्रत्यक्षाभिप्रायिकंतुतद्देशेमनःप्रत्यासत्तिमित्यभिप्रायंकिं
म गृह्यतामितितुसर्वस्मिन्नेवजन्यज्ञानेमनसःकारणत्वात्सुप्रायेणैवप्रमाणानांनरासहकृतात्मनोजन्यत्वमेवमानसत्वेतंत्रमिति
सन्निकृष्टमनोजन्यत्वेपिनक्षतिः अथवाएकमेवज्ञानंतन्नाशेमानसमिदमंशेचचाक्षुषम स्तुकोविरोधइत्याशयः। संस्का
न रेणमनसःप्रत्यासत्तिर्मनोभावात् किंतुयद्यसन्निकृष्ट मपीन्द्रियंगोचरयतितदासर्वमेवगोचरयेदितिवा अतिप्रसक्ति
स्तन्निवारकमात्रंसहकारितामात्रेणापितद्धेजकनोपपन्नेः तथाचचक्षुषैवसंस्कारसहकृतेनतत्तावैशिष्ट्यभन्ति

कृष्टमेव गृह्यत इति मतं निरस्यति एतेनेति एतत्पदार्थं पक्षयति संस्कारसहकृतेन्द्रियस्य प्रसद्दोभिज्ञात्मकनिश्चयकारणस्य सत्वान्निश्चय
एव स्यात् दोषस्य तु खंडितत्वादिति भावः इति भिन्नात्मन्न तथापि विंडुकोटिद्वयावगाहिणो ज्ञानस्यानुमानस्यापलापस्याशक्यत्वेऽप
ननु कारणस्य सत्वेनैकमात्रं कोटिकज्ञानापादनासंभवात् तस्मात् यथादोषात् संशय इति वाच्यं तथा प्रत्यभिज्ञापि दोषादे
वेति भयोच्यते असन्निकृष्टवैशिष्ट्याविषयत्वात् विभ्रमवत् यदि चासन्निकृष्टमपि तद्वैशिष्ट्यं भासते तदा सर्वमेव भासेत
प्रतीत्यनुसारिणी कल्पनेति चेन्न हि संस्कारस्य सहकारिता पिमास्तु प्रतीतिवलादेवाननुभूतं किंचिदेव भासत इत्येवास्तु
। ननु किं प्रत्यभिज्ञा नास्त्येवेत्युच्यते अस्त्येव परं तु भ्रमः कथं न हि स्थैर्यस्य सिद्धिर्न कथंचिद्धर्ममात्रेस्यैव मिथ्यात्वात् आत्माप्य
स्थिर इति चेद्दृष्टं ननु किं क्षणिक इति चेन्न क्षणिकत्वस्यापि धर्मत्वेन मिथ्यात्वात् आत्मनो द्वैतसिद्धिः कथमिति चेत् स
र्वभेदस्य मिथ्यात्वादेवेत्यवेहि विशिष्टज्ञानमात्रस्य मिथ्याविषयत्वान्निर्विकल्पकमेव सत्यं न त्वन्यस्यापि बाधाभावादिति
वेदांतिवरेण्या इत्यलमति पल्लवेनेति । संस्कारस्य प्रत्यासत्तित्वपक्षे दूषणांतरमप्याह तदग्राह्यमिति आत्मसंयोगसहकृतेन मनो विद्य
ते आत्मरूपो योर्थस्तद्गोचरश्च संस्कारोस्ति तत्र च तदुभयस्मात् जायमानायाः स्मृतेरिंद्रियार्थसन्निकर्षजत्वादनुभवत्वं स्यात्

कारित्वं स्यादित्यर्थः । यद्यपि संयुक्तमनसः संस्कारः प्रत्यासत्तिरित्यत्र संयोगस्य न सहकारिता किंतु संस्कारस्य मनसा संबंधः मनःसंयु
क्तात्मसमवायस्तेन संस्कारस्यासंबंधतापरिहारेण स प्रत्यासत्तिर्नोपयुक्तस्तथापि संस्कार आत्मगोचरो विद्यमानः संयुक्त
स्य मनसः प्रत्यासत्तिरिति तदभिमतं यदि मन आत्मसंयुक्तं भवति तदुपपत्तिबलेनोक्ता अयमाशयो जन्यज्ञानमविप्रतिम
नोनिमित्तकारणं तस्यात्मना संयोगो वा समवायीति स्मृतावपि तदुभयमावश्यकमिति संयुक्तमनःप्रत्यासत्तित्वं संस्कारस्यापि सिद्धमिति ननु
तोरत्व संस्कारो यदि मनःप्रत्यासत्तिः स्यात्तदा स्मृतिः संस्कारशब्दे प्रत्यासत्तिजन्यस्यानुप्रत्यक्षत्वं च स्यादित्यत्र बहिरप्रत्यक्षैर्दी प्रत्यासत्तिजन्यत्वमुपाधि
रित्याशयं क्यात्मप्रत्यक्षे ज्ञानसुखादिप्रत्यक्षे च साध्याव्यापकतां दर्शयितुमाह मनसा आत्मसंयोगात्समवायेन प्रत्यक्षीक्रियमाणेषु संबध्यमान
स्यार्थस्याविशेषादिति आत्ममनःसंयोगज आत्मप्रत्यक्षे संयुक्तसमवायजे सुखादिप्रत्यक्षे च साध्याव्याप्तिरित्याशयः आत्मसंयोगेनात्म
नि समवायेन प्रत्यक्षीक्रियमाणेषु ज्ञानमादिर्येषामात्मसुखादीनामित्यर्थः । स्वरूपेन तु आत्मसंयोगस्यापि नि स्वरूपेण समवायोऽस्ति यस्य
मनसस्तदात्मसंयोगात्समवायेनेन मनसा प्रत्यक्षीक्रियमाणा ज्ञानसुखादयो यथात्मसंबंधास्तद्वत्संबध्यमानस्याप्यर्थस्य मनःसंयुक्ता
त्मसंनिकृष्टत्वाविशेषात्प्रत्यक्षत्वं स्यादित्यर्थ इति व्याख्यानं तु चिंत्यं तु आत्मसंयोगादात्मसमवायेनेति पाठस्तत्र च शब्दः पूरणीयः ।

सोयन्नभवतीतिनद्भुत्पर्वमन्योन्याभावविरहस्तत्तावच्छिन्नप्रतियोगिकोभवति अन्योन्यभेदेति ननु अन्योन्यस्मादन्यः एक
तरनिषेधनिषेधस्यान्यतरविधिरूपत्वात् ननुघटंपटान्योन्याभावोघटपटत्वेएव ननुघटपटौकपालेनं ननुचघटान्यो
न्याभावपटान्योन्याभावविरहवत्वेकपालघटयोस्तनुपटयोश्चाभेदापत्तेरितिचेन्नप्रतियोगितावच्छेदकसंबंधावच्छि
न्नघटपटयोस्तत्रासत्वादेवनहितादात्म्यसंबंधावच्छिन्नघटवत् कपालं किंतुसमवायावच्छिन्नं संस्कारेतिप्रत्यभिज्ञा
सद्भुत्संशेनानुभूतिःस्यात् संस्काजत्वात् स्मृतिवत् विपक्षेबाधकमाह स्मृतिरपीति केवलसंस्कारजन्यत्वं स्मृतिप्रयोज
कमतिरिक्तकारणजन्यत्वमतिरिक्तवादिवादिकल्पनेनविनिगमकेत्याशंक्याह स्वयंकल्पितेतिकेवलेतिविशेषणप्रवेशेगौरवं संस्कारजन्य र
त्वमेवातिरिक्तत्वेप्रयोजकमितिकल्पनायामपिसंभवतीत्यर्थः ननश्चयत् कालतेतदाकुप्रत्यभिज्ञानमुभयकारणसंपन्नवादिति
स्मृतिव्यतिरिक्तत्वेनैवव्यवहारोपपन्नेःसाक्षात्कारिसाधारणमनुभवत्वंनेष्टव्यमंगीकारेप्रमात्वाप्रमात्वयोरेकत्त्वावस्थान
प्रसंगइतिदूषणमतिदिषति एतेनेति एतेनबाधकेनस्मृतित्वानुभूतित्वशंकररूपेणप्रमात्वाप्रमात्वयोरेकाश्रयत्वविरोधा

घटवदेवतथातंतवोपिसमवायेनैवपटवंतइत्याशयात् धर्म्यैक्यमितिपूर्वापरकालविशिष्टयोर्धर्मिणोरेकत्वं तदभिन्नोयमित्याकारं
भानमित्यर्थः न्यायाचार्यमतंदूषयति ६

पत्ते नियामकः इदंतात्तत्तावभासप्रयोजि नियद्यपि अयं सदृत्यनुमितावपि तत्ताभासस्तेन संस्कारजन्यत्वे नैव स्मृतित्वं संस्कारस्य सामान्य वा
प्रत्यासत्तितायामप्यभ्युपगमेन तादृशप्रत्यक्षे व्यभिचारात् तत्तापि प्रत्यभिज्ञा संस्काजन्या तत्तास्मृतिजन्या हि सा तथैवन्यायवा
र्त्तिकोक्तेः ■ न च तथाप्यभेदः कथं प्रत्यभिज्ञाविषयः स्मरणानुपनीतत्वादिति वाच्यं अभेदस्य संसर्गविधया भानात्
संसर्गस्य प्रत्यासत्त्यनपेक्षणादिति तथापि संस्कारेंद्रियाभ्यां जायमानस्य ज्ञानस्य त[illegible]दुभयरूपतायां किं बाधकं न च
जातिसांकर्यं तस्य दुष्टत्वात् न च तत्तास्मृतिरेव प्रत्यभिज्ञाहेतुः समसमयत्वात् संसर्गांशे च तज्ज्ञाने प्रत्यासत्तिसापेक्षत्वं दोषजन्यप्रत्यक्षे
रा तस्य हेतुत्वात् अन्यथा तस्य प्रत्यक्षत्वे नैव निकुतः स्यात् तथाहि संस्कारजन्यतया तत्र स्मृतित्वं एवं तथा सन्निकर्षाजन्यतया न प्रत्यक्षत्वं स्या
द् दपीति प्रत्यभिज्ञा अभेदांशे भ्रम एवेति दिक् प्रमालक्षणखंडनप्रस्तावे प्रत्यभिज्ञाखंडनस्योपयोगमाह एतेनेति अनुभूतित्वेनेति
न अनुभूतित्वेन स्मृतीत्यर्थः अत एव वदति स्मृत्यनुभावात्मक एवाभ्युपगंतव्य इमे न चासाविति यद्यपि पूर्वकालविशिष्ट एव
घटस्तत्कालेदंताविशिष्टत्वेन गृहीतस्तथापि भूतत्वेन न ■ गृहीत इत्यर्थः । न च भूततापि तत्तत्वधर्मत्वात् ध्वंसान्तरव गृह्यत एवे
तिवाच्यं तदानींवर्तमानत्वग्रहे तद्विरुद्धायास्तस्याग्रहणमित्याशंक्य वचनत्वात् । तस्मादिदानीं पूर्वतावधीसामग्रीसंभेदा

त६३

Common

दिति इदानीं विद्यमानाया पूर्वं तदाधीनस्याः सामग्रीनयासंभेदात् संस्कारस्येत्यर्थः सोयमिति प्रत्यभिज्ञावदिति यथा हि संस्का
रेंद्रियाभ्यां प्रत्यभिज्ञा तथा भूततानुभवसामग्री संस्काराभ्यां स्मृतिरित्यर्थः अयमाशयः भूतता तावत् प्रतीयते सा च प्रतीतिर्न चक्षुरादिना विप्रकृ
ष्टविषयत्वात् नापि मानसी वहिरर्थविषयत्वाद् अनुमितित्वादितत्वं शंसमेवेति संस्कारः सहप्रमाणीतो भिन्नं पूर्वताभानायप्रमाणांतरं
कार्यबलादास्थेयमिति । अत्र वदंति पूर्वानुभवकालीनावर्त्तमानतैव तत्रापूर्वकालवैशिष्ट्यं वा पूर्वदेशसंबंधो वा तत्तत्कालीनयत्
किंचिद्धर्मसंबंधो वा सर्वथा पूर्वानुभवविषयतायाः सत्वात् पूर्वानुभवएव स्मृतिः पूर्वानुभववैशिष्ट्यं तत्तेति पक्षे पिप्रमाणांतरेण गृहीत
मेव तत्स्मरणे भासत इति नामुनननुभूतविषयता स्मरणस्येति किंच स्मरणस्यानभूतविषयत्वे यथार्थागृहीतग्राहि ज्ञानत्वात्तादृशानुभव
त्वाप्रमात्वापत्तिरिति तदसत् आद्यचतुष्टये स्मरणकारणीभूतानुभवेपि तत्तोल्लेखापत्तिर्विषयस्य वैलक्षण्याभावेपि संस्कारजन्यएव
ज्ञाने तत्तोल्लेख इति नियमे व्याकरणस्य अर्थमिवक्तव्ये सदृत्यनुभवकालेपि तच्छब्दप्रयोगसंभवात् तदिदमोः पर्यायतापत्तिश्च समा
नप्रवृत्तिनिमित्तकत्वात् ततश्च सोयमिति प्रयोगानुपपत्तिः पूर्वकालवैशिष्ट्यादित्रयमिह पूर्वत्वेन स्मृतो भासत इति चेन्न हि अधिक ~~[illegible]~~
परिच्छेदस्मृतेर्दुर्वारानुभवताप्रमितिता चेति स तएव किंच तत्साद्ययुक्तप्रमातत्स्येव भ्रमेष्टत्वात् । पूर्वानुभवविशिष्टत्वेन तत्तेति पक्षे

तेर

नुतस्या अचाक्षुषतापत्तिः तन्नेदं तेऽअखंडोपाधीत्यनुभववद्यारेवभासते तेनानुभवस्मृत्योरितिपदोत्वनुभवाविषयस्यापिभाने कुतः
स्मृतिता· कथं तर्हि स्मृत्यनुभवात्मकद्वन्युक्तेधर्म्मपशेगृह्यानग्राहिलान्नसंस्काजन्यत्वाच्च अन्यथाऽननुभूतेपिघटस्तत्रासीदिति २
धीप्रसंगात् अथ तत्र तनिर्देशवैशिष्टमासीदतीतकालमविषयीकृत्यापि सघटइतिस्मृतिर्जायमानानुभूयते [redacted]नस्याः प्राक्का
लीनो घटइत्येव विषयाइतिचेन्न प्राक्कालीनतापि एतत्कालवर्त्तमानध्वंसप्रतियोगिकालीनतातो नातिरिक्ता प्रागभावे
भानाभावात् वस्तुतस्तु तदाकारानुगतप्रतीत्यातत्राऽखंडैव यन्नु आचार्येरुक्तं स्मृतिकाले स्मर्य्यमानस्य वर्त्तमानतापिभा
सते अतएव ततः प्रवृत्तिरन्यथा एतत्कालेसघटोनवेतिसंदिहानस्य प्रवृत्त्यनुपपत्तिरितन्निरासेयेचतत्रासीदित्याहपुरुक्तेचेतन्न
हि वर्त्तमानेतत्कालसंबंधितासंस्कारविषयीभूतास्मृतौभासितुमर्हति नचतत्राधुनाघटोस्तिनवेतिनसंदेहः कदाचित्संदेहा
भावस्तु कोटिद्वयस्मरणाद्यभावादेव नदेवचन निष्कंपकप्रवृत्तिरितिदिक् । ननु तर्हि यस्यां स्मृतौ तत्तानभासते सा प्रमैव कथं स्यात्तु ।
यथापरजन्यापदार्थस्मृतिः घटोनास्तीत्यभावप्रतीतिहेतुभूता प्रतियोगिस्मृतिश्चेत्याशंक्याह नचतदस्ति स्मरणमिति सा तत्ता ।
यत्तु भावनावचनस्तावत्तोंस्मारयतिलोकवदिति भट्टवार्त्तिकं सत्पूर्वमनधिकाभावात्स्मारकान्नविशिष्यतइति वार्त्तिकविरुद्धं अ

नेनाहं स्मारकेण सह गृहीतग्राहितया पदं स्मारकतुल्यमित्युक्तं अन्यथा विशेषपदं व्यर्थमेव स्यात् तस्मात्पदं पदार्थस्यानुवादकमित्येव
तदर्थः गृहीताविस्मृतशक्तिकपदज्ञानादावश्यकादेव तदुपपत्तौ पदार्थगोचरसंस्कारत्वेन पदार्थज्ञानेन च संस्कारत्वेन पदार्थज्ञान
त्वेन च कारणतायां मानाभावात् अत एव गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनं मानसं नास्तितज्ज्ञानं जायतेऽक्षानपेक्षयेत्यत्रा
पि प्रतियोगिनं पुनर्ज्ञात्वेत्यर्थः मानसमिति मनसो ज्ञानत्वावच्छिन्नं प्रति मनस्त्वेन कारणत्वमिति प्रेत्य अत एवाहुरक्षणपेक्ष
येति मानसप्रसरापरत्वे मनस एवाद्रत्वात तत्रोपपद्यते अयमाशयः अभावज्ञानं प्रतियोग्यंशे यत्प्रकारकं तत्प्रकारकं प्रतियो
गिज्ञानमपेक्षते न तु प्रतिदर्शितस्मृतिमेव व्यभिचारादिति पुनरुत्पद्यमानस्य ज्ञानस्य यदि प्रमाणं तदविरहकाले स्मृतिरूपं नातदाऽवश्यं तद्दे
शकालावच्छिन्नताभासतत्र एवेत्सवस्य मुकुन्दपुत्रस्यानुभूतित्वं दुर्वारं न च भासमानस्यावश्यमभिलापः विवक्षाधीनत्वात् नो नास्तिभूत
ताव्यभिचारः स्मृतेः यदि च तज्ज्ञानभासते तदा मानसप्रत्यक्षमेव तद्विषयाति अपि च घटस्तद्देशतत्कालावच्छिन्न एव प्रतियोगी
भूयमापने अन्यथा जगति घटमात्राभावप्रसंगात् घटमात्रस्य देशविशेषे निषेध इत्यपि न कालान्तरे घटवत्यपि तद्देशे घटनिषेधात्त
द्देशकालावच्छिन्नस्यैव निषेध इति तादृशप्रतियोगिज्ञानमपेक्ष्यमेवेत्यत्यन्तमतिप्रसंगेन प्रभाकरमतं दूषयति यद्यपीतिरजतज्ञान

मनुभवसामग्रीजन्यं अपरोक्षव्यवहारनिदानत्वाद्ध्येयमिति ज्ञानवदित्याशयेनाह कथं पुनस्तु तांश अन्यराजादीति पंचप्रमाणी
ति पंचानां प्रमाणानां समाहारः पंचप्रमाणी प्रत्यक्षानुमानोपमानशब्दार्थापत्तीनां प्रमाणत्वानुव्यवस्थायि यवस्थापितं
अनेनानुमानस्यातिप्रसंगात्मकप्रतिकूलतर्कपरिहृतिरुक्ता इति विद्यासागरः अप्रयोजकत्वमुक्तमिति तु वस्तुगतिः पंचप्रमा
णीसामग्रीजन्यज्ञानत्वस्य साध्यव्याप्तिरेव नास्तीत्याह कुत्रचेति । अनुभवत्वोपन्यासस्येति यद्यपि स्मृतित्वं तस्योपन्यस्तमिति तन्साध्यवैकल्पि
कल्पं तथापि यदि स्मृतिरेवेति साध्यसाध्यवैकल्पं तदनंतर्भावेनुगृहीतग्राहित्वेन रजतज्ञानस्य स्मृतित्वं स्मृतिमात्रस्यैवानुभवसामग्रीजन्य
त्वेनानुभवत्वमप्युक्तमित्याशयः । तद्धं गोपावेति अयमपि पक्षः प्राभाकराणामतभेदेनेति विद्यासागरः अनाख्योक्तिर्वा । अतिप्रसंगादि
ति । असन्निकृष्टस्य भासनेन सर्वदा सर्वमेव भासयेदित्यर्थः । संस्कारस्यापि केवलस्येति असन्निकृष्टस्यावार्थ्यनेन हीति संस्कारानपेक्षाया
मित्यर्थः तदापि रजतसंस्कारादेव स्मृतिः किंवा सदृशदर्शनजसंस्कारादपि आद्ये सादृश्यविशिष्टतयारजतानतुभवेपि स्मृतित्वस्यादित्यभि
प्रेत्य परहरतिनत्वनेनेति तस्य शुक्तिकनादेर्धर्मः सादृश्यं भूयोऽवयवसादृश्यं ततस्यस्य रजतस्य तद्धर्मकस्य भावस्तत्रानयानधिगतं तद्वतद्
मेव स्वतथात्कं तस्मिन्नधिगतिशृत्यादिसादृश्यं विषयस्वरूपे रजतादावनुभूत इति यावत् तत्रापि रजतानुभवकसंस्काराननु स्मृतिः स्या

त्सस्य ज्ञानजनकत्वे यथातिप्रसंगस्तदाभिन्नसंस्कारस्यापि भिन्नविषयक [redacted] सर्वस्मृतिजनकत्वे सर्वस्मृतिजनकत्वंस्यादित्यर्थः नैनैव
सहकारेणेति स्वकारेण संस्कारापेक्षा ४

दिनिष्ठसंसर्गस्तत्वापितुल्यः ततश्च सादृश्यप्रवृत्तया पूर्वानुभूतेरजतेतद्वृत्तया च शुक्तिशकलेऽनुभूयमाने रजतसंस्कारोद्बोधः स्मृतिरिति त्वया
परिहरणीयं मया तु नत्तद्धर्मवत्तयाऽनुभूतरजतस्यैव तद्धर्मवत्तया पुरोवर्त्तिनि गृह्यमाने तद्धर्मवत्त्वमुपगम्यते न तु रजतसंस्कारस्यापि तज्ज
त नकत्वं मानाभावात् द्वितीये रजतस्मृतेर्नियमतः सादृश्यविषयतापातः। न चेन्द्रियसंस्कारनिरपेक्षस्यैव रजतभ्रमजनकत्वे किं वा रज
तसंस्कारनिरपेक्षस्यैवाद्येन शंकनेन लुप्तेसादिलुप्तस्तनुसाहचर्यदर्शनजः संस्कारो यस्येति विग्रहः। लोपश्च कालव्यवधानरोगा
दिनाबोध्यः। तत्साहचर्यके नरजतादिना एकधर्मिगतत्वं तथा च सादृश्यमेव भंग्या प्रदर्शितं ननु न हि द्वितीयः पक्षः एवास्तु न च रज
तज्ञानस्य स्मृतित्वापत्तिः सादृश्यदर्शनजसंस्कारस्य रजतगोचरत्वेऽपि रजतसंस्कारत्वेनाकारणत्वात् स्मृतित्वे समानविषयक
संस्कारत्वावच्छिन्नकारणतानिरूपितकार्यत्वस्यैव तन्त्रत्वं मन्यथा घटपटोभयसंस्कारवतो घटमात्रस्मरणस्यापि पटस्मृतित्वापत्तिरिति चेत्
सत्यमेवं न कोऽपि दोषः तथापि सादृश्यदर्शनजः संस्कारोऽपि न हेतुरिति प्रवृत्तिर्वंद्यापरिहरति तवापि मतद्वत्ति त्वयानु सादृश्यदर्शनज
संस्कारस्यापि हेतुत्वोपगमे प्रागुक्तदोषापत्तिः न च सादृश्यसंस्कारस्योद्बोधकालाभावादेव न स्मारकत्वमिति नोक्तदोष इति वाच्यं।
तथा सति रजतस्मृतेरनुत्पादापत्तेरुभाभ्यां संस्काराभ्यामेव तदुत्पादात् एकस्यापि सहकारिसमवधानाभावे कथं तदुभयजन्यका

र्थस्यात्मलाभइत्यथापरिहर्त्तव्यमित्याशयेनाह नदिति आदिपदेन विपरीतसंस्कारादिपरिग्रहः अनतिप्रसंगादिति अभ्युपग
मेनातिप्रसंगइतिपाठस्तु स्वबोधः ननु सदृक्प्रत्यभिज्ञानमिति केवलसंस्कारस्य स्मृतिहेतुत्वेऽतिप्रसंगोऽत्र नानुभूतरजतेन सदृशमि
दमिति यत्सादृश्यज्ञानं प्रत्यभिज्ञानं द्वितीयज्ञानमनुसंधानात्मकं संस्कारोद्बोधकं त्वयाऽस्वीक्रियते तदेवास्य सहकार्यस्त्वि
मित्यत्र यः तेषां च कालादिव्यवधानाभावसदृशदर्शनाभ्यां सहकृतस्य चक्षुषस्तथाभूतरजतप्रतीतिहेतुत्वमिति प्रघट्टकार्थः
रजतसदृशज्ञानं[illegible]मितिज्ञानमपि रजतस्मरणं विना नेति तस्यावश्यकत्वे नानुभवभ्रमापरनामाकल्प्य इत्याशंकां दूषयति एतदपि
समानमिति प्रज्ञाते रजतसादृश्यानुभवादेव रजतसादृश्यमनुसंधीयते न त्वत्र रजतं गुणीभूय भासत इति स्वतन्त्ररजतस्मरणं ततः परं त्वया
पि कल्प्यं मया तु न तत्सहकृतेन चक्षुषा रजतानुभवः कल्प्यते संस्कारस्य कारणत्वे प्रमाणाभावादिति विशेषः इहापि नेंद्रियस्य सन्नि
कर्षानपेक्षत्वं धर्मींद्रियसन्निकर्षस्य सत्त्वादित्याशयेनाह विशिष्टरूपे भ्रमविषय इति सादृश्यं न शिसंतभास्वरत्वादिना विशिष्टभ्रमस्य
विशेष्य इत्यर्थः विशेष्येंद्रियसन्निकर्ष एवापेक्ष्यो न तु विशेषणसन्निकर्षोऽपि विशिष्टज्ञानसामग्री तत एव तज्ज्ञानोपपत्तेरिति भावः ननु
तथापि रजतप्रत्यक्षे रजतसन्निकर्षो हेतुः कृप्त इति कथं तेन विना तस्यादित्यत आह सहकारिभूतदोषशक्तेर्वेति त्वयापि तन्नाश

मोषायसंस्कारस्य यो दोषः सहकारी स्वीकृतोस्ति तस्य किं ज्ञानप्रतिबंधकता वा कल्प्यतां रजतानुभवजनकत्वं वा तत्रायोगौरवमि ता
त्याशयेनाह दोषशक्तेरिति दोषस्य या शक्तिः सैवेंद्रियस्य प्रत्यासत्तिः प्रत्यक्षासाधारणकारणमिंद्रियधर्म एव सन्निकर्षः ।
स च दुष्टेंद्रियेषु भ्रमजननाद्या भ्रमशक्तिरिंद्रियाणां सैव प्रत्यक्षोपयोगितया प्रत्यासत्तिरुचिता अन्यथा इदं रजतं साक्षात्करोमीति प्र
त्ययानुपपत्तेः दोषस्य प्रमाप्रतिबंधकस्य प्रत्यासत्तित्वं लोकविरुद्धमिति दोषाहिता इंद्रियशक्तिरेव न तथोक्ता ननु संयोगाद्यतिरिक्तस्य सन्नि
ल कर्षत्वं लोकविरुद्धमिति चेदन्यथानुपपत्त्या लोकविरुद्धत्वमप्येकमेव कल्पयितुं युक्तं न तु नो चेव नानास्मृतिः प्रमुष्टतत्ताकत्वेना ए
प्रतिभासमानाप्रतिभासमाना च साक्षात्त्वेनेति न चायं सन्निकर्षो लौकिकः किंतु लौकिक इति लोकविरोधोपि अनुगुण एव एतेन
रजतप्रत्यक्षे रजतसंयोगो हेतुरस्त्वपि परास्तं तन्मते रजतानुमितिरप्यनुमिसंशे प्रत्यक्षात्मिकाया रजतगोचरायास्तदजन्यत्वात् ।
रजतविषयतावच्छेदेन प्रत्यक्षात्मिकायास्तथात्वे वाच्ये ततश्च रजतजन्यप्रत्यक्षत्वमेव तदपेक्षया लघुकार्यतावच्छेदकमित्येवज्या
यः यथेंद्रियस्य विप्रकृष्टज्ञानजनकत्वं न दृष्टमिति तन्नाभ्युपगम्यते तथा संस्कारस्यापि केवलस्य ज्ञानजनकत्वं न दृष्टमिति तदपि त्याज्य
तामिति दोषांतरं समुच्चिनोति किंचेति यत्र प्रमाणं न रसहकृतत्वं संस्कारस्य दृष्टं तत्र सदृशदर्शनसहकारित्वं संस्कारस्येव नन्विंद्रि

यस्येति त्वयाऽइन्द्रियस्य तत्कल्पनं इत्यलौकिककल्पने त्साशंकते प्रत्यभिज्ञान एवेत्यादिना । तत्तोल्लेखे संस्कारजत्वं न प्रयोजकं किंतु
सदृशदर्शनसहकारिताऽस्त्येव भ्रमस्थलेऽप्युपनाभिसाशंकनेन चेति सदृशे दर्शने तिसत्यपि संस्कारे विना सदृशदर्शनं स्मरणानुत्
पत्तेर्भ्रमस्थलेऽपि तस्यावश्यकत्वमित्यर्थः । अत्र विमतं रजतं नेन्द्रियकं विद्यमानत्वे सत्यसंप्रयुक्तत्वादसन्निकृष्टपटवत्
प्रत्यभिज्ञायां तत्तांशे व्यभिचारवारणाय सदर्थं इत्याह रजतं च वात्तिग्वीथ्यां विद्यमानमेवेति न विशेषणासिद्धिः । तद
पिहातुं न युक्तमिति तथा च रजतज्ञानमिदं संस्कारजन्येति न स्मृतिः तथा च विद्यमानत्वविशेषणं न देश्यमेवाप्रयोजकं तथा हि अविद्यमाना
पि तत्ताविशेषणीभूतेति न प्रत्यक्षार्थस्य सन्निकर्षमपेक्षते न तथा विशेष्ये ऽविद्यमानं रजतमपीति निष्कर्षः संस्कारस्यापि चेति न्याय
चार्य्यैः संस्कारः सन्निकर्षः स्वीकृत इति भावः तेन दोषस्य प्रत्यासत्तिता प्रागुक्ता न विरुध्यते न चेन्द्रियप्रत्यासत्तित्वे रजतज्ञाने चक्षु
षः संस्कारस्य च कारणतायां गौरवमिति वाच्यं साक्षात्कारो मीत्यनुव्यवसायबलेनेन्द्रियस्यापि तथ्यत्वात् न चैवं संस्कारजत्वेन
स्मृतित्वापत्तिरिन्द्रियजत्वेन प्रत्यक्षत्वात् केवलसंस्कारजत्वेनैव स्मृतित्वं वाच्यमन्यथा तत्तांशभानमप्यापद्येत न वस्तु तस्तु
ज्ञानद्वयकल्पनागौरवमप्यस्त्येव तत्तांशमोषः किंकारणाभावात् दोषाद्बा नाद्य इत्याह पूर्वमिति वर्त्तमानः काल एव सं

स्कारजे ज्ञाने तत्स्वरूपेन कथ्यत इति चेन्न भट्टाचार्य्यस्य मतमनुस्मृत्येदमाह दोषः किं संस्कारस्य विषयसंबंधं प्रतिबध्नाति
संस्कारस्य सामर्थ्यं वा अथवा दोषाभावः कारणमिति कारणाभावात् कार्याभाव इति आद्ये दोषमाह विषयसंबंधस्येति सं
स्कारस्य विषयेन संबंधः स्वरूपमेवेति न तत्प्रतिबंधो न शक्य इति भावः द्वितीय तृतीयावेकोक्त्यानुवदति दोषानुस्मृतेतथे
तिसदर्थज्ञापकस्य न दोषत्वं च क्षुरादिवत् नापितस्याग्रहणहेतुत्वं अग्रहणस्य प्रागभावरूपस्यानादित्वेनाजन्यत्वात्
नापि ग्रहणनिरोधकत्वं तदुत्पत्तिं विना तद्विनाशासंभवात् नापि प्रतिबंधकत्वं रजतज्ञानाभावापत्तेर्न ज्ञानप्रतिबं
धकत्वमिति चेन्न नहीत्यादिना दूषयिष्यमानत्वादित्येव साहंकारं दोषमाक्षिपति कः पुनरसाविति अयं खंडनिकाङ्क्षी
नः परेषामिति तथा च परैर्वेदांतिभिर्नैयायिकादिभिरेव चतस्य रूपं निर्वाच्यमिति नास्माकं तन्निर्वचनायासः यद्यपि
त्वन्मते भ्रांतेरप्रसिद्ध्या भ्रांत्युत्पादकत्वेन न शक्यनिर्वचनत्वं न च परैः सहास्माकं विवादोपनतस्ते प्रष्टव्यास्तव चेन्नास्मिन्सा
न मर्थ्यं तदा त्वं मूकीभवेतोदध्यगित्वा विजयीभवितुमर्हसीति तथापि निःशंकतया परपरिभवार्हतर्हीति अपहृतरजतस्य वा
रजतरागांधधियषणस्य प्रथमा भ्रांतिः विरक्तस्य त्यक्तरजतस्य द्वितीया प्रतिग्रहभीरोरस्वीनरजस्य तृतीया भ्रांतिः।

तद्रजताविशिष्टमिति मदीयं यत्रष्टं रजतं तद्विलक्षणमिदमित्यर्थः सेवरजत व्यक्तिरिति यारजतव्यक्तिर्मदीयपूर्वम एमयालो
ष्टवन्नैपोजननयात्यक्ताभवंतिहिन्याशिनः समलोष्ट्राश्मकांचना सेवार्थं पुनस्तदेवेदं यन्मयानरकपातभीत्यानगृहीतं तदेवकेन
चिन्मदपकारंचिकीर्षुणा पुनःप्रस्थापितमिदमुपस्थितमित्यर्थः ननुतवशुक्तिरजतं नविषयः किंत्वन्यदेवेत्याशंक्याहस्ता
माँतं रवरजतस्यतदापरामृष्टत्वेनितं नदेंतिनच्छत्वेनेत्यर्थः अयमाशयस्तच्छत्वस्य पारमार्थिकंरजमेववाच्यं भ्रमेचयदिसएवस्मृ
तिविषयस्तदानन्नापितदनैरवेनितन्नामोपदूनिनशक्यतेवक्तुमितिविद्यासागरस्तुशुक्तावेवतद्रजतसदृशमिदंरूप्यमितिभ्रांत्युत्
पन्नौतत्राप्रकाशोनस्यादोषस्यसत्तादितिचेदुच्यतेनैतं संभवतिसंसर्गख्यातावन्यथाख्यात्यापत्तेस्तस्याश्चतेरनंगीकारादित्यस्वरसा
दाहसे— — — —संबंधभेदेनपूर्वानुभूतरजतस्यव्यक्त्यभेदग्राहिप्रत्यभिज्ञाभ्रमइत्यर्थः इत्याहतनदसत्परिघांतदनं
गीकारात् अथशुक्तिविशेषकज्ञानात् भिन्नमेवेदंज्ञानंमभिज्ञा स्यात्... म्म इदमित्यभिप्रायस्तर्हिप्रथमपदेपिनादृश्ये
नास्वरसः उदाहृतवक्तुतंतुव्यभिचारादभिज्ञायामपिनुतन्नांशमनुष्ठीयादित्याशयः किंचप्रत्यभिज्ञापियद्येकं
ज्ञानंतदा अन्यथाख्यातिः यदितुज्ञानद्वयंतदाद्युक्तिदोषस्यकुचितत्तांशमोषाहेतुत्वेव्यभिचारादभिज्ञायामपिनुत

स्वरदार्ध्यायनिषेधं नत्वभिज्ञारूपेभ्रमरवतत्तांशमोक्षादोषान्नप्रत्यभिज्ञायामित्याशंक्याहान्यथेति २

त्तांशं न मुखीयादित्याशयः किंच प्रत्यभिज्ञाविषये एकं ज्ञानं न तदान्यथाख्यातिः यदि ज्ञानद्वयं तदाऽभिज्ञानुत्पत्तेन तथा च तत्ता
विरोधात् तत्तामोषः स्यादेव यदि तु तत्तोल्लेखिज्ञाने दोषा न हेतुरित्युच्यते तस्य तत्तामोषहेतुत्वेनैवासिद्धेरिति चेत् तर्हि दोषाजन्यत
याप्रमात्वापत्तिः अथ तस्य तत्तामोषाप्रतिबंधकदोषविशेषजन्यत्वमित्यभिमतं तत्तद्दोषस्य तत्तामोषकत्वात् क्वाप्यकृप्त
त्वात् दूरं रंजनमित्यत्र कृप्तमिति चेत् तत्संस्काराजन्यत्वेनैव तत्त्वं दूषणमित्तेरिति दिक् । प्रमालक्षणखंडनेन सह तत्तांशमोषखं
डनस्य काकसंगतिः घोटासंगाते दूवनं नेपुप्रसिद्धिरित्याशंक्यास्यापि प्रसंगेऽन्तर्भावमाह अन्यास्तामिति प्रकृते प्रमालक्षणखं
डनेन ततः प्रत्यभिज्ञाखंडने प्रसक्ते तदनुप्रसक्तं तत्तांशमोषखंडनमिति स्वीकृते च एतस्या अपि संगतित्वं भट्टाचार्यैः प्रस
क्तानुप्रसक्तादिप्रकृतादिह जायत इति आधिक्यं तु वर्ननेनैवेति चिंत्यमिति । अन्यः प्रकार इति प्रत्यभिज्ञानद्वयेना
पि स्मृत्यनुभवात्मकमेकं ज्ञानं न च स्मृतिरेवानुभव एव वा [illegible] येन स्मृतित्वानुभूतित्वयोः सांकर्यं स्यात्
किंतु प्रकारांतरमेवेति न कोऽपि दोष इत्यर्थः स्थिरसिद्धावितितथा चापसिद्धांत इत्यर्थः इदमुपलक्षणं प्रकारांतरत्व
पक्षेप्यपसिद्धांत एव अभिन्नेय प्रमाणप्रत्यभिज्ञात्वयुक्तिर्दोषः स्यात् तत्त्वेवं किंत्व भिज्ञा प्रमाया एव लक्षणमिदं न तु प्रत्स

भिज्ञाया इत्याशंक्याह इदंशं प्रसिद्धलक्षणत्यागे इति । योऽहमनुभवं सोऽहं स्मरामीत्यात्मस्थैर्यसाधकप्रत्यभिज्ञाप्रामाण्यमेवं सप्रयोज
नं न वा द्यपरार्थं प्रत्यभिज्ञाप्रामाण्यं तदेव लक्ष्यं न प्रत्यभिज्ञेति वदता त्वया कथ्यार्थो नियमः सत्यकः स्यात् प्रमामात्रलक्षणमभिधाय स्वव्या
प्तिपरिहाराय प्रत्यभिज्ञायालक्षणत्वागवदुष्टं हेतुमभिधाय तत्र दोषोद्भावने प्रतिवादिना कृते पुनरदुष्टलक्षणे त्वं नरोपादानसंभ ८
वादित्यर्थः यद्वा यत्र यत्राव्याप्तिस्तत्रायमेव चेत्तदा पदार्थव्यवस्था न स्यादित्यर्थः । वस्तुतस्तु प्रत्यभिज्ञानमेव लक्षणमिति निय
मः प्रत्यभिज्ञानलक्ष्या अभिज्ञानलक्ष्येत्यर्थः । अननुभवत्वस्य जातितायां लक्षणघटकतानुपपत्तावप्युपाधिनयेव न दुष्ट
कताभ्रित्याशंक्याह नापीति तत्सदृशप्रत्यभिज्ञान (केवलक्षमिति नियमः प्रत्यभिज्ञानलक्ष्या अभिज्ञानलक्ष्ये) मित्यादिना स
र्वासामेव स्मृतीनामनुभवत्वव्यवस्थापनात् ज्ञानमात्रमनुभव इत्यनुभूतिपदव्यवच्छेद्यं नास्तीत्यर्थः यद्वा स्मृत्यन्यत्वे तत्र अन्यपद
व्यवच्छेद्यानुपपत्तिरित्यर्थः । द्वितीतृतीयविकल्पयोः साधारणं दोषमभिधाय द्वितीयेऽसाधारणदोषमभिधातुं यत्तदेवानुवदती
तोऽपि नेत्यादिना । सर्वे निःस्मृतित्वावच्छिन्नप्रतियोगिकान्योन्याभाववत्त्वमित्यर्थः । स्मृतित्वात्यंताभावाधिकरणत्वमिति
तृतीयविकल्पार्थः अन्यपदं तु वैयर्थ्यपरमिति नापरार्थ्ये विकल्पः ना सां सर्वासामिति यद्यपि सर्वस्मृत्यनुपस्थितौ तासां सर्वा

सांप्रत्येतुमशक्यत्वादिति नवाप्यभिधानमनुपपन्नं तथापि लक्षणवाक्यात् लक्षणवाक्यार्थो बोधयितुमशक्यः स्वयमप्रतिपन्न
त्वादित्यत्र तात्पर्यं न च स्मृतित्वावच्छिन्नप्रतियोगिताकोऽन्योन्याभावो वाच्यस्तत्र च यावत्प्रतियोगिनां यावत्त्वेन ज्ञानं न कारणमि
ति वाच्यं यावद्विशेषाभावातिरिक्ते तत्र मानाभावात् किं च यावत्प्रतियोगिताभाववदवृत्तित्वाज्ञाने सामान्यस्य प्रतियोगितावच्छे
दकत्वमेव दुर्ग्रहं न च वस्तुतस्तु दृष्टत्वमेवापेक्षितं दास्तावत्त्वस्य प्रमाणं विनाऽसिद्धेरिति सर्वत्र तदभावादिति स्मृत्यन्यत्वग्रहदशा
यां नावश्यं तादृशः शब्दोऽस्तीत्यर्थः उपमानादीनि उपमानस्य प्रवृत्तिनिमित्तपरिच्छेदैकत्वेन सर्वस्मृत्युपस्थापकत्वायोगात् आदि
पदेनेतिहासपरिग्रह इति मिश्राः अभावो वा ग्राह्यास्तस्य स्मृतिषु भावेषु परिच्छेदकत्वासंभव इति भावः मम चेतसि किं वर्त्तत इति चेतसि
ज्ञाने यद्वा वेदान्तविदां मनोवृत्तिरेव धीरिति तदभिप्रायेण मनएव चेतः पदार्थः ननु जानामि प्रमेयमस्तीति परिच्छेदविशेषजिज्ञासा विशेषसामा
न्यरूपेण विशेषाभिधानादेव निवर्त्तता अयं घटत्वादिरूपेण प्रश्नः स च विशेषप्रकाराभिधानादेव निवर्त्तत इति चेत्तर्हि प्रमेयत्वेन क
स्यास्तस्या घटत्वप्रकारकं ज्ञानं न जातमिति कथं तथा वाच्यं अयं प्रमेयत्वेन ज्ञायमानेन घटत्वेन प्रत्यासत्त्या तदपि जायतामित्युच्यते तत्र
तथाविधज्ञानविषयस्य घटत्वस्य न प्रत्यासत्तित्वं किं तु घटत्वांशनिष्प्रकारकज्ञानविषयस्यैव फलबलकल्पनायास्तत्रैव विश्रामादिति चेद्

त्रशंकाभिप्रायत्र तर्हि घटत्वमिंद्रियसन्निकर्षेनादृशज्ञानप्रकारीभूतं च परस्यापिह्रदि घट एव तत्र घटं जानातीत्युक्तरूपत्रेः परमनोगतस्या
पि घटस्य घटत्वेन ज्ञानमस्त्येव परं तु परमनोगतत्वेन ज्ञाने नास्ति परमनोगतत्वस्य सामान्यस्याप्रत्यासन्नित्वात् यत्तु सामान्यं प्रत्यासत्तिस्तया
तत्प्रकारकं ज्ञानमेव जन्यत इति नियमादिति चेत्त्र प्रमाणं विना तथा नियमस्यासिद्धेर्नहि भासमानत्वेन सपि प्रकारं प्रति कश्चिद्विशेष
इत्साकुत्त्वत्त तथा ज्ञाने सति तदुत्तरणानून चोत्तरयति तस्मात्त्वात्वेन तथा ज्ञानमिति तादृशज्ञानाभाव प्रमाणस्यैव तथा नियमकल्पक
त्वात् न च सामान्यस्य प्रत्यासन्नित्वाभाव एव तेन सिद्ध्यति ननु तत्प्रत्यासत्तितानियामकं किंचिदिति वाच्यं तथा सति नास्त्येव तस्य प्रत्या
सत्तित्वमिति वाच्यं ननु सार्वज्ञापादनमिति चेत्त्र सार्वज्ञापादानस्यानिष्टापादानतया सामान्यस्य प्रत्यासत्तित्वे नास्ति प्रमाणमित्यत्रैव
तात्पर्यात् एतेन यदि सामान्यलक्षणा नास्ति तदा धूमादौ विशेषादर्शनदशायां व्यभिचारसंशयो न स्यात् प्रसिद्ध धूमवह्निसंबंधावगमात् प्रसि यो
द्धस्य चाज्ञानात् सामान्येन तु सकलधूमोपस्थितौ धूमांतरे विशेषादर्शनात् संशयो युज्यत इति व्यभिचारशंकान्यथानुपपत्त्यैव सा
मान्यलक्षणायाः प्रत्यासत्तित्वं कल्प्यमिति गंगेशोपाध्यायस्य स्वशिष्य प्रतारणाप्यपास्ता समानप्रकारक निश्चयस्यैव संशयवि
रोधित्वेनायं धूमो वह्निव्याप्य इति निश्चयस्य तत्रैव धूमत्वावच्छेदेन व्याप्त्यग्रहात् धूमो वह्निव्याप्यो न वेति संशयाविरोधात् किं च विना

पिसामान्यस्य प्रत्यासत्तिर्विधूमप्रत्यक्षे धूमेन्द्रियसन्निकर्षस्य हेतुत्वं ननु यावद्धूमसन्निकर्षस्य तथात्वं गौरवादिति यत्तु किंचिद्धूमसन्निक
र्षादेवासन्निकृष्टधूमस्यापि प्रत्यक्षसंभवे नैव विनापि धर्मीन्द्रियसन्निकर्षं धर्मिज्ञानादेव संसयोपपत्तेः अत एवानागतपाकेपि सिद्धा
नथा वह्निविशिष्टप्रत्यक्षमपीति तदुभयहेतुतयापि न सामान्यलक्षणायाः प्रत्यासत्तिकल्पनमिति । घटरहितं भूतलमित्या
म्या दौ रहितत्वशब्दोऽभावमात्रपर्यायत्वात्तत्र च वादीनां धर्मत्वेन स्वरूपत्वेन च विप्रतिपत्तेर्विकल्पयति । स्मृतित्वप्रतियोगिकमिति
अन्यथा स्मृतावपि स्मृतिभेदः स्यादिति । दृश्ये प्रतियोगिनि धर्मिमात्रमभाव इत्यसन्मतेनोऽनतिरिक्तार्थत्वे प्रतियोगिमत्यति प्रत्यक्ष
प्रसंगः अतिरिक्तार्थत्वे नाभिप्रायं विवादः तत्रादित्याशंक्य प्रभाकरैरेवोक्तं पदार्थान्तरमुपगन्तव्यमिति तज्ज्ञानमिति आश्रयस्य ज्ञान
मिति ज्ञानव्यक्तिः यत्र परेषामभावव्यवहारस्तस्याश्रयस्य ज्ञानमित्यर्थः धर्मिमात्रस्याभावत्वे भावाभावशब्दयोः पर्यायत्व
प्रसंगात्तदभाववत्त्वमिति प्रथमपक्षमाशंक्य निषेधति न तावदिति । तथात्वापत्तेरित्यनुभवत्वापत्तेरित्यर्थः तथा च प्रमात्व
लक्षणं स्मृतावतिव्याप्तमित्याशयः क्वचित्तु स्मृतिरपि प्रमात्वापादितेत्येव पाठः विशेषणवैयर्थ्यं चेति स्मृत्यन्यज्ञानत्वमित्य
त्रैयद्विशेषणं स्मृत्यन्यत्वं तद्व्यर्थमित्यर्थः सत्यपि विशेषणे स्मृतावतिव्याप्तेर्दुर्वारत्वादित्याशयः यद्वा प्रमाणलक्षणे यदनु

भवत्वं ज्ञानस्य विशेषणं न द्व्यर्थमित्यर्थः स्मृतेर्यथार्थायथार्थाभावात् तस्या अपि स्मृतित्वाभाववत्त्वेनानुभवत्वात् ननु विशेषण
ए स्य व्यर्थत्वं ब्रुवतो भवतो विशेष्यस्य सार्थकत्वमभिमतं तच्च न संभवति तस्यापि व्यर्थत्वात् न चेच्छापरभानं दातुमकृतत्वे विषयाव्यावर्त्तको
तस्या निर्विषयत्वात् प्रकाशस्य सत्त्वदायतामात्रनिबंधनः स्वभावविशेषो विषयतेति न्यायाचार्य्यैर्ज्ञानस्यैव सविषयकत्वोक्तेरित्याशंक्या
ह विनाविशेष्यमिति अपिशब्दात् स्मृतावतिव्याप्तिरस्येव परं तत्त्विच्छादावप्यतिव्याप्तिरधिकास्यात् न हि विषयत्वस्य प्रमाणलक्षणत्वे यथार्थज्ञान
मेव विषयतेत्याचार्य्यवचस्तत्र इच्छाया अपि ज्ञानस्वरूपमेव विषयतानतिरिक्तस्वरूपमपीत्यभिप्रायकं आदिशब्दात्तत्तद्विषयकसंस्का
रे च यद्वा भयाविशेषणमुक्ते दैयर्थ्यमुक्तं केश्चित्तु विशेष्य[illegible]पि व्यर्थमित्युच्यते तत्तु न युक्तमित्याह विनाविशेष्यमिति तथा च त्वं ज्ञान त
त्वमित्यवश्यमेव वाच्यं न च तत्त्वस्य ज्ञानमित्यत्रापि विषयार्थो यदि संबंधिमात्रं तदात्मनिष्ठभ्रमे तिव्याप्तिः यदि च तत्त्वविषयत्वेन दापि
गोरोहमिति भ्रमातिव्याप्तिरिति वाच्यं तत्त्वमात्रविषयत्वस्य विवक्षणीयत्वात् धर्म्मिप्रमाया अलक्षणीयत्वात् अन्यथा शुक्ति रज
तस्यापि प्रमेयतापत्तेरिति दिक् । तथा हीति स्मृतित्वस्य यः संसर्गस्तस्याभाव इति वान्वयः किंवा स्मृतित्वस्याभावः संसर्गेण तथा च सं
सर्गेण विशिष्टस्य स्मृतित्वस्याभाव इति फलति अन्यदेवा किंचिदन्या[illegible]वा चोभयत्रेति स्मृतित्वोपलक्षितसंसर्गाभावस्तृतीयविकल्पार्थः
२

वाच्चोभंग्यावाकप्रकारेणअन्यदेवे तस्य संसर्गावच्छिन्नप्रतियोगिकत्वस्यात्यन्ताभावे विवक्षितमित्यर्थः ननु स्मृतित्वसंसर्गस्यान्योन्याभाव
मादायेति प्रसंगो नास्ति यतः स्मृतित्वसंसर्गस्य संसर्गाभाव एव लक्षणघटको न च स्मृतित्वसंसर्गस्य संसर्गाभावः स्मृतिषु स्मृतित्वसमवायस्य
तत्र सत्वादित्यत आह एवमिति अपरापरसंसर्गप्रवेशे चरमसंसर्गान्योन्याभावमादाय स्मृतितावतिप्रसंगतादवस्थ्यं तत्र तत्रापि संसर्गविशेषण
प्रवेशे ऽविश्रामता अनवस्थाप्रसंग इत्यर्थः पुनरावश्यकत्वादिति स्मृतित्वसंसर्गान्योन्याभावानां स्मृतित्वसंसर्गाभावस्य संसर्गतविशेषणप्रवे
शद्वारा कथंचिद्भेदो वक्तुं शक्येत न तदभावे तु भेदकाभावादन्योन्याभावमादायातिप्रसंगो दुरुद्धर इत्याशयः। ननु स्मृतित्वाभाववत्वमनु
भूतित्वमस्ति स्मृतिव्यावृत्तो धर्म इति चेन्न यदि अत्यंतिकोभावः स तदा स्मृतित्वान्योन्याभावमादायेति प्रसंगः एवं नित्यसंसर्गा
भाव इत्युक्तावपि संसर्गान्योन्याभावमादाय स्मृतित्ववृत्तिः स्मृतित्वाभाव इत्यत्रानुभवे स्मृत्यवृत्तेरित्यस्योक्तत्वाद्भेदकत्वं स्मृतित्वाभाव
त्वसंसर्गस्य संसर्गतदन्योन्याभावावभ्युपेत्यानुभूतावतिव्याप्तिरुक्ता संप्रति सापि नानुभूतावस्तीति लक्षणस्यासंभवमाह। स्मृतित्वाभावसंसर्गा
तदुभयात्मस्वरूपातिरेकं संसर्गस्यामन्यमानेनेति अतिरेको भेदः ननु स्मृतित्वसंसर्गः स्मृत्यात्मकोधर्मी चेत्तयोः संसर्गः सता
सेवानुभूतावितिकथं निवेशानुपपत्तिरित्यत आह कथं शब्दः सूचितामनुपपत्तिं स्फुटयति किमनुभूतिरिति अयमर्थः यदि स्मृतित्व

संसर्गो धर्मिमात्रं चेन्नुभयस्वरूपतायाः संसर्गस्तदा अनुभूतिरप्यस्ति स्मृतित्वसंसर्गोऽप्यस्त्येव द्वयोरपि प्रामाणिकत्वादतः कथं तदुभयनिषेधः
अथ न धर्मिमात्रं तदुभयान्तर्गतं किन्तु स्मृतिरेवेति चेन्न स्मृतित्वसंसर्गी हि स्मृतिपदार्थस्ततः संसर्गस्य संसर्गिनिरूपणात् प्राक् ज्ञानं सकृन्निरू
पणाय यदि चानुभूतिस्वरूपं स्मृतित्वसंसर्गश्च न संसर्गीत्युच्यते तदा तदुभयस्वरूपतास्तीत्येवं निषेधे तदुभयापलापापत्तेः यदि च स्मृतित्वसंस
र्गस्य संसर्गिरूपेणानुभूतिः किन्तु स्मृतिरेवेत्युच्यते तदाह स्मृतावपीति न हि स्मृतौ स्मृतित्वसमवायादतिरिक्तः समवायस्य संबंधोऽस्ति तर्हि कथं
स्मृतित्वसमवायवती स्मृतिरिति व्यवहार इति चेन्न समवायस्वरूपेणान्निर्वाहस्यानवस्थाभयेन त्वया स्वीकृतत्वात् । तत्रभवतः पूज्यस्येति
विपरीतलक्षणया प्रयोगः ननु स्मृतित्वसमवायानुभ[illegible]विनानुभवेऽस्ति आत्माश्रयापत्तिरिति चेन्न हि स्मृतित्वसमवायस्मृतौ अपि न स्मृता
१८ विसव्यप्यापत्तिः अथ स्मृतित्वसंसर्गधर्मिणो स्वरूपमात्रेण संबंधः [illegible]पत्र संबंधबुद्धिजनकत्वं तत्र संसर्गिसंसर्गिणोः संबंधात्मकत्वम
स्तत्वेन तत्पदेन व्यक्तिरभिधानेऽव्याप्तेः अनुगतरूपस्याधानं वाच्यं तत्राह परस्परसंसृष्टबुद्धिजनकं स्वरूपं न चात्मभूतित्वस्मृतित्वसंस
र्गयोस्तादृशरूपमस्तीति नातिप्रसंग इति शंकते अथोच्यत इत्यादिना संबंधबुद्धिजनकत्वाभावस्तु लोकप्रसिद्ध इति भावः किन्तु वि
शेषेति व्यक्तिरुच्यते । उपसंग्राहकोऽनुगतं रूपमुच्यते तदुपसंग्राहकं स्मृतित्वमिति चेन्न तस्याद्याप्यविरूपणात् स्मरामीत्यनुव्यव

सीयमाणो जातिविशेष इति चेदस्त्वेवं तथापि संकीर्णास्तीति प्रश्ने यदि तत्र व्यक्तिविशेष इत्युच्यते तदा यावद्व्यक्तिर्नोपदिष्टा तत्र न स्यादि
ति तासां व्यक्तीनामुपसंग्राहकान्तरमवश्यं वाच्यं तस्य स्मृतौ कः संबंधः समवायश्चेद्दृष्टावनुभूतावपि स्मृतिमात्रनिष्ठः कश्चित्संबं
धश्चेत्तर्हि तेनैव समवायोन्यथासिद्धः अथ समवाय एव स तु नाना तथापि समवायः समवायिसंसृष्टो न वा आद्ये तस्यापि संसर्गो यत्रास्ति
तत्रैव समवायिनि तन्नास्तीति एवं तस्य तस्यापीत्यप्रामाणिक्यनवस्था स्यात् एतेन नवेति पक्षोपि परास्तः असंसृष्टेन तेन तज्ज्ञाने ऽनुभू
तावपि प्रसंगात् अथ जातिर्व्यक्तेरत्यंतभिन्ना किंतु व्यक्त्यभिन्नानुवृत्तिप्रतीत्यां पदमिति तस्याः संसर्गो नापेक्षते अभेदादे
वेति भट्टमतमालंब्यते तदपि न युक्तं तस्या अभेदः कया व्यक्त्या न तावदेकयैव स्मृतिव्यक्तीनां नानात्वाभावप्रसंगात् । नापि ना ना
ना स्मृतिव्यक्त्या सहाभेदः नानास्मृतीनां भेदकान्तरस्वीकारे तस्य तस्य संबंधेपि कथितदोषापत्तेः भेदकान्तराभावे ऽनुभूतावपि
स्मृत्यभेदापत्तिः । अथानुभूतौ स्मृत्यभेदो न लोकसिद्धो न वा प्रामाणिक इति चेत्तन् किं लोक एव प्रमाणं तथा सत्यलौकिक
पदार्थोच्छेदापत्तेः न वा प्रामाणिक इति पक्षेपि किं प्रतीतिरेव नास्तीत्युच्यते अथवास्त्येपि न प्रमेति नाद्यः प्रमाया आद्यापानि
रुक्तेः नाप्याद्यः अन्यथाख्यातिरूपे रजतानुभावेप्यख्यातिवादिनो रजतस्मृतिव्यवहारात् अनुभूतिरिति यस्य प्रतीतिस्तस्य

स्मृतिप्रत्ययो नास्तीति चेन्नतः किं तथापि वस्तुतोऽनुभूतौ स्मृतिप्रतीतिरस्त्येवं स्त्वेव अयक्षवस्तुतो नानुभूतित्वस्य व्यवस्थापित
त्वादिति । स्मृतिस्मृतित्वसंसर्गयोर्विशिष्टबुद्धिजनकत्वं न सिद्ध्यति नियामकाभावादित्युक्तं अस्तु वा न तथापि अनुभूतित्वस्य
स्यासिद्धिरित्याह नावतापि चेत्यादिना अत्र विद्यासागरः अनुभूतिस्मृतित्वसंसर्गयोः स्वरूपं न निषेध्यं सत्त्वात् नापि तयोः
संसर्गोऽनङ्गीकारादेव निषेधानर्हत्वादित्यसर्थ इति व्याचष्टे तन्न तावतापीत्यनेन विशिष्टबुद्धिजनकतायाः एव परामर्शात् न चैवं स्मृति
त्वसंसर्गं व्यवहितग्रंथानुत्थानबुद्धिमात्रजनकत्वं निषेध्यं प्रमाजनकत्वयेति विकल्पार्थं तदुत्थापनात् । एतेनैव स्मृतित्वसंसर्गोऽनुभूतौ
नास्तीत्यन्योन्याभावमादाय प्रकृतप्रसंगस्य तादवस्थ्यादित्याह एतावता स्मृतित्वसंसर्गनिषेधस्य वर्णयितुमशक्यत्वादिति भावः ननु स्मृति
त्वसंसर्गः स्मृतीसंबंधे इति बुद्धिरस्ति स्मृतित्वसंसर्गोऽनुभूतीसंबंधे इति धीर्नास्तीति तादृशधीजनकत्वमेव निषिद्ध्यत इति मिश्रव्याख्याऽवि
परास्ता अथवा च्यवनदूत्यादिना स्मृतित्वसंसर्गनिषेधपक्षस्य स्वयमेवान्यथा वर्णितत्वेन शंकाया अनुत्थानात् । अत्र निषेध्यप्रतियोगिप
दार्थः तादृशधीफलोपधायकत्वं स्वरूपयोग्यता वा आद्ये स्मृतावपि फलानुपधानदशायां तदस्तीति स्वरूपयोग्यता निषेध्या अस्ति च स्मृता
वपि स्मृतित्वसंसर्गः स्मृतीसंबंधे इति बुद्धियोग्यता न त्वनुभूतौ तादृशयोग्यतेत्याशयेन शंकेयं भ्रांत्यात्मिकाया इति यद्यपि अनुभूतिः स्मृ

तिरेवेति भ्राम्यत एव एवं बुद्धिः संभवति परं तु अयं भ्रम एव दुरपपादः प्रभाकराणामपि अनुभूतित्वेनोपस्थितिदशायां स्मृतित्वा
संसर्गाग्रहानंगीकारान्न तादृशबुद्धिस्तेषाम् अन्यथाख्यात्यापत्तेस्तथापि आहार्यारोपानैयायिकानां यद्वा नरसिंहाकारप्रत्यभि
ज्ञावादिनो भट्टाः प्रसिद्धा एव न च सा न भ्रांतिरिति सम्यग्वाधकादिनाभ्यमतमिति न चैतादृशभ्रांतिजनकतानुभूतेर्नास्ति प्रमाणाभावात् आरोप
ज्ञानधर्मिज्ञानदोषेतरत्वादिति वाच्यं विशिष्टप्रत्यक्षे विशेष्यस्यापि हेतुत्वादिति अथ अप्रमितप्रतियोगिक एव निषेधोस्त्वित्याशंकते
अथेति यावत्य इति स्मृतित्वसंसर्गस्मृतीसंवंधे इति यावन्तः सत्यबुद्धयः सह सूक्ष्मं ख्याजायंते ततोधिकाया बुद्धेः स्मृतावभावान्न जनकत्वाभा
वस्य सत्वात् स्मृतावतिव्याप्तिरित्यर्थः तादृशबुद्धिमिति स्मृतित्वसंसर्गस्मृतिसंवंध इति या बुद्धिरेकानस्या अजनकत्वं स्मृत्यंतरस्येति
सर्वामिति तादृशीमिति स्मृतित्वसंसर्गानुभूतीसंवंधे इति बुद्धिभिन्नामित्यर्थः यद्यपि तादृशसर्ववुद्धिजनकत्वेन स्मृतेरप्येकस्या एक
बुद्धावेव विशेष्यतया जनकत्वात्तत्त्वमित्यनुपपन्नं तथापीदं किं चेत्यादिना वक्ष्यत्येव सर्वतद्व्यक्तिप्रमित्यसंभवादिति सर्वासां
स्मृतिविशेष्यकतादृशबुद्धीनामसर्वज्ञत्वेन ज्ञातुमशक्यत्वात्तादृशप्रमितिजनकत्वरूपप्रतियोगिनोऽज्ञानेऽनुभूतिलक्षणं
दुर्ज्ञेयमित्यर्थः स्मृतावतिव्याप्तिं समुच्चिनोति किं चेत्यादिना शंकरमिश्रास्तु सामान्यलक्षणायां तदनभ्युपगममात्रमतं त्र मित्य

तुरायेनाहकिंचेति जन्यं नितथापि विप्रतिपन्नाबोधयितुमशक्या इति तदर्थं शब्दप्रयोगस्तु न स्यादिति दोषस्यानुद्धारादिति । आदेयं असतीं सर्वामिति पद्दे
स्मृतावतिव्याप्तिं स्पष्टेव न त्वसत्याः कारणमस्ति न वा न स्यां कात्स्न्यं धर्मतो विशेषणमपि सर्वत्वं व्यर्थमेवेति द्वितीये दोषं प्रदर्शयति यावत्सः स्मृतिव्यक्त्यद्दति
द्वितीयपक्षं शंकते कांचित् सत्यां सतीमिति सत्यां यथार्थामित्यर्थः तेनानुभूतावेव तादृशबुद्ध्यजनकत्वं न स्मृतौ तदनुपादाने अनुभूतावपि तादृश
भ्रांतिजनकत्वादतिव्याप्तिः स्यात् सतीं विद्यमानां तेन भूतभाविनीनां वर्त्तमानानामपि पुरुषांतरीयाणां स्मृतीनां तदजनकत्वे न दोष इति सर्वा
प्रत्यजनकत्वेपि किंचित्प्रति न दस्येव स्मृतेनानुभूतावितिनातिव्याप्त्यव्याप्ती इति भावः । प्रागेवेति स्मृतित्वसंसर्गधर्मिणी संबंधे इत्याका
रायायथार्थायायां बुद्धेरनुभूतिविशेष्यायाः सत्वेऽनुभूतेः स्मृतित्वापादनादित्यर्थः सत्याः सत्यतादृशबुद्धिरिति सत्या विद्यमानायाः सत्व
तादृशबुद्धेः स्मृतित्वसंसर्गानुभूतीसंबंधे इति यथार्थायाभावेनाभावेन चाजनकत्वासंभवात् तादृशबुद्धेरनुभूतौ सत्वेनानुभूतावजन
त्वं असत्वे च निरूपकाप्रसिद्ध्यातदजनकत्वमशक्यग्रहमित्यर्थः असत्वास्तु प्रतियोग्यनिरूपणादिया जनकत्वासंभवात् सतीमसतीं प्रत्य
जनकत्वमसंभवीति भावः प्रत्येकाजनकत्वमादाय स्मृतौ वतिप्रसंगोपि बोध्य इति मिश्राः स्तान्न ननु स्मृतित्वसंसर्गानुभूतीन संबंधे इति
प्रतीयमानोः संबंधाऽभावोऽनुभूतावेव न तु स्मृताविसनुभवसिद्धमेतत् स च संबंधः स्वरूपत्वं संबंधांतरं वेत्यन्यदेतत् किं च स्मृतित्वसम

वायः स्मृतौ स्मृतित्वसंसर्गः स्मृतावित्येवमनुभूयमानस्य स्मृतित्वसंसर्गस्य निषेधोऽनुभूतौ शक्यग्रहः तथा स्मृतित्वसंसर्गस्वरूपेणानुभ
व इति निषेधः संभवत्येवेति चेन्न आद्ये स्मृतित्वसंसर्गानुभूतिस्वरूपस्वरूपत्वे यौ नयोः प्रामाणिकयोरसत्वापत्तिः अनुभूतावेव तयोरसत्वं
न स्मृतावेति चेन्न स्मृतावपि स्मृतेरसत्वादुभयाभावः द्वितीये नैयायिकस्यापसिद्धान्तः किंचेत्युक्तमपि न युक्तं स्मृतित्वसमवायस्यानुभूतित्वसम
वायभेदादनुभूतावपि तन्निषेधासंभवात् समवायस्फुटतरप्रत्यक्षाविषयत्वाच्च अन्यथा तत्र विवादानुपपत्तेः किं च संसर्गान्योन्याभावमादायाति
च प्रसंगतादवस्थ्यात् स्मृतित्वसंसर्गस्मृतौ नानुभव इति प्रत्यये पि नानुभूतित्वसमवायाश्रयभेदो विषयः संभवति स्मृतावपि अनुभूतित्वसमवायसत्वात्
अनुभूतित्वविशिष्टः समवायो न स्मृताविति चेत्तर्हि अनुभवत्वविशिष्टो नेत्येवास्तु अस्त्वेवमेवेति चेन्न स्मृतिरनुभवाभेदस्य व्यवस्थापितत्वात् अयम
पि प्रत्ययः प्रमा भ्रमो वेति विकल्पनीयं आद्ये अप्रसिद्धिः सर्वस्यैव विशिष्टबुद्धिविषयस्याप्रसन्नया आगमेन बोधितत्वात् अन्त्ये न ततोऽर्थसिद्धिरिति मूकी
भूय विमृष्यतामिति स्मृतित्वरहितत्वमित्यनुभवलक्षणे स्मृतित्वान्योन्याभावमादायातिव्याप्तिः स्तोभट्टमते न परिहर्तुं माहस्यादेतदिति न हि ययोर्भे
दाभेद इति न च भेदसहितोऽभेदोऽस्ति अन्योन्याभावो नास्तीति स्ववचनविरोधः अन्योन्याभावस्यैवाभेदपदार्थत्वादिति वाच्यं तादात्म्याभावो ह्यन्योन्याभावः
४ सह तादात्म्यमनुगतप्रतीत्या सिद्धं नानुभूत्या न हीयं स्मृतिरियमपि स्मृतिरितिवदनुभूतिरपि स्मृतिरिति प्रतीतिरस्ति तस्माद्योग्यानुपलब्ध्याऽनुभूतावि

स्मृतित्वविस्मृतेरस्तु तादात्म्यं जातिव्यक्त्यात्मकत्वात् तस्मात्तयोरपि भेदाभेदे तादात्म्यापरनामनि तान्योन्याभावद्वह्न अनुष्णाशीतस्पर्शवत्तादात्म्यस्यापि चि
त्रात्मकत्वादिति भावः स्मृतित्वस्य स्मृत्या १

न्योऽभावोऽवधार्य्यत इत्याशंकते अनुभूत्वा सतद्विशिष्टप्रमाया इति तादात्म्यप्रमाया इत्यर्थः। किं तत्या इति यद्यनुभूतिः स्मृतिरिति प्रमानात्मीतु च्यते
सा प्रमा यदि सती तदा अनुभूतिस्मृत्योरिति द्वयोः सिद्धं तादात्म्यमिति भावः। अथात्मा प्रमाऽसती तदा कथं निषेधः असतोऽप्रतियोगित्वादिति भावः
अप्यं तात्पर्यासत्वात्प्रमाया अभावस्वीकारे स्मृतावपि स्मृतित्वतादात्म्यं न स्यादत्यंतासत्वात्तत्राप्यभावसंभवादिति भावः इत्यन्ये ननु सत्तासत्वा
अभावो नोच्यते किंतु प्रागभावप्रतियोगित्वादिति नोक्तदोष इति शंकते प्रागभावेति। यस्य हि यत्र प्रागभावस्तस्य तत्र कदाचिद्भाव इ
त्याशयेनाह अनुभूतौ तादृश्याः स्वीकारे नेति ननु स्मृतितादात्म्यप्रमाविषयता स्मृतौ प्रसिद्धा तस्याऽभावोऽनुभूतावस्तीति योग्यानु
पलब्ध्याऽभावग्रहोऽस्त्विति चेत्प्रमामात्रं दूषयितां प्रतितादात्म्यप्रमाया अभावस्य अनुभूतावेवेत्याशंक्य वचनत्वात्तु स्मृतावपि तादा
त्म्यप्रमा असत्वेवेत्येव हि एवं च निकमतं किं चानुभूतौ या स्मृतित्वतादात्म्यप्रतीतिः सा भ्रम इति कुतो निर्णीतं बाधादिति चेत् सर्वेऽपि स्वस्वपरस्य
वेति विकल्प्य स्मृतावपि तत्प्रतीतेर्भ्रमत्वमापादनीयं अन्यत्वप्रमालक्षणदूषणोद्धाराय प्रमाघटितलक्षणाभिधाने चक्रकग्रस्तमित्यपि दू
षणं बोध्यं दूषणांतरमाह स्मृतिद्वयोरिति ननु नानुभवः स्मृतिः स्मृतित्वेवेति कथं तदुभयान्योन्याभावाभावसद्भाव इत्याशंक्याह नहि अनुभवो न त
योरन्योन्याभावस्त्वयापीष्यते अतः सिद्धं स्मृतिस्मृतिद्वयोरिवानुभवस्यापि अन्योन्याभावाभावत्वमिति भावः। उक्तमिति अनुभूतेस्तथात्वमु

क्तभाववत्तेनइत्यर्थः संसर्गाभावयोरिति तथा च स्मृतिः त्वं स्मृतौ नास्तीत्यप्रतीप्रतीतेर्नातिप्रसंग इत्याशयः उपाधिभेदात् दंडअदंडयोर्भेदः जातिभे
दाद्गवाश्वयोः गुणभेदात् कृष्णशुक्लयोर्न चैवं तदन्यतरदप्यस्तीत्याशयेनाह प्रतियोगीति प्रतियोगिरूपस्योपाधेर्भेदादित्यर्थः । अनभ्युपगमा
त् अभ्युपगमे भावत्वापातात् हुणाभ्युपगमे द्रव्यत्वापाताच्च । कूटस्थादिग्णीति यथाहि कूटं साक्षिणमाहुः स व्यवहारः प्रामाणिको न भवति तथा प्रत्येत
व्यभेदाभावे प्रतीतिवैलक्षण्यधीरपीयमेकजातीये ज्ञाने मिथ्येति न तेन वेषु सिद्धिरिति भावः । कूटस्थादिग्णी मिथ्याबुद्धिरित्यर्थः इति विद्यासागरः
स्वप्रतियोगिसमानाधिकरणोऽभावः अन्योन्याभावः स्वप्रतियोगिना सह समानमधिकरणं यस्य स्तंभः कुंभो नेति प्रतीयमानस्याभावस्य
प्रतियोगितादात्म्यं तस्याधिकरणं तदुभयमभावोपि तदुभयाधिकरण इति अत्र संसर्गाभावेतिव्याप्तिवारणाय प्रतियोगिपदं तच्च अन्यप्रति
योगिसमानाधिकरणे संसर्गाभावे तथाप्यतिव्याप्तिमिति स्वरूपं पृथक्कृत्वा वै गुणे गुणप्रतियोगिद्रव्यनिष्ठेऽतिव्याप्तिवारणायाभाव
पदमिति व्याचष्टे तन्न प्रागभावध्वंसयोरतिव्याप्तेः यदि च प्रतियोगिपदं तादात्म्यपरं तदा अभावपदवैयर्थ्यं पृथक्त्वस्य तादात्म्यप्रतियोगिकत्वा
त् तस्मात् स्वप्रतियोगिसमानाधिकरणसमानकालीनोऽभाव इत्येवं लक्षणं वदन् संयोगे स्वप्रतियोगिना वदरेण सह कुंडे वर्तमाने ति
व्याप्तिवारणायाभावपदं आकाशान्योन्याभावोपि आकाशसमानाधिकरणस्तस्यापि संयोगे वृत्तिमत्त्वात् अभावविरहात्मत्वप्रतियो

गित्वविवक्षायांत्वभावपदंनादेयमेव। तदन्योन्याभाववानितिअन्योन्याभावभिन्नोऽभावइत्यर्थः अन्योन्याभावस्याश्रयेऽतिव्याप्तिवारणा
याभावपदं। विद्याशागरस्तुतदभावइतिपाठंदृष्ट्वातदन्योन्याभावोतिव्याप्तिवारणायतदन्योन्याभाववानित्यस्यतेनप्रतियोगिनासहा
न्योन्याभाववानित्यर्थः नचान्योन्याभावःप्रतियोग्यन्योन्याभाववानअनवस्थापातादितिव्याचख्यौनास्त्येवतत्पदमितितुवस्तु
गतिः यथासंभवमितितिअभावत्वंभावभिन्नत्वंचेत्तदान्योन्याभावलक्षणमात्माश्रयग्रस्तंः अथभावत्वात्यन्ताभावत्वंतदासंना
भावत्वस्यसदाचनतेसंसर्गाभावत्वरूपत्वात्नूसंसर्गाभावत्वस्यचान्योन्याभावाभावस्वरूपस्यान्योन्याभावनिरूप्यत्वादन्योन्याश्र
यः यदिचाभावत्वंभावभिन्नत्वंतच्चभाववैधर्म्यनच्चतदन्यवृत्तिधर्मात्यंताभावत्वंतदन्यत्वंचतदन्योन्याभाववत्वमितितदाच
क्रकं यद्वाअन्योन्याभावस्यान्योन्याभावोक्तिनवाअंत्येसंसर्गाभावमिथ्यास्यात् आद्येसयदिस्वरूपात्मकस्तदा अन्योन्याभा
वस्यस्वानिरूप्यत्वादात्माश्रयः। यथापरस्तदातस्याप्यन्योन्याभावोयदिपूर्वस्तदान्योन्याश्रयः अथपृथमादन्यएवतदापि
तस्याप्यन्योन्याभावोयदिप्रथमस्तदाचक्रकं यदिचान्यस्तदापिएवंचमधक्षादिकमभ्युपेत्सयदिपरावृत्तिस्तदापुनश्चक्रकं
अपरावृत्तावनवस्थाउक्तरोत्तरेषामननुभवश्चस्वप्रतियोगीत्यत्रस्वपदस्यान्योन्याभावपरत्वेआत्माश्रयः अथाभावमात्रपरं

चेदनुभवविरोधः न ह्ययमेतयोस्तादात्म्यं तयोस्तदेव तदभाववत्त्वानुभवः तथाभावस्य यस्य प्रतियोगिना स्वरूपसंबंधविशेषाश्रयेण सामाधि
करण्यमित्येवार्थस्तदा संयोगज्ञानादिसंसर्गाभावे तिव्याप्तिर्धिस्य व्याप्यवृत्तेरभावस्य प्रतियोगिसामानाधिकरण्यमित्युच्यते तदाऽव्याप्यवृत्त्यान्योन्या
भावाव्याप्तिः स्वपदं तत्र शक्तिविशेषपरं चेत्तदा पक्ष्यंतरेष्वक्ष्यंतरसंबंधाभवादन्योन्याभावव्यवहाराभावप्रसंगः यदि चान्योन्याभावशब्दो
ऽननुगतवाची अनेकार्थः सोपि न स्वपदस्याभेदेष्वननुगमे तत्प्रतियोग्यवगमाननुगमप्रसंगोऽननुगमे च प्रतियोगिनिरूप्या
न्योन्याभावस्यावगम एव न स्यादिति कथं तत्र शक्तिग्रह इति भावः। यदि स्वपदं अभावमात्रपरं तदा अव्याप्यवृत्तिसंसर्गाभावे तिव्या
प्तिरिति यत्किंचिद्विकल्पे योदोषः संभवति स तत्र द्रष्टव्यो नेत्येक एवेत्याह यथासंभवमिति अन्योन्याभावलक्षणखंडनेनैव
तद्घटितं संसर्गाभावलक्षणमपि खंडितं भवतीति तत्र पृथक् खंडितं अत्र मिश्रा अस्ति हि प्रतीत्योर्वैलक्षण्यं तत्र प्रत्येतव्ये वैल
क्षण्याविनाभूतं प्रत्येतव्यं तु यद्यपि विलक्षणतया न सर्वाभिधानं तथापि नाभिधानमात्रेण निवर्त्तते इक्षुक्षीरादिमाधुर्य
वत् प्रतीतिविशेष एव वा लक्षणमुभयोः संभवति च तादात्म्यावच्छिन्नप्रतियोगिकत्वसंसर्गावच्छिन्नप्रतियोगिकत्वमुभयो
र्वैचित्र्यमिति नेदं खंडनं शोभनम् इति तदत्यंताशुद्धं निर्वचनाशक्तोपरबोधनात्सामर्थ्यान्निग्रहापत्तेः इक्षुक्षीरादिमाधुर्यमपि

नानभिधेयमभिधेयत्वस्य भवन्मते केवलान्वयित्वात् नाप्यनभिधेयं विशेष इति शब्देनैवाभिधानात् अभिधानानभिधान
योर्दृष्टांततानुपपत्तेः नापि प्रतीतिविशेषएव लक्षणं प्रतीतिरिह प्रत्येतव्यभेदेन विना वैलक्षण्याभावात् तस्याचासिद्धेः तस्यावै
लक्षण्ये लक्षणत्वं संबद्धे च तस्यावैलक्षण्ये प्रत्येतव्यवैलक्षण्यमितीतरेतराश्रयत्वं तादावच्छिन्नेत्यादि न तदपि न तादा म्य।
त्म्यस्य प्रतियोगितावच्छेदकानतिरिक्तत्वेन घटसंसर्गाभावेपि गतत्वात् संसर्गी घटो नेत्यन्योन्याभावस्यापि संसर्गप्रतियोगिता ना
वच्छेदकत्वादतिव्याप्तेः यो हि संसर्गतादात्म्यान्निषेध इति स्मृतित्वसंसर्गान्योन्याभावद्वयस्यार्थः तथा च नातिव्याप्तिः स्मृतावनुभूतिलक्षणस्येवार्थः
तेषां ध्वंसाद्यनुपलक्षणं प्रागभावस्यापि नास्त्येव वा प्रागभावः न हि घटसंयोगयोर्घटो ध्वस्तः कपालसंयोगेन नष्ट इति ध्वंसप्रतीतिवत् कपाले घट
प्रागभाव इति प्रतीतिरस्ति किंतु कपाले घटो नास्ति प्रयोगो नास्तीत्येवमाकारा प्रतीतिः सन्नपि घटत्वसंयोगतावच्छिन्नात्यंताभावाव
गाहिन्येव यावद्घटसंयोगप्रतियोगिकत्वात्तेषामिति द्रव्यादिप्रतियोगिका हि नेन संसर्गप्रतियोगिकाः। यत्तु समवायस्य नित्यत्वेपि
द्रव्यादिनिरूपितः समवायो ध्वंसते विशिष्टस्यानित्यत्वादिति तदसत् समवायस्य नित्यत्वाभावप्रसंगात् ध्वंसाप्रतियोगित्वं हि नतु
नवा विशेषणनाश एव विशिष्टनाशस्तयोरभेदप्रसंगात् समवायो न नष्टः किंतु घटादिकमिति विरोधिप्रत्ययाच्च अविशेषितयो

पकाविशेषितयोरिति॰ यदि च विशिष्टयोर्निषेधस्तदा तयोरपि स्वरूपं संसर्गः संसर्गी च द्वयमपि न स्यादित्यवधेयं ॥ द्वयमनंतरं चास्यमेव वदति ॥
रितियदि च विशिष्टयोर्निषेधस्तदा तयोरपि स्वरूपं संसर्गः संसर्गी च द्वयमपि न स्यादित्यवधेयं द्वयमनंतरं चास्यमेव वदति कालवदि
ति यथा हि कालस्य कालनतो देशनो वा ऽवधिर्नास्ति इह देशे काल इति इह काले काल इति तथा घटोपि स्यान्न कुचिदपि देशे ऽभावो भावा
द्विभुः कुचिदपि काले ऽभावाभावान्नित्यः स्यात् कालवदित्यर्थः संसर्गान्योन्याभावाविति अत्रान्योन्याभावपदं दृष्टांतार्थं यद्वा घटवदन्योन्या
न्याभावस्य न घटवान् प्रतियोगीति सर्वोपि देशो घटवान् स्यादित्यर्थः यथा तादात्म्यसंसर्गयोरुच्छेदस्तथा घटादेरपि प्रतियोगित्वे घटादिस्वरू
पमुच्छिद्येत तादात्म्यवत् संसर्गवच्चेति सर्वैर्द्वैताभावे ऽस्माकमिष्टसिद्धिरित्याशयेनाह यद्यदेव प्रतियोगिवाच्यमिति। यदि तादात्म्यसंसर्गयो
स्तादात्म्यांतरं संसर्गांतरं च निषिध्यते तदा प्रथमयोर्वदति साशयेन शंकते यदि चेति अविशिष्टोपाधिनैकीकृत्य तस्यैकवचनप्रयोगः
संसर्गमिति संबंधमित्यर्थः तादात्म्यस्यापि संबंधत्वात् तद्धेतमिति तादात्म्यसंसर्गयोरनिषेधे संसर्ग एव निरवधिः स्यादिति तद्दूषणम दू
सत्तं यद्वा संसर्गस्वरूपमसत्तं स्यादित्यर्थः शेषेति अनवस्थाभियाशेषस्य स्वरूपनिषेधे न तु पूर्वोपि स्वरूपेणैव निषेध्यः शेषस्य संसर्गि
स्याभावादित्येवं न तु पूर्वपूर्वः संसर्गो न स्यादिति संसर्गमात्रे लुप्तं स्यादित्यर्थः अथ संसृष्टो घटो यत्र निषिध्यते स संसर्गाभावः तथा च घटसं
सर्गनिषेधांतरीयको घटनिषेधः एवं तादात्म्याभावेपि बोध्यमिति चेन्न तर्हि संसृष्टघटस्य स्वरूपं न स्यादिकत्वात् तथापि घटस्वरूपं

४०

< भावधर्मत्वात्॥ यदि च विरुद्धविशेषवत्ता तदा अन्यत्र आपाद्यते तत्र रूपरसयोर्भावव्हेतच्छित्ति· रूपरसयोः परस्परमन्योन्याभावापत्तिरिति चेन्मिश्रा... संयोगसमवाययोरप्यापाद्यत्वात्तयो

सदेवेति चेन्न सत्यं परं तु निरवधिः स्यादित्युक्तं ननु घटतदभावौ द्वावप्यनुभवसिद्धाविति नाभावत्वं तत्स्वरूपनिराकरणसमर्थं सर्वदिह अभावदेशेऽपि
सत्स्यादिति चेन्न योग्यानुपलब्धिबाधादित्याशंक्य तेन शंकते न प्रतियोग्यनुयोगिनोस्तथात्वं प्रतियोग्यभावयोर्विरोधेन निषेध्यनिषेधस्व
रूपत्वं सहभावभावाभावयोर्विरोधः सहभावः सहत्वं एकदेशकालैककालावच्छेदेन स्थितत्वं तदभाव एव विरोधः तन्मात्रं सहभावाभावमात्रं
न तु तन्मात्रं प्रतियोगिमात्रे तथा चान्यत्र सत्तारूपेण प्रतियोगित्वं अन्यत्र चासत्तारूपेणाभावत्वेन विषयत्वमित्यप्रयोजकत्वं
प्रतियोगिनोऽभावप्रतियोगित्वे स्वरूपोच्छेद इति भावः अनुयोगिनीति सहावस्थानाभावात्मकविरोधस्यैवमप्यभंगात् अथाभा
वे प्रतियोगिनो वृत्तिश्चेत्तदा सहावस्थानापत्तिरभावेऽभाववृत्तिर्न दापत्तेः न ह्यभावे नाभावस्तथा सति प्रतियोगिमत्तापत्तेरिति चेत्
सत्यं किं तु अभावो नाभावाधिकरणवृत्तिर्यथा पटीकानुसारेण इदं दूषणं। अथाभावे प्रतियोगिनो घटादेर्वृत्तित्वे संभवति संयोगसमवाययो
+भावधर्मत्वमेव न स्यादप्रयोजकत्वात् आपादनेऽप्यापाद्याभावस्यानुगुणत्वात् रूपरसयोरपि परस्परानधिकरणत्वे प्रतियोग्यनुयोगिनोः स्वपर
स्परम् अथाश्रयिभावापत्तिरिति मिश्रास्तन्न संयोगसमवाययोरप्यापाद्यत्वात्तयोर्भावधर्मत्वमेव विरुद्धस्वभावत्वात् स्वीकारादेवेति न किं
चिदेतत् तथा प्रमाणाभावमूलकस्येति यथा ह्यभाववति प्रतियोगिप्रमाविरहः सत्तानवस्थानरूपविरोधमूलं तथानुयोगिनि प्रतियोगिप्रमा

विरहेऽपि प्रतियोग्यनुयोगिभावात्मकविरोधमूलक एव सहानवस्थाननियमलक्षणस्य तत्रा किंचित्करत्वात् तस्मिन् सत्यपि तत्प्रमा
प्रसंगेन तन्नियमभंगात् न हि यस्मिन् प्रतियदा पद्यते तेन तदभावे तन्नियामकमिति भावः प्रमात्वंउनिके प्रमाभावेन तदभावसाधनं न युक्त
मिति च वोध्यं विरोधाभावेन भानस्याप्यापाद्यमानत्वाच्च । अथ सहानवस्थानलक्षणविरोधस्यानुयोगिवृत्तावत्वे विप्रतियोग्यनुयो स
गीभावाऽपरो विरोधः स्वीकार्य्य इति कुतः सहतद्वत्तया प्रमीयमानत्वाभावरूपस्य विरोधस्यैतं भवान् । प्रतियोग्यनुयोगिभावस्य तथा
त्वेऽप्येतदेव मूलमित्याशयेनाह तथात्वेन प्रमीयमानत्वमिति अतथा प्रमीयमाणत्वमित्यर्थः सहाप्रमीयमाणत्वं विरोधः किं वा नियमेनेति य
शे आद्येऽतिप्रसंगादिति रूपरसयोः पटे न सहाप्रमीयमानयोर्घटेऽपि विरोधः स्यात् द्वितीये आह यत्त्वयोरिति नियमस्यानुगतरूपनिष्ठत्वाद्यत्त्वो
र्व्यावृत्तत्वान्नियमेन तथात्वं नास्तीति व्यक्त्योर्विरोधो न स्यादित्यर्थ इति विद्यासागरस्तदाशयस्तु अनुभूतिस्वरूपेण व्याख्यातो यथा अग्नौ सत्येव धूम
इति नियमग्रहणात् सामान्योपाधावेव संभवति नैकस्यां व्यक्तौ व्यतिरेकाभावाद्व्यासभादेरपि पूर्वरूपेण सत्वेनानन्वयसंदेहात् तथा भावाभावयोरपि सामान्यो
पाधावेव सहाप्रमीयमाणत्वनियमो ग्राह्य इति व्यक्तिस्वरूपेण विरोधप्रसंग इत्यर्थस्तदुभयमप्यशुद्धं सामान्यपुरस्कारेण व्यक्त्योरपि व्याप्तिग्रहात्
न हि धूमत्ववह्नित्वयोरेव व्याप्तिर्द्वयोर्व्यधिकरणत्वात् किंतु धूमसामान्यं वह्निसामान्यव्याप्यं कोऽर्थः अप्रविष्टमहानसीयत्वादिविशेषो धूमो धूम

त्वेन व्याप्तो न तु महानसीयधूमत्वेन न वा वह्निरपि महानसवह्नित्वेन किंतु वह्नित्वेन तथा च यद्यपि विशेषयोर्नानुगमः शक्यते गृहीतुं पर्वतीयवह्नि
महानसधूमयोः सहानवस्थानात्तथापि वह्निसामान्यधूमसामान्ययोर्न विरुद्धत्वं न हि धूमवति वह्निर्नेति कस्यापि प्रतीतिर्यथा हि महानसीयधूमव
ति पर्वतीयवह्निर्नास्तीति तथा इत्येव निष्कर्षस्तथा च इहापि घटमात्रेण सह घटाभावस्य प्रतियोगितावच्छेदक घटत्वानुयोगितावच्छेदक घटाभा
वत्वपुरस्कारेण यत्र घटाभावस्तद्देशे घटो नेत्येवं शक्यत एव ग्रहीतुं । अपि चाभावप्रतियोगिनोः सहानवस्थाननियमवदाधाराधेयभावोऽपि नास्तीति
वक्तव्यमन्यथा प्रतियोगिनोऽनुयोगिवृत्तितापत्तेरिति वृत्काणस्यार्वाउनिकस्य पक्षे न सहाप्रमीयमानत्वरूपस्य विरोधस्य स्वीकारेऽपि दूषितं स्या
न्मास्तु सहप्रमीप्रमाणत्वं आधाराधेयभावस्तु स्याद्यदि प्रतियोग्यनुयोगिभावात्मकोऽयं विरोधो न स्यादिति हि तस्य मतं तस्मात्तथा प्रमीयमाण
त्व माधाराधेयभावेनाप्रमीयमानत्वं विरोधो न तु प्रतियोग्यनुयोगिभावः कश्चिद्विरोधस्तन्निर्वाच्यस्यावश्यकेन प्रमाणभावेनैवोपपन्नेरित्येव
फक्किकार्थः मिश्रास्तु साहित्येनाधाराधेयभावेन चाप्रमीयमानत्वमेव च विरोधो न तु प्रतियोग्यनुयोगिभाव इति शंकार्थ इत्याहुः परं तु प्रति
योग्यनुयोगिभावादन्य इत्यनेनाद्रिमस्यान्यस्य निर्वचने ग्रंथस्य तात्पर्यं जस्यं प्रतीयते इदं तु चिंत्यं किं प्रतियोग्यनुयोगिभावो नास्ति किं वा सन्न
पि न विरोधः उभयमपि न युक्तं प्रमाणसिद्धत्वात् अत एव तथा प्रमाणभावे नान्यथासिद्धपि तु नशक्यं त्रयाणामेव प्रामाणिकत्वादिति ।

तथापीदमुपेक्ष्या निर्वचनखंडनेनैव निर्वचनयति अतिप्रसंगादिति स्पष्टार्थं अपि सजातीययोर्न कदाचित्तथाप्रतीयमानत्वं रूपस्पर्शयोस्तु घ
टादौ तथाप्रतीयमानत्वान्न विरोधस्तत्राह व्यक्त्योरिति घटवृत्तिरूपव्यक्तिपटवृत्तिस्पर्शयोर्विरोधो न स्यादित्युक्तौ च तयोराधाराधेय
भावानुपलब्धिर्विरोधः। मिथस्तु ययोर्जात्युपग्रहो नास्ति यथा नित्यत्वानित्यत्वयोर्भावत्वाभावत्वाभावत्वाभावत्वयोर्विरोधो न स्यात्
यद्वा नियमो यद्दिग्देशगर्भस्तदा देशव्यक्त्योर्यदि कालगर्भस्तदा कालव्यक्त्योरतीतत्वानागतत्वयोर्विरोधो न स्यात् देशे देशस्य काले च
कालस्याभावात् जात्यवच्छेदेन विरोधोपसंहारे जात्योरेव विरोधः स्यान्न तु व्यक्त्योरिति वार्थ इति फक्किकार्थ इत्याहुः न चैवं संयुक्त
तधर्मावच्छेदेन तथाप्रतीयमानत्वं तत्रास्तीत्युक्तौ न प्रथमो दोषः देशे देशस्य काले च कालस्य स्वरूपसंबंधेन सत्त्वादन्यथा स देशः ॐ स्य
कालो वा मिथ्यैव स्यात् क्वचिदपि कदाचिदप्यभावात् आकाशादिकमपि देशकालवृत्त्यैवान्यथा मिथ्यात्वापत्तेः प्रतीतिश्च तथापि द्वि
तीयः जात्यवच्छेदेन तथाप्रतीयमानत्वाभावस्य व्यक्त्योरविशिष्टत्वादिति। नियमाघटितमेव विरोधलक्षणं निर्वक्ति तथा न प्रमानुमिति
तथा आधाराधेयभावेन प्रमातुर्या योग्यता तस्याः स्वाभाविको विरहः योग्यताफलोपधाने पटे महारजतरूपस्य सहकारिणा
विरहेण रक्तप्रमाविरहोस्ति न तु आधाराधेयभावाभावात्मको विरोध इत्यत उक्तं अनौपाधिकीति परे यथा रक्तप्रमायोग्यतायास्सहकारि

णमप्रहाराजनेन प्रयुक्ताः अतस्तद्विरहमपुरुक्त एव तत्र प्रमाविरहो ननु घटाभावे घटप्रमा विरहः केनापि सहकारिविरहेन प्रयुज्य
ते कदाचिदपि तत्र घटप्रमानुदयात् किं तु घटाभावत्वप्रयुक्त एवेति तयोर्विरोध इत्यर्थः न चैतादृशफलोपधानाभाव आत्मन्यपीति
तत्रातिव्याप्तेः प्रमात्मनोराधाराधेयभावाभावात्मकविरोधानंगीकारादित्यत आह सैव मे यतेति आत्मनिष्ठा प्रमायोग्यता सा सत्कारि
योग्यताहृपात् फलोपधानात्मिका सैव प्रमापत्तेः अत एवोपाधिक्यासा स्याः सहकारियोग्यताया विरहेन विरोधस्तस्य चैतन्नत्वेन कदाचित् प्रमाधारत्व
स्यापि मितेः सैव योग्यता केत्यन्वयः घटत्वप्रमाफलोपधाने घटएवत्सेव अनुयोगित्व प्रतियोगित्वयोर्निषेधनिषेध्यभावादन्योन्यकासमर्थितास्यात् ता किं
के न शक्तिरूपयोग्यतानंगीकारादभावे प्रतियोग्याधारत्वप्रमायोग्यताया निषेध्यासा प्रमैव फलतीत्यर्थः ततश्च तद्विरहोपि विरोधरूपः प्रतियो
ग्यनुयोगिभावस्य अनुयोगिनो न्यत्र घटवति घटप्रमासत्वाद् घटाभावे चानुयोगिनि तद्विरहो घटाभावत्वमेव पर्य्यवस्यतीति निर्ष्कर्षः । यद्वा
न प्रमानुयोग्यतेत्यस्य प्रमाभावजननयोग्यतेत्यर्थः यद्यपि प्रतियोगिमत्वप्रमाभावो ऽभावे ऽसंताभावात्मको नित्य एव तथापि अभावस्य
विरोधिप्रमाजननसामर्थ्याधीनस्तस्य प्रतियोगिप्रमाविरहवत्वमित्यर्थः । यद्वा न प्रमानुमित्यत्र नञ् विरोधिनि तेन विरोधिप्रमाजनयितु
योग्यतेत्यर्थः विरोधित्वं च प्रतियोगिप्रमाया तथा च प्रतियोग्यताधारत्वप्रमेत्यर्थः इति ध्येयं ननु भावाभावयोः स्वरूपमेव विरोधो न तु प्रतियोग्य

चयोऽन्यतरयोगिभावइति शंकते स्वरूपमेवेति मिथ इति परस्परं तादात्म्यमभ्युपगच्छताबोधेन प्रमंभाकरेण च तयोः स्वरूपोपगमात्
कथमन्यथाऽभावोभाव एवेति ब्रूयात् । तथाभूतं आधाराधेयभावेन प्रमातुमित्यर्थः (तस्यैवेति) तर्हि तदेव प्रमातुमयोग्यत्वमेवेत्यर्थः
यद्वा भावाभावयोः स्वरूपं यद्यपि विरुद्धं तथापि परस्परारूढत्वस्य विरोधीधर्म्मो न स्यात् तथाभूतं स्वरूपमिति यादृशं स्वरूपं ज्ञाने प्रति
योग्याश्रयत्वज्ञानविरोधीत्यर्थः तस्यैवेति मदुक्तस्य प्रतियोग्यनुयोगिभावातिरिक्तस्य निर्वक्तुमशक्यत्वादित्यर्थः स्वभावनिरुक्तौ
स्व विरोधो गोत्वाद्युपाश्रयपिवन्नेमानोऽपि यदि भावाभावयोरविलक्षणत्वदाभावाभावयोः प्रतियोग्यनुयोगिभावो न गोत्वाश्वत्वयोरिति
न स्यात्तथा चातिव्याप्त्यापत्तिरिति भावः यद्वा निरुक्तविरोधो यदि गोत्वाश्वत्वसाधारणस्तदा भावाभावयोरपि तदा भावाभावरूप
तैव न स्यात् सत्तां चेत्यादिना सहानवस्थाननियमः सहाप्रमीयमाणत्वं तथा प्रमातुमयोग्यत्वमिति लक्षणत्रये साधारणं दोषमा
ह प्रकारभेदेन अवच्छेदभेदेन व्यवस्थानकार्य्या तं योगात् तद्भावादीनां प्रमादर्शनादेव तथात्वेन अप्रमाभ्युपगमेन तद्घटितस्य विरो
धत्वस्याभावात् तस्मात् प्रतियोग्यनुयोगिभावात्मको विरोधो भावाभावयोरेव तथा च भावश्चेत्तर्हि प्रतियोगिव्यवहारोच्छेदः
भावश्चेत्तर्हि कालवन्निरवधित्वापात इति प्रसन्नेव भावोऽनाद्यविद्ययाभासतद्रूसेवज्ञायः ननु विपरीतसमर्दैन श्रुतिविरोधादिति ।

संसर्गतादात्म्ययोरविशेषितप्रतियोगिताकनिषेधे स्यादेवं यदि दोषस्तर्हि विशेषितप्रतियोगिताक एव निषेधोऽस्त्विति प्रागुक्तदोषोद्धाराय शंकते अथ
घटादिविशेषितप्रतियोगितेति । स प्रसंगः स्मृतित्वसंसर्गान्योन्याभावात्मकं स्मृतिसंसर्गाभावमादाय स्मृतावप्यनुभूतित्वप्रसंगः ।
यद्यपि विशिष्टस्य निषेधो नावश्यं विशेषणस्य दंडवति भूतले दंडी नास्तीति बुद्धेरभ्रमत्वात् तथा च स्मृतित्वसंसर्गवति स्मरणे स्मृतित्वसंसर्गान्यो
न्याभावः संसर्गाभावो न भवति किं त्वन्योन्याभाव एव तथा च स्मृतित्वसंसर्गान्योन्याभावस्त्वयुक्ते नान्योन्याभावमात्रं प्रतीयते अपि तु संसर्गप्रति
योगिक एवेति भवति सोऽपि निषेधश्च संसर्गप्रतियोगिकश्चेति संसर्गाभावस्य कोऽपि नास्तीति भावः तथात्वे न संसर्गाभावत्वेन एवमिति अन्यो
न्याभावसंसर्गाभावेऽतिव्याप्तिवारणाय अव्याप्त्या लक्षणद्वयं दूषयति एवमिति तादात्म्यमिह नास्तीति प्रतीयमानः अन्योन्यसंसर्गाभा
वो न नान्योन्याभावो न वा संसर्गाभावोऽन्योन्यप्रतियोगिकत्वादिस्वपराकोटिः स्यान्न चैवमिष्टं तथा च तस्य संसर्गाभावत्वमिष्टं नो भवत
स्तत्र संसर्गाभावलक्षणाव्याप्तिः अन्योन्याभावसंसर्गाभावभिन्नाभावांगीकारे च अभावविभाजकोपाधेर्न्यूनता एवं संसर्गान्योन्या
भावोऽपि घटो न संसर्ग इति प्रतीतिविषयः संसर्गप्रतियोगिकतया नान्योन्याभावः संसर्गाभावत्वं तु तस्य त्वयापि नेष्यत इति तृतीय
कोट्यापत्त्याभावविभागव्याघातस्तद्रूपारन्योन्याभावत्वांगीकारेऽन्योन्याभावलक्षणाव्याप्तिः स च साक्षात् संसर्गप्रतियोगि

कः संसर्गाभाव एव मन्योन्याभावोऽपि निर्वाच्य इति वाच्यं तादात्म्यं हि न स्वरूपातिरिक्तं तथा च संसर्गतादात्म्यनिषेधोऽपि साक्षात्संसर्गनिषेध एव ।
एवमन्योन्याभावसंसर्गस्याप्यन्योन्याभावानतिरिक्तत्वात् संसर्गनिषेधोऽपि साक्षादन्योन्याभावनिषेध इति नोक्तदोषोद्धारः । अथान्योन्याप्रतियो
गिकः संसर्गनिषेधस्तथा विवक्षित इति वाक्यस्यान्योन्याभावादन्यः संसर्गनिषेधः संसर्गाभाव इति पर्यवसितोऽर्थ इति चेदत्रापि संसर्गपद
वैयर्थ्यमित्याह किंचेति सत्त्वं तर्हि संसर्गपदमित्युक्तोऽपि न निस्तार इत्याह संसर्गाभावमर्थमधिकमिति अन्योन्याभावादधिकं संसर्गा
भावशब्दस्याभिधेयमाकाङ्क्षता शब्दोऽपि संसर्गाभावपदमपि हारितं अस्तु गणवदर्थे प्रसाशानुरूढमेवान्योन्याभावभिन्नेऽभावे संसर्गाभाव २
पदं शक्तिमिति चेन्न संसर्गस्याभावः संसर्गाभाव इत्यनुगतार्थमिति यौगिकमित्यर्थः यौगिकोऽस्तु यं संसर्गाभावशब्दः तस्य चार्थोऽन्योन्याभावे संस
र्गप्रतियोगिकेऽप्यस्तीति तद्याह्नन्नयेऽन्योन्याभावभिन्नत्वं प्रतियोगोपाधिरुच्चितः यदि च लक्षणे संसर्गपदं न प्रवेश्यं तदान्योन्याभावत्वए भिन्नाभाव
से वरूढिरस्तु संसर्गप्रतियोगिकत्वस्याप्रतीतेरिव स्यात् अधिकं धनमाकाङ्क्षतामनुगतत्वशानुगतधनं नाशितमिति परिहासः
यौगिकत्वं हि संसर्गाभावशब्दस्य सर्वदा नैयायिकसम्मतं तद्धनमिव नानाप्रयत्नैन रक्षते तदपि नं करस्थितुमिति महत्कौ २
शलमिति । अनयावाचोभंग्या अन्योन्याप्रतियोगिक इति विशेषणगिरेत्यर्थः । कथमन्योन्याभावेऽन्योन्याभावभेदप्रतीमां

शंकामपनुदति नहीति यथाहि संसर्गाभावोऽन्योन्याभावे तादात्म्यानुपलब्ध्या अन्योन्याभावः सिद्ध्यति तथान्योन्याभावेपि अन्योन्याभावत्तादात्म्य
त्नोपलभ्यते तादात्म्योपलंभो हि अन्योन्याभावोऽन्योन्याभावो भवतीत्येवमाकारः स च न संभवति रूपभेदाभावे न सामानाधिकर
ण्याभावात् भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं तत्तस्तदभावात् रूपभेदाभावात्तदभावादन्योन्याभाव
बोधकशब्दद्वयस्य सामानाधिकरण्याभावादेव न तथान्योन्याभावोऽन्योन्याभावो नेति संसर्गाभावलक्षणमन्योन्याभावेऽ
प्रसक्तमित्यर्थः ननु शब्दयोः सामानाधिकरण्यमास्तु येन रूपापत्तेरन्योन्याभावेऽन्योन्याभावत्वप्रमायो कथमशक्यत्वमिति
यदि तु अन्योन्याभावरूपं प्रथमज्ञाने यो विषयः स एव द्वितीयज्ञानेपीति धारावाहिकमिव द्वितीयं ज्ञानं तादात्म्यं न विषयीक
रोतीत्युच्यते तदालं समानाधिकरण्याभावो परं तु बेनेन किंच धारावाहिकं नार्नैरशेण परक्तुमेकं विशेष्यं गृह्णात्यन्यथा गृही
तग्राहित्वेनाप्रमाण्यापत्तेरिति चेन्न सत्यं परं तु प्रथमज्ञानस्य यो विषयः स एव द्वितीयज्ञानस्येति प्रथमज्ञाने यथान्योन्याभावाभेदो
न विषयस्तथा द्वितीयेपीत्यन्यथा प्रथमेनैवाभेदसिद्धे द्वितीयवैयर्थ्यं अथ प्रथमज्ञानं धर्मिन्योन्याभावत्वं विषयीकरोति द्वितीयं त्वन्योन्याभाव ए
त्वेनोपस्थितेऽन्योन्याभावत्वमिति विशेषमिति चेन्न तथापि धर्मिणो धर्मस्य च विषयस्य न नानात्वमिति नैयं प्रमाद्वयोरप्येकविषयत्वादित्या

व्यापकं तच्चेत्साम्यासी ४

शयेनाह न शक्यं प्रमातुमिति द्वितीये ज्ञानमप्रमागृहीतग्राहित्वादिति भावः अथ द्वितीयज्ञानमन्योन्याभावविशेष्यकमन्योन्याभाव
विशेषणकं यच्च तादात्म्यसंबंधेनात्रान्योन्याभावः प्रकार इत्युच्यते तथा सत्यन्योन्याभावोऽन्योन्याभाव इति प्रयोगोऽपि स्यान्न तु तथा
प्रयुज्यते घटो घट इतिवत् नेदमवगम्यते नात्र तादात्म्येनान्योन्याभावः प्रकार एतदभिप्रायेणैव सामाधिकरण्याभावोऽत्र दर्शनं
सामाधिकरण्यं हि अर्थभेदे व्यापकाभावादर्थभेदाभावः किं च तत्त्वप्रमा तादात्म्यविषयिकास्तीति त्वया परो बोधनीयः स च
स च न शक्यते तद्बाधकस्यान्योन्याभावोऽन्योन्याभाव इत्याकारकस्य सामाधिकरण्यव्याप्यस्याभावादिति भावः अथ तर्हि प्रथ
मान्योन्याभावशब्देन रूपान्तरविशिष्टमन्योन्याभावमुद्दिश्य द्वितीयान्योन्याभावशब्देनान्योन्याभावत्वं तद्गतं प्रतिपाद्यमिति नाश
कं परस्मै प्रतिपादनमित्याशंक्याह अन्यथान्योन्याभावे चेव तिष्ठत्येवकः प्रकार इति प्रथम एवकारोऽन्ययोगव्यवच्छेदार्थः
द्वितीयो योगव्यवच्छेदार्थ उद्देश्यतावच्छेदको धर्मः विधेयतावच्छेदकव्याप्यः न दिह स धर्मोऽन्योन्याभावत्वव्याप्योऽन्योन्याभा
वत्वादन्यो नास्ति यश्च वर्तते अभावत्वादिः स न व्याप्यः यश्च वर्तते इदंत्वादिर्विशेषोऽन्योन्याभावत्वव्याप्यस्तदवच्छिन्ने न्योन्या
भावत्वे विधेय्यत्वं तत्र संसर्गाभावत्वाव्याप्तिरित्यन्योन्याभावेषु यावत्सु वर्तमानोऽभ्युपेयः स नास्तीत्यर्थ अपनाशयः

सधर्मोऽन्योन्याभावत्वं वा धर्मी तरं वा नाद्यः स्वविशिष्टे स्ववृत्ते रनंसंभवाद्देशतश्चात्यन्ताप्रव्याप्तेर्ज्ञातस्य विधानायोगाच्च द्वितीये तन्नु किं याव
दभाववृत्ति अभावविशेषवृत्ति वा आद्येऽतिप्रसंगादिति संसर्गाभावस्यापि नाद्यान्याभावत्वप्रसंगादित्यर्थः अन्ते व्यक्तिविशेषेषु वर्त्त
मानमित्यर्थः तत्र यदि अन्योन्याभावात्मके व्यक्तिविशेषे वर्त्तमानमिदं तु तदा तदित्वाश्रये अन्योन्याभावात्वे विधीयमानेऽवशिष्टान्योन्याभा
वानां संसर्गाभावत्वप्रसंग इत्यर्थः तथा चायोगव्यवच्छेदोप्यादरणीय इति भावः मिश्रास्तु न शक्यं प्रमातुमित्यस्य नुद्देश्य विधेयभावस्य प्रका
रभेदनियतत्वादिति हेतुः समानाधिकरण्यं हीत्यस्य च प्रवृत्तिनिमित्ताभेदान्न सामानाधिकरण्यमत एव च नोद्देश्य विधेयभावोपीति
भावः तदभावादेव न तथेति प्रकारभेदाभावान्न सामानाधिकरण्यमुद्देश्य विधेयभावो वेत्यर्थः अभावत्वेति प्रसंगावात् अभावोन्योन्या
भाव इत्यभिधाने संसर्गाभावस्याप्यन्योन्याभावत्वापत्तिः । यद्यपि नीलमुत्पलमित्यभिधानेन नीलमात्रस्योत्पलत्वं प्रसज्यते च न तथा पु
त्पलपदव्यपेक्षं प्रतिनियतप्रयोगेऽप्रसंग एव ननु गुणान्योन्याभावत्वादिनोद्देश्य अन्योन्याभावत्वं विधीयतामित्यत आह विशेषु द्वति
तथा च द्वयान्योन्याभावो न्योभावो न स्यादिति याचक्षते तदस्तु उद्देश्य विधेयभावस्य साद्बोध एवापेदात्वेन एतच्च सर्वत्रेति तथा च संस
र्गाभावो यो न भवत्यभावः सोन्योन्याभावः इत्यत्राप्ययं दोषः प्रसज्येत दभावेप्यक्षतेः नापि सामानाधिकरण्यं प्रसक्त हेतुरित्युक्त

ननु एकस्यान्योन्याभावत्वे प्रमिते ऽन्यस्य संसर्गाभावत्वं कुतः नहि घटो द्रव्यमित्युक्ते पटस्य द्रव्यत्वाभावो ऽवगम्यत इति चेन्न द्रव्यत्वस्य घटलक्षण
नेव त्वेनोक्तावेवैस्यानुगत्यभि त्वं प्रति स हि द्रव्यत्वं कृत्वर्त्तत इत्यजानन् घटे द्रव्यत्ववुद्ध्या न पटे द्रव्यत्वाभावबोधमर्हतीति संसर्गाभावस्य व्यवच्छेदको
धर्मः क इति जिज्ञासासमाने प्रतियोगिगुणान्योन्याभावभिन्नत्वं धर्मः स इत्युच्यते तदा दुःखान्योन्याभावे संसर्गाभावलक्षणमतिव्यापकमेव
स्यादिति तादृश्येणेति यद्रूपान्तरं तेन नु किं लक्ष्यालक्ष्यवृत्ति यथान्योन्याभावे ऽभावत्वं किं वालक्ष्यविशेषवृत्ति यथा गुणान्योन्याभावत्वं यद्वा
वस्तुमात्रवृत्ति पक्षत्रये पि अतिव्याप्तिः स्यात्तद्रूपवत्त्वादित्यर्थः तथा हि परामर्शजन्यं ज्ञानमनुमितिस्तत्र पारमेश्वरपरामर्शजन्य
जन्यत्वात् शाब्दबोधे यातिव्याप्तिस्तद्वारणाय शब्दाजन्यत्वे विशेषणे दत्ते पि शाब्दे ऽतिव्याप्तिः तथा हि शाब्दः शाब्द एवेति शाब्दान्यत्वा
४ श्रयो नित्यं यत्स्य से शाब्दे शाब्दत्वस्य वोद्धुमशक्यत्वात् कुतो शक्यत्वमित्याशंक्याह सामानाधिकरण्यं हीति घटो घट इ
ति प्रतीतिवच्छाब्दः शाब्द इत्यप्रतीतिः अथ रूपान्तरेण शब्दजन्यज्ञानत्वेन शाब्दबोधमुद्दिश्य स शाब्द इति यद्युच्येत तदा
शब्दप्रसक्तो ऽपि शाब्दत्वापत्तिः अथेदं ज्ञानं शाब्दमित्युच्येत तदापि शाब्दलक्षणमिदं शाब्दत्वं तत्र न लक्षणावच्छेदकव्याप्य
मेव भवत्यत्र शाब्दत्वं नास्तीति तन्मतं तत्र नान्यत्रापि तद्रूपसत्त्वे तथा चातिव्याप्तिः स्यान्नवेति भावः तेन लक्ष्यविशेषमात्र
भावान्नात्र नातिव्याप्तिरिति भवदभिमानः सन्न संभवति तथाहि कः शाब्दत्वाश्रयः न तत् प्रत्यक्षादिकं न हि शाब्दत्वाश्रयो नेति त्वयापि स्वी
कृतं यतः शाब्दो ऽपि शाब्दत्वा ४

वृत्तिधर्माभिधाने दोषः अथ गुणत्वं तथा वाच्यं तथा चातिव्याप्तमिदं तथा च शाब्दे शाब्दत्वस्य प्रमातुमशक्यत्वाच्छाब्दभिन्नत्व
मेवास्तीत्यतिव्याप्तिर्दुर्वारा यद्यपि शाब्दे शाब्दत्वस्याशक्यप्रमत्वाच्छाब्दभेदसत्त्वादतिव्याप्तिरित्येव वक्तुमुचितं न त्वन्यत्र
शाब्दभेदसाधनं तथापि शाब्दः शाब्दभिन्नो गुणत्वादिति शाब्दभेदसाधनायेदमुक्तं अथवा यथा शाब्दं इतरस्माद्भिन्नत्वं तदा
त्मनाऽप्रतीयमानत्वान्न इति तदाप्यभिमतं तथा शाब्दादपीति मैवम् स्वस्य सामानाधिकरण्यविरहात् तत्र हेतुमाह रूपभेदाभावा
दिति रूपान्तरमुद्दिश्य तावच्छेदकाभिन्नोपादेयतावच्छेदकाद्भिन्नं तावतैव प्रवृत्तिनिमित्तभेदसिद्धेः तत्र लक्षणतावच्छेदकं यद्दिस्यात्त
दास्यादुक्तदोषः इत्यत्रेष्टरेव वाच्यं तद्यदि खण्डोपाधिरूपं जातिरहितं जातिमति तज्जातिरूपमिति चेन्न हि लक्ष्यतावच्छेदकप्रका
रेण भेदानवगमान्न हि रूपेणातिव्याप्तिः यथा गुणान्यो[illegible]भावस्यान्योन्याभावात्मनोऽन्योन्याभावभेदविरहेऽपि अन्योन्याभा
वत्वेन भेदासिद्धेः संसर्गाभावलक्षणमतिव्याप्तं तथा शाब्दबोधविशेषे तेन रूपेण भेदवत्त्वातिव्याप्तिविरहेऽपि शाब्दत्वरूपेण शाब्दबोधमात्रे
भेदासिद्धावतिव्याप्तिर्दुर्वारेत्याशयः संसर्गाभावलक्षणे अतिव्याप्तिमभिधायाव्याप्तिमाह अपि च अन्योन्याभावस्येति घटे घटान्योन्याभा
वत्वं संसर्गो नास्तीति प्रतीयमानस्य घटान्योन्याभावो नास्तीत्येवमाकारप्रतीतिविषयस्य वेत्यर्थः अन्योन्यप्रतियोगिकत्वादिति ।

यद्यप्यन्योन्याभावएवात्रप्रतियोगीतथापिअन्योन्यविशिष्टस्याभावस्यप्रतियोगिकत्वेविशेषणस्यान्योन्यस्यापिप्रवेशइत्यर्थः ।
प्रतियोगिपदस्यनिरूपकत्वाद्भट्टमतेऽन्योन्यतदभावयोरैकत्वाद्वानाधिकरणत्वप्रतियोगितावच्छेदकाद्यघटत्वादेवेत्यर्थः।तथा
चव्याप्तिरितिभावः। कथंस्यादितिअन्योन्याप्रतियोगिकत्वेनविशेषणेनहि संसर्गाभावोऽन्योन्याभावाद्व्यवच्छिद्यतेसचा
न्योन्याभावादन्योन्याऽन्योन्याभावः सचेदनतिरिक्तोनास्तिकथंव्यवच्छेदः। अथसंसर्गाभावस्वरूपमेवान्योन्याभावव्यवच्छेदइतिचे
दन्योन्याभावसंसर्गाभावोपिस्वरूपमेवेतितत्रैवसंसर्गाभावव्यवहारहेतोप्रतियोगितावच्छेदके अव्याप्तितादवस्थ्यमिति
अथघटत्वादिस्वरूपमन्योन्याप्रतियोगिकमेवनिष्प्रतियोगिकत्वादितिव्याप्तिरितिचेन्नघटाद्यन्योन्याभावसंसर्गव्यतिरेके
पीतियदिस्वरूपेणैवाभावव्यवहारोनिर्दोषस्तदाघटादेरन्योन्याभावः संसर्गाभावश्चनस्याद्विनापिताभ्यःतद्व्यवहारस्तद्वे
रित्यर्थः। अथाभावत्वप्रमात्वबोधेननतयोः सिद्धिस्तदातुल्यमन्योन्याभावस्यसंसर्गाभावेपिअभावत्वप्रमासत्वान्नयथाभा
वाभावस्यातिरिक्तत्वेऽनवस्थास्यादितिनतन्नूस्वीकारस्तत्रहिघटात्यंताभावात्यंताभावात्यंताभावः कृप्तेनैवघटात्यंताभा
वेनाभावत्वप्रकारकप्रकारकप्रमोपपत्तेरतोनानवस्थाद्वितीयस्वभावोऽधिकस्यादेवेतिनदि[illegible]चैवमेवेतिब्रूयेतदान्योन्याभाव

संसर्गाभावस्यान्योन्यप्रतियोगिकस्यासिद्धेर्दुर्वारत्वान्नत्राहे व्याप्तिर्दुर्वारैव घटान्योन्याभावसंसर्गाभावाभावस्य घटान्योन्याभावानतिरि
क्तत्वादनवस्थाभयाभावात् । संसर्गाभावान्योन्याभावयोरभेदेऽन्योन्याभावस्यापि तत्संसर्गाभावे तद्वारणाय विशेषणं व्यर्थविशेषणमे
वेत्याशयेनाहापि चान्योन्यप्रतियोगिक इति सुंदोपसुंदतया यथा हि द्वावादित्यौ सुंदोपसुंदनामानौ परस्परं जघ्नतुस्तथा द्वयो
र्निषेधयोः परस्परविरोधतयान्योन्यत्वमेव स्थिरीकृतं पूर्वं हि सुंदोपसुंदनामानौ दैसोराजानौ नर्मदातीरे तुरभिसंधिविशे स्व
षेणतपश्चरंतौ दृष्ट्वा तयोस्तपोविघाताय काचिद्वारांगना ब्रह्मणा प्रेषिता तां दृष्ट्वा द्वावपि तौ कामुकौ ममेयं ममेयमिति कामसंत त
ले प्तौ परस्परं जघ्नतुरिति पुराणवार्त्ता सत संसर्गाभावत्वेऽन्योन्यप्रतियोगिकोऽभावोऽन्योन्याभाव इत्युद्यतस्यान्योन्यप्रतियोगिकस्याभावस्य न भवतीति
निषेधादन्योन्यप्रतियोगिकाभावाभावप्रतीतेरन्योन्याभिताप्रतीतेरित्यर्थः द्वौ नञौ प्रकृतमर्थं गमयत इति योऽन्यायेन योऽभावाभावोऽन्योन्यस्य सोऽन्योन्या
भावत्वस्याभावो न भवति सोऽन्योन्याश्रयत्वेहि अन्योन्यस्याभाव इति एको नञर्थः नञ्द्वेव चापरः न भवतीत्यस्य हि अभावो भवतीत्यर्थः तथा चान्योन्य
स्याभावाभावोऽन्योन्यमेव घटाभावाभावो हि घट इति सर्वसिद्धमिति भावः अत्र च घटादिविशेषितान्योन्याभावव्यतिरिक्तोऽभावः संसर्गाभा
व इत्युक्ते पटान्योन्याभावेऽतिव्याप्त्यापत्तेर्निर्विशेषणान्योन्यमात्रप्रतियोगिकाभावनिषेधो वाच्य एवं च निर्विशेषणान्योन्यस्मिन् विश्वमेव

प्रविष्टमितिविशिष्यतदभावव्यतिरेकेणकोऽयंतैर्भूतोनान्यपदार्थोनसंभवतिनहिअन्योन्यअन्योन्याभावादतिरिक्तंकोऽप्यन्तर्गतमस्ति
ततःफलितमाहसंसर्गाभावत्वेनविवक्षितस्येतिजगदात्मास्वरूपंयस्यान्योन्यस्यतत्तदात्मत्वंअन्योन्याभावात्मतापिस्यादितित
याचान्योन्याभावभिन्नत्वस्यविशेषणस्यव्यावर्त्याप्रसिद्धिरित्यर्थःव्यर्थेतितथाविशेषणंनेष्टुंहातुंशक्यतेअत्यापत्तेःनाप्युपादातुमव्या न
वर्तकत्वादितिकष्टान्नृशामापन्नोसीत्युपहसति।अत्रमिश्राःअन्योन्यप्रतियोगिकोनभवत्यभावोयःइतिकाकस्यान्योन्यप्रतियोगिकत्वं
धर्मोयस्मिन्नभावेनास्तिससंसर्गाभावइत्येवार्थइतिभवत्यन्योन्याभावव्यवच्छेदस्तस्यान्योन्यप्रतियोगिकत्वादित्यप्रतीयमाना
र्थत्वेऽपिनमदिमहत्कौतुकमिसाधुस्तत्रघटःपटोनेत्यत्रैवसंसर्गाभावाप्रतीतेःअनुयोगिवाचिपदेसप्तम्याअर्पितत्वापेक्षणंनच
तथापिअन्योन्यप्रतियोगिकभिन्नइत्येवप्रतीतिरितिनिषेधनिषेधोनास्तीतिवाच्यंतथात्वेऽन्योन्यसंसर्गाभावौव्याप्तेःयदिचान्यो
न्यप्रतियोगिकइत्यस्यान्योन्याभावइत्यर्थस्तथाचान्योन्याभावोयोनभवत्यंताभाव-संसर्गाभावइत्यर्थःतदाप्यन्योन्याभावा
न्योन्याभाववानित्यर्थनिषेधद्वयघटनापत्तिःनानयोःपरस्परविरुद्धरूपत्वमितिचेन्नहिप्रतियोग्यनुयोगिभावानुपपत्तेः
अभावविरहात्मत्वेपुनःप्रतिप्रतियोगितेतिकुसुमांजलिविरोधःतस्मान्नादात्म्याभावत्वादिरूपंस्वरूपमेवान्योन्याभावइति

सिद्धं द्वयोरेवाभावयोर्भावाभावत्वमिति व्याप्तिः सम्यक् चोक्तं मन्योन्यमिति ननु घटाभावो नेतियथा हि स्तंभः घटाभावभेदाश्रयतया प्रती
यमानो घटाभावविरहरूपः अभावाभावस्यातिरिक्तरूपलाभावात्तथापि न घटात्मा प्रत्यक्षविरोधात्तथा संसर्गाभावो नान्योन्याभाव इत्येव
प्रतीयमानस्य संसर्गाभावस्यापि नान्योन्यात्मकत्वं किं त्वन्योन्याभावानात्मकत्वमेव प्रतीयत इति शंकार्थः मैवमिति यत्र प्रतियोगितद
भावाभ्यामपरापि तृतीया कोटिरस्ति तत्र तथास्तु इतरकोटिकोटिप्रमाणेन विरोधात्तं मैत्विह तथास्तीत्याशयः सिद्धांतिनः ।
अन्योन्याभावान्याभ्यामिति घटान्योन्याभावघटाभ्यामप्यपरापि कोटिः घटाद्यात्मिका यद्यप्यस्ति तथापि संसर्गाभावलक्षण
घटकान्योन्याभावो न घटादिप्रतियोगिघटितः पटान्योन्याभावादावतिव्याप्तेः किं तु निर्विशेषणान्योन्याभावघटित इति
भावः । जगत एवेति तथा च जगन्तू प्रतियोगिकोटिरेव न तु प्रतियोग्यभावाभ्यां भिन्ना तृतीया न तोपि किमित्यत आह नदात्मनो
पीति तथा च संसर्गाभावस्यान्योन्याभावत्वनिषेधेन्योन्यत्वमेव परिशिष्यत इति भावः तत्र जगदात्मा स्वरूपं यस्यान्योन्यस्य
तस्यापि निषिध्यमानत्वे अन्योन्याभावपदेनान्योन्याभावे बोध्यमाने पुनरन्योन्याभावो नेत्यत्र तु स्यान्योन्यनिषेधस्यापि निषे
धे आत्मास्वरूपं यस्यान्योन्यस्य तत्र निषेधात्मकेतस्मिन्नतन्निषेधात्मके तस्मिन्नन्योन्यस्वरूपे जगन्तू प्रवेशाज्जगदात्मत्वं

त्रिविध्यते तस्याचान्योन्याभावं तारतम्या ४
संसर्गाभावस्य स्यादित्यर्थः यद्वा तदात्मनोप्यन्योन्याभावत्मनो पिजगतो निषिध्यमानत्वे तन्निषेधात्मके तस्यान्योन्यात्मकजगतो निषेधरूपान्यो
न्याभावनिषेधात्मके तदात्मनि संसर्गाभावस्वरूपजगत्प्रवेशात् संसर्गाभावस्य जगत्स्वरूपत्वं स्यादित्यर्थः इति विद्यासागरव्याख्यानं हेयं जग
दात्मत्वं स्यादित्यध्याशयपरिशष्टं वैयर्थ्य योगापातात् वस्तुतस्तु ननु नान्योन्यप्रतियोगिकोऽभावो निषिध्यते किंतु संसर्गाभावेऽन्योन्याभावत्वा
दात्यंताभाववानभावः संसर्गाभावः अन्योऽभावात्मको यो न संसर्गाभाव इत्याशंक्याह न तदात्मनोपीति अन्योन्याभावात्मको नेत्यस्या
पि अन्योन्याभावभिन्न इत्यर्थः तस्यापि अन्योन्याभावात्माभावो नेति न त्वासंबंधे अन्योन्याभावाभावात्मेति अर्थवैयर्थ्यवस्य जितत्वात् संसर्गाभा
वः अन्योन्यात्मेति फलितोऽर्थः अन्योन्याभावस्य भावस्य अन्योन्यपर्यवसितत्वात् तथात्मनोऽन्योन्याभावात्मनो निषिध्यमानत्वेऽन्योन्या
भावो नेत्येवं बोध्यमानत्वेन तन्निषेधात्मके तदात्मनि अन्योन्याभावात्मके तदात्मनि अन्योन्याभात्मके जगतः प्रवेशात् दृष्टांतमाह न हि घटः
पटात्मेत्युक्ते विहितोऽज्ञातो ज्ञापितो भवति तस्मादन्योन्याभावाभावात्मा अन्योन्यात्मा संसर्गाभावः सर्वात्मा सर्वाभिन्नः संसर्गाभाव इत्यु
क्ते अन्योन्याभावात्मत्वापि दुर्वारं न स्यापि संदीतः पातित्वादित्येव फक्किकार्थः । इदं तु चिंत्यं नेयदि सर्वमन्योन्यपदार्थस्तदा तस्याभावो
ऽप्रसिद्धः कथं द्वितीयाकोटिता स्यात् एवं अस्तितावदन्योन्याभावः संसर्गाभावश्चेति विभागोऽन्योन्याभावश्च यद्यपि अन्योन्यमध्यनिवि

वृत्तस्तथापि अन्योन्याभावप्रतीतिविषयोपीतिभावः। ननु अन्योन्यस्य न जगत्स्वरूपत्वं किंतु जगद्धर्मत्वं तेन संसर्गाभावे जगद्धर्मत्वे वस्यान्नजग
दात्मतेन्मते न्याशंक्याह नहीति घटः पृथिव्यात्मक इत्युक्ते न घटस्य स्वरूपातिरिक्तं पृथिव्यात्मकत्वं प्रतीयते एवं न दात्मत्वमपि
जगत्स्वरूपमित्यर्थः इति विद्यासागरः नन्वन्योन्याभाव इत्यत्र नान्योन्यप्रतियोगि किंत्वन्योन्यतादात्म्यमेवेति कथमन्योन्यस्व
सा पताप्रापद्यत इति चेन्न स्वरूपातिरिक्तस्य तादात्म्याभावाद्यदि च तादात्म्यमिति तथा च तादात्म्यनिषेधनिषेधस्तादात्म्यमेवे
तिसंसर्गाभावस्य विश्वरूपतानसिद्धेतीतिभावः संसर्गाभावः स्यादिति अन्योन्यप्रतियोगिकत्वाभावादितिभावः अत्रैव दू
षणांतरमाह अपि चैवमितिएवमिति अन्योन्याभावस्य तादात्म्यप्रतियोगित्व इत्यर्थः भाव इति संज्ञामात्रे अन्योन्यप्रतियोगि
कोऽभावोऽतो न तन्निषेधोन्योन्यः किंतु तादात्म्यप्रतियोगिकोऽभाव इत्याशंक्याह न तदात्मनो पि निषेधाभानत्व इति घटः पटा
त्मा न भवतीत्येवमाकारेण अन्योन्याभावस्य प्रतीयमानस्य त्व इत्यक्षरार्थः। तदभावश्चेदन्योन्याभावस्तदा सुंदोपन्यासः ननु — —
संसर्गाभाव इत्युक्ते तद्ध्वंसस्य जगत्परत्वे संसर्गाभावो जगदात्मा एव स्यात् ननु नीलतदात्म्यनिषेधो नान्योन्याभावः किंतु तादात्म्यनि
षेध इत्याशंक्याह यदि चेति व्याचष्टे नेत इत्यत्र तु तादात्म्यप्रतियोगिकोऽभाव इति शंकयैव गतार्थत्वात् तदात्मनोपीति ग्रंथे न चेन्नस्यानि

रासएवंपुनरियंशंकानोदेतीत्यपव्याख्यानमेवनदितिघटो नास्तीत्यवगम्यमानस्यभावस्यनिषेधेघटरूपतामभ्युपगच्छतात्वया कुंभ
स्यकुंभाभावत्वनिषेधेकुंभात्मत्वमभ्युपेयमित्यापादयतिअपिचेतिविसागरस्तत्तुनयुक्तं तथासतिनद्रव्यानंतत्वमेवस्यादितिसुंदर
भावाववोधापत्तेः तृतीयस्यविद्यमानत्वादितिघटः घटान्योन्याभावात्मकघटतादात्म्याभावात्मत्वपरस्यघटतादात्म्यस्यविद्यमानत्वा
दित्यर्थः घटतादात्म्याभावोभावोपिघटएवतथाचघटस्तदन्योन्याभावश्चेतिकोटिद्वयमेवेतिसंकुचितेभा[illegible]वंत्वितिघटाभावत्वाविशेषा
दिति यथा हि घटान्योन्याभावस्यघटतादात्म्याभावस्याभावोघटइतिस्वीक्रियतेद्वितीयकोट्यभावोपपत्त्यै तथास्तंभोपिघटाभा
हि वादन्योघटएवस्यात् घटाभावनिषेधस्यात् घंटाभावनिषेधत्वात्तु तथाघटाभावान्योन्याभावस्यापिघटाभावत्वाविशेषादितिघटान्योन्याभा
वाभावत्वेनैवघटाभावाभावस्यघटत्वं ननुघटाभावान्योन्याभावत्वेनघटेवर्त्तमानस्याभावत्वस्यविशेषाभावात्तर्हिभावाभावत्वघटान्योन्या
भावत्वंघटेवर्त्तमानेघटाभावाभावत्वेनघटत्वसाधकाद्घटान्योन्याभावत्वा[illegible]त्तितोऽभावत्वाद्भिन्नदशाणमित्यर्थः ननुभावाभावत्वेभावत्वसा
धकेस्तम्भकुंभस्यप्रत्यक्षवाधात् किंतुभावसंसर्गाभावत्वंतत्राभावान्योन्याभावेनास्तिविद्यतेचान्योन्याभावसंसर्गाभावइत्याशंक्य
परिहरतिसमवधानाद्यापीतिमितिभामिएषांतुयद्यपसिद्धांतभयाद्घटाभावनिषेधोघटएवेष्यतेतत्राहनद्वेतियन्नादात्म्यं

यदभावस्य निषिध्यते तदात्मत्वमभावप्रतियोगिनो यथा घटाभावो घटो नेत्येवं घटाभावे घटतादात्म्यं निषिध्यमानेन तत्प्र
तियोगिनो घटत्वं तथात्रापि स्तंभः कुंभः स्यात् घटाभावत्वाविशेषात् ननु घटाभावः स्तंभो न भवतीत्यत्र घटाभावे
स्तंभसंसर्गो निषिध्यते घटाभावो घटो नेत्यत्र तु तादात्म्यमित्याशंक्याह विशेषणांतरानिर्वचनादिति तादात्म्याभावात् संसर्गा
भावस्य विशेषांतरानिर्वचनादिति त्वदीयः प्रसंगो मां प्रत्युक्तोपि त्वय्येव निपतेदिति एतदेव स्फुटयति संसर्गेत्यादिना तत्रि
त्वं। स्तंभस्य घटाभावत्वनिषेधेपि न घटत्वविधिर्भूतलादौ घटाभावनिषेधे घटविधिरिति व्यवस्थादर्शनात्वे नीजेज ननु
कोपि विशेषः इत्याशंक्याह विशेषांतरस्येति तथा चान्योन्याभावत्वनिषेधेऽन्योन्याभावविधौ स्तंभस्य घटाभावत्वनिषेधे घटात्मत्वस्यापादिति
त्वापादितः प्रसंगस्तवैवानर्थः स्यात् भूतले घटाभावो नेति घटाभावस्य संसर्गो निषिध्यते नेन तत्र घटविधिः स्यात् स्तंभः कुंभाभावो नेत्यत्र तु २१ त्व २
स्तंभस्य कुंभाभावतादात्म्यनिषेध इति नोक्तदोष इत्याशंक्य परिहारः स एवेति अप्रथमे वहितयो भेदपरीक्षाकाल इति कथमसिद्धेनासि
द्धं साध्यत इति भावः। इति विद्यासागरस्तदपि चाचिंत्यमेव ननु संसर्गाभावान्योन्याभावो विधर्माणौ विलक्षणप्रतीतिगोचरत्वाद्घटपट
१२ सा वदित्यनुमित्यापूर्वनिरस्तविशेषाद्विशेषांतरं — — इत्याशंक्याह तैरेवेति भेदासिद्धेरेव विलक्षणप्रतीतिविषयत्वासिद्धेरित्याशय

इतिविद्यासागरः वस्तुतस्तु प्रागुक्तदोषादेवेत्यर्थः ननु अभावत्वस्याविशेषेपि अन्योन्याभावाभावत्वं अभावेन्योन्याभावत्वं चास्त्येव
विशेषद्वयसार्थक्यमाह विशेषांतरस्येचेति अभावविरहात्मत्वं वस्तुनः प्रतियोगिनैतिहिवदतोन्याय्याचार्यास्यत्वदुक्तमिदं द्वयविशेष
त्वेनभावत्वसाधकत्वेननाभिमतमितिभाव [illegible]मेवस्पष्टयतिप्रतिषेध — — — रुच्यते अभावप्रतियोगिनोः सहावस्थानलक्षणा
रि रिरूपविरोधनिरूपणाशक्तिभावाभावरूपमिरविरो[illegible]योवाचास्तनश्चप्रतियोग्यविशेषितान्योन्याभावस्यसंसर्गाभा
वनिषेधेअन्योन्यमेवस्यादिति अयमाशयः अन्योन्याभावसंसर्गाभावयोर्वैधर्म्यवदनापित्वयाअन्योन्याभावोनभवति
संसर्गाभावस्तद्वैधर्म्यादितिवाच्यं ततश्चान्योन्याभावनिषेधात्मसंसर्गाभावोभवन्नन्योन्यात्मकएवस्यादितिकथंनर्हि
नायमश्वोनेहाश्वइतिप्रतीतिव्यवहारौभेदाभावव्यवहारेसमर्थनीयाविन्यत्राहमभचेतिभेदज्ञानमाविद्यकं नभेदमपेक्षतेव्यवहारो
पिचभेदज्ञानमपेक्षतेनभेदमितिप्रागुक्तं स्मारयति अनिर्वचनीयेतेप्रतीतिव्यवहारयोर्यव[illegible]स्याकथमितियःपर्यनु
योगःसएवबाणास्तद्वारणायमभवज्रोपममभेद्यंवारणंवाणं कवचेतस्तुदाचरतीतिवारवाणायमानाअनिर्वचनीयत्वे
रविजयतइतिसंबंधः अत्रनैयायिकानामनिर्वचनीयतावेदनोद्धारायनानिर्वक्तिमनाद्यवमितितथाचख्यातिविशे

षविषयत्वेऽसत्त्वबाध्यतानुपपत्तिरेवानिर्वचनीयता तथा हि प्रपंचस्य खपुष्पसमत्वे परोक्षतानुपपत्तिः आत्मसमत्वे
बाध्यतानुपपत्तिः तथा च सद्विलक्षणत्वे सत्यसद्विलक्षणत्वमेवानिर्वचनीयतेति पर्यवसितं न च प्रपंचस्य सद्विलक्षणत्वं
नैयायिकसंमतं सत्त्वादेवममनु न तथा श्रुत्या प्रपंचस्य बाधात् न हि असत्त्वे वस्यादन्यथा द्वैतापत्तेरिति चेन्न सत्यमेतत् ।
श किंतु यादृशं समत्वं खपुष्पस्य तन्नास्ति तद्धि न कदापि प्रत्यक्षं भवतीदं तु रूप्यं प्रत्यक्षे नापि विषयीक्रियते यत्र त्वतींद्रियगुरुत्वादौ प्रसक्तं
ख नास्ति तत्रापि गुरुत्वसाधकज्ञानगम्यत्वं खपुष्पाद्वैलक्षण्यमस्त्येव लौकिकप्रमाणविषयत्वमेव तन्नून च नैयायिकानामपीदमेव प्रपंचस्य
सत्त्वमिति वाच्यं तेषामबाध्यमानत्वमस्यापि स्वीकारादिति इदं तु चिंत्यते यथा हि सत्ताविशेषेपि किंचित् प्रत्यक्षं तथा श्रुत्यवगतासत्त्वस्यापि
प्रत्यक्षत्वमस्तु दर्शनस्य दुरपह्नवत्वात् न तु असद्विलक्षणत्वं श्रुतिबाधात् खपुष्पवैलक्षण्यमस्त्येवेति चेन्नाव तापि नासत्त्वहानिरसद्वि
शेषत्वादेव न हि खपुष्पशशशृंगयोरेकाकारा प्रतीतिर्जायते तथा सति शब्दविशेषान्वयव्यतिरेकौ न स्यातां तथा चासत्तोपि
जनकत्वं तथा स्वयमुपपादितमिति तस्मादनिर्वचनीयता क्रियमाणा पातत एव बालकानां संतोषाय इति । नव्यैर्योर्भेदानंगी न
कारे कथं विलक्षणप्रत्यय इत्याशंक्याह तान्नश्वेति प्रतीतिर्नापलप्यते किंतु नस्या विषयो बाध्यस्तथा च सा प्रतीतिर्भ्रमस्त्वैदिहा व

त्वमवादिनिराकरणवदस्माकमपि प्रपंचमध्यपातितदुभयप्रतीत्योर्भ्रमत्वांगीकारः। तस्मादिति अन्योन्याभावश्च संसर्गाभाव
स श्चैतयोर्भेदव्यवस्थितेः सत्यामन्योन्याभावो यो न भवति संसर्गाभाव इति भेदव्यवस्थासिद्धा तीत्यात्माश्रयत्वं। यदि तु संसर्गेतरेतरा
भाववैलक्षण्यं प्रतियोगिवैलक्षण्यादित्युच्यते तदा परस्पराश्रयः अन्योन्याभावसंसर्गाभावयोर्भेदसिद्धावन्योन्यसंसर्गरूपप्र
तियोगिनोर्भेदः सिद्धे भेदस्यान्योन्याभावस्य सिद्धे च प्रतियोगिभेदेऽभावयोर्भेदसिद्धिरित्ययमपि श्लोकस्तत्र शंकयोजनः
स्वाश्रयपदं त्वन्योन्याश्रयेऽपि स्वाश्रयत्वमस्त्येवेत्याशयेन स्मृतित्वसंसर्गस्याभाव एव यस्यां बुद्धौ सानुभूतिरित्युक्ते स्मृतेर्नानुभू
तित्वप्रसंगस्तत्र स्मृतित्वसंसर्गान्योन्याभावस्यैव संसर्गस्यापि भावादित्याशयेनाशंकते अभाव एवेति। एवकारवैयर्थ्यात्तथापि
स्मृतिव्याप्तिनादवस्थाच्चेत्ययमपि विवक्षायुक्ते त्याह एवकारेणेति। भाव इति स्मृतौ स्मृतित्वसंसर्गात्मकोन्योन्याभावप्रति
योग्यप्रसक्तीतिनातिव्याप्तिरित्याशयः। तस्याभावपदेनैव स्मृतित्वसंसर्गस्य निषेधवान्नु स्मृतित्वसंसर्गाभाववानिति हि सेक
वार्थद्वयस्यर्थं तथा च स्मृतित्वसंसर्गान्योन्याभाववति स्मृतित्वसंसर्गस्यान्योन्याभावसत्त्वादतिव्याप्तिरस्त्येव। स्मृतित्वसंसर्गस्य स
मानाधिकरणः स्मृतित्वसंसर्गाभावोऽनुभूतावेव न तु स्मृतावित्याशयेन शंकते भावसमानाधिकरणपनिषेध इति यत्र

स्मृतित्वसंसर्गाभावोऽस्ति न तु स्मृतित्वसंसर्ग इत्युक्त्या स्मृतित्वसंसर्गाभावस्य स्मृतित्वसंसर्गसामानाधिकरण्याभावो व्युत्पत्तिबललभ्यो
यथेह घटाभावोऽस्ति न तु घट इत्यन्यथा पौनरुक्त्याविति उक्ते नैव इति द्वयोर्हि सामानाधिकरण्यं भवति तत्र च स्मृतित्वसंसर्गस्याभावो यत्रोक्तु
क्तेऽर्थतः सिद्धस्तस्य स्मृतित्वसंसर्गस्य सामानाधिकरण्याभावं तथा चाभावपदे नैव तल्लाभ इत्येवकारवैयर्थ्यमित्यर्थः ॥ अ[illegible]थान्योन्याभावभा
वयोः सामानाधिकरण्यदर्शनात् कथमर्थतस्तल्लाभः मैवं भेदनञ्प्रतियोगिनोर्विरोधस्य पूर्वमुक्तत्वात् प्रतियोग्यनुयोगिभावो हि विरोध इति
यदि चार्थसिद्धस्यापि वाचकेन पदेनाभिधानं न पौनरुक्त्यमेवं हि तस्य अथाऽद्वितीयपदादर्थसिद्धस्य जगन्मिथ्यात्वस्य वाचारंभणं विका
र इत्यादिना प्रतिपादनं व्यर्थं स्यादित्याशंक्याह अस्यान्याभावस्य च तस्येति भावसामानाधिकरण्यान्योन्याभावस्येत्यर्थः वस्तुतस्तु
भावसामानाधिकरण्यनिषेधस्यैवात्र निषेधपदं संसर्गाभावपरमभावमात्रपरं वा आद्ये उक्तेनैव नियमस्मिन्न ज्ञाने स्मृतित्वसंस
र्गस्याभावः सत्त्वान्नास्तीति हि तस्यार्थः तत्र च नास्त्येव स्मृतावव्याप्तिरित्येवकारवैयर्थ्यं द्वितीये त्वाह अन्योन्याभावस्य तस्येति भा
एण वसामानाधिकरण्यान्योन्याभावत्वनत्वस्याभावस्येत्यर्थः क्वचित्तु अन्योन्याभावस्य च तस्येति पाठस्तदा स्मृतौ स्मृतित्वसंसर्गान्योन्याभावस्य
भावसामानाधिकरण्यान्योन्याभावस्य च सत्त्वात् भावसमानाधिकरणस्मृतित्वसंसर्गान्योन्याभावस्य कथं भावसामानाधिकरण्याभाव इ

त्वाशंक्याह न हि भावसामानाधिकरण्यं स्मृतेरिति तथासति भावसामानाधिकरण्यस्य स्मृत्योरभेदापत्तौ तयोर्भेदग्राहिप्रमाणविरोधापत्तेः
स्मृतौ स्मृतित्वसामानाधिकरण्यनिषेधे सिद्धे स्मृतित्वसंसर्गभेदस्यापि स्मृतिवृत्तेः स्मृतित्वसामानाधिकरण्यभिन्नस्मृतिवृत्तित्वया सामानाधि
करण्याभाववति स्मरणे स्मृतित्वसंसर्गभेदस्य स्मृतित्वसंसर्गाधिकरणवृत्तित्वाभावस्तदन्योन्याभावात्मकः सिद्ध इति अभावो भावसामा
नाधिकरण्यनिषेधस्यान्योन्याभावात्मनः सत्वादनुभूतित्वापत्तिरित्यर्थः। यद्यपि स्मृतित्वभेदे स्मृतित्वसामानाधिकरण्यान्योन्याभावात्म
कनिषेधनिर्वचनाच्चेदतिव्याप्तिस्तदा स्मृतौ स्मृतावन्योन्याभावसाधनं व्यर्थं भेदनिष्ठसामानाधिकरण्यनिषेधस्य प्रकृतोपयोगित्वात्तस्य च
स्मृताविव भेदेऽपि भेदो न भावसामानाधिकरण्यमिति प्रतीतिसिद्धेस्तथापि भेदाधिकरणे चेद्भावसामानाधिकरण्याभावस्तदा कुत्र न तत्सामाना
धिकरण्यमन्यत्र स्वस्यैवाभावादित्याशयेनानुग्रंथः स्मृतौ स्मृतित्वसामानाधिकरण्यसंसर्गाभावस्तु विद्यमानोऽपि भेदे नास्तीति नोक्तं।
एवमन्योन्याभावमादायातिव्याप्तिरुक्ता अधुनाभावसामानाधिकरण्यस्य संसर्गाभावविवक्षायामप्यतिव्याप्तिमाह स्मृतौ चे
ति तस्यापि सामानाधिकरण्याभावस्यापीत्यर्थः हेतुमाह परस्परप्रतिक्षेपात्मकत्वादिति परस्पराभावात्मकत्वादित्यर्थः
अयं भावः भावसामानाधिकरण्यस्याभावो भावेन सहासामानाधिकरण्यं तद्यथानुभूतौ तथा स्मृतावप्यन्यथानुपप

त्वाभ्युपेयः यतो भावाभावयोः परस्परप्रतिक्षेपात्मकतया स्मृतित्वसंसर्गाभेदे तत्र स्वीकृते स्मृतित्वसंसर्गस्तत्रैवेष्टव्यः अन्यथा पर-
स्परप्रतिक्षेपकार्थिताभंगापत्तेः तथा च स्मृतावप्यभावस्य भावसामानाधिकरण्याभावो दुर्वारः यदि परस्परनिषेधरूपत्वादेकत्र स्मृतावपि सामाना-
धिकरण्यं नास्ति कथं तर्हि तदभावो निरूप्यः क्वचिद्दृष्टदर्शनादित्याशंक्याह न हीति एकत्र वस्त्वादौ रूपरसयोरभावे तत्सामानाधिकरण्याभावो न
हि तस्यात् किं तु स्यादेवेत्यर्थः एकत्रासंभवकारितत्वात् सामानाधिकरण्यनिषेधस्य न हि वह्निगतरूपस्पर्शयोरेकाधिकरण्यं क्वापि संभावि-
तमित्यर्थः। न सिद्ध्येदिति तथा च यत्तयोरुक्तं सामानाधिकरण्याभावोऽभ्युपगन्तव्य इति तन्न युक्तमिति भावः यद्वा परस्परप्रतिक्षे-
पत्वेन भावाभावत्वं प्रयोजकं किं तु संसर्गाभावत्वे तत्प्रतियोगित्वं अतोऽन्योन्याभावतत्प्रतियोगिनोः परस्परप्रतिक्षेपत्वमसि-
द्धमिति। तथाविधयोः परस्परप्रतिक्षेपिणोरात्मनोरन्योन्याभावस्य प्रतियोगिनोः ते रुचिः स्वपक्षरागएव प्रमाणं नान्यदित्य-
र्थः। ननु घटान्योन्याभावतत्प्रतियोगिनोभावतदभावपदसंकेतो नास्ति किं तु लोकव्यवहारसिद्धः प्रायस्तु लोकव्यवहा-
रादेव संकेतसिद्धिश्चेत्तर्हि तत एव परस्परप्रतिक्षेपताप्यंगीकार्या घटात्यन्ताभावघटयोरिवेति भावः संसर्गान्योन्याभावयोर्नाव्यापि सि-
द्धाभेद इति भावः। ननु समानाधिकरणयोरपि रूपरसयोर्यः सामानाधिकरण्यं तत्र परस्परप्रतिक्षेपानात्मत्वं प्रतियोजकं भावाभावयोः

152

परस्परप्रतिक्षेपात्मत्वे कथमसामानाधिकरण्यं तदभावेन योरेकैकाभावे अत्वेति निभावाभावयोरित्यर्थः तथा च स्मृतित्वतदन्योन्याभा
वयोरनुभूतावसामानाधिकरण्यभासो परस्परप्रतिक्षेपानात्मनोरेकस्याभावात् स्मृतौ नुस्मृतित्वतदन्योन्याभावयोः परस्परप्रतिक्षेप
कत्वेनास्ति न वा एकस्याभावः अतः परस्परप्रतिक्षेपानात्मकत्वेन सामानाधिकरण्ये मत्र भविष्यतीति भावः तथा त्वस्य परस्परप्रतिक्षे
पानात्मकत्वस्येत्यर्थः नह्यतिरेको व्यापकीभूतस्य व्यतिरेकः परस्परप्रतिक्षेपात्मकत्वं प्रकृते चासामानाधिकरण्यप्रयोजकस्ये
वसत्वेन रूपरसयोरसामानाधिकरण्यापत्तिः तद्व्यतिरेकस्य तद्व्यतिरेकप्रयोजकत्वे भावाभावयोः परस्परप्रतिक्षेपात्मनोः सामा
नाधिकरण्यापत्तिः अत्र यदि परस्परप्रतिक्षेपानात्मत्वमात्रेण रूपरसयोः सामानाधिकरण्यं तदा पृथिव्यामपि तत्स्यादित्यपव्याख्या
नं एकैकविरुद्ध सहितस्यैव तत्प्रयोजकत्वात् न हि एकैकविरह एव तत्प्रयोजकः स्वत्वं परस्परप्रतिक्षेपानात्मकत्वेन निवाच्यं
संयोगतदभावयोरपि तदापत्तेः सत्यपि विशेष्यके यं तद्वारणमिति चेन्न यत्र नसति यदुपलब्धिर्न स एव परस्परप्रतिक्षेपार्थः असा
मानाधिकरण्यमेवेति स्मृतौ नु सामानाधिकरण्यविरहादिति सामानाधिकरण्यविरह उपपादित एवेति भावः अभावान्तर
सान्योन्याभावेन अत्यन्ताभावस्य सामानाधिकरण्याभावप्रसक्तयोस्तिनान्योन्याभावस्य तस्य भावसामानाधिकरण्ये नैव
सामानाधिकरण्यमपीति नातिव्याप्तिरिति भावः एवकार [illegible] हारो हि वैलक्षण्यस्य विधमानस्यैव बोधको न चैतत् [illegible] नचैवैलक्षण्यमित्यपि [illegible]

प्रमेयादित्याशंकने सामानाधिकरण्याभावप्रत्ययेनेति । अर्थस्य सामानाधिकरण्याभावात्मनस्तत्रापि सत्त्वेन तत्
प्रत्ययस्य प्रसंगात् वस्तुतस्तु सामानाधिकरण्याभावो प्युक्तरीत्या प्रतीयत एव न च न्यायकुशलैरेव प्रतीयते न तु लौकिकैरि
त्येतावता कश्चिद्विशेषः (इत्युक्तावितिः) सामानाधिकरण्याभावे त्वत्र यो भावप्रत्ययः तस्य यो ऽर्थः स एव भावस्य वि
शेषक इत्यपि व्याचक्षते । इत्युक्ताविति-अन्योन्याभावव्यतिरिक्तः स्मृतित्वाभावो यत्र ज्ञाने सानुभूतिरिति लक्षणवाक्या
र्थ इत्याशयः स्मृतिव्यतिरेकैकपक्षो ऽप्येव इति यत् किंचिदन्योन्याभावव्यतिरिक्तत्वं सकलान्योन्याभावव्यतिरिक्तत्वं
वेत्यादिविकल्पकवलितमित्यर्थः । अभावांशे नैवमनुभूतिलक्षणं दूषयति नापीति स्मृतित्वं प्रतियोगि यस्य यत् स्वरूपं स्मृतित्वज्ञानेन
ज्ञायत इति यावत् तादृशत्वेन प्रतियोगिस्मृतित्वकालीनं धर्मितज्ज्ञानं वा स च अभावमात्रव्यवहारहेतुत्वेनेत्यर्थः । इहेति अनुभूतिलक्षणे
पूर्वक एवेति स्मृतित्वस्य संसर्गितया निषेधः पूर्वकः संसर्गाभाव एव नान्योन्याभावः अनुभूतिः स्मृतित्वसंसर्गवती ज्ञानत्वात् स्मृतिवत्त्वसं रि
भवं संभाव्यो हि संसर्गाभावस्तु न तादात्म्यत्वेन धर्मिस्वरूपत्वेन निषेध इत्यनुषंगः इहानुभूतिलक्षणे व्यक्तिमिति सूक्ष्मस्तथा चाविद्यमानं
न लक्षणं भवतीति न स्मृतित्वसंसर्गो ऽनुभूतौ अनुमानं तु गृहीतग्राहित्वात् प्यापाधिग्रस्तं न च तत्रापि धारावाहिकेन व्याप्तिस्तत्रापि

153

कालस्याग्रहीतस्य प्रतीतेः । करणत्वादावितिआदिपदेन कर्तृत्वस्य परिग्रहः संसर्गितया लक्षितस्यैवेति स्मृतित्वं न स्मृतिरित्यान्योन्या
भावमादाय स्मृतावतिव्याप्तिः न हि स्मृतित्वं संसर्गित्वेन लक्षितं न तु न सहितं तस्यैवेति संसर्गित्वसहितं स्मृतित्वं न स्मृतित्वमिति भेदप्रती
तेः तृतीयस्त्विति संसर्गत्व करणकत्वं तृ कर्तृकं वा स्मृतित्वाभावो नानुभूतेर्लक्षणम् असंभवापत्तेरित्यर्थः अत्यंतनिषेधस्यात्यंताभावस्य
ननु भासत्वत्यंताभावो जन्यः ध्वंसस्तु संसर्गिताजन्यो भविष्यतीत्याशंक्याह तस्य चात्यंताभावस्य चानुभूतिलक्षणत्वात् उदाहृत्य
ननु तदुदाहरणं लक्षणमित्यर्थः अयमाशयः स्मृतित्वध्वंसस्य प्रागभावस्य चाप्रसिद्धस्य लक्षणत्वं अत्यंताभावस्तु भवति ल
क्षणं परं तु न जन्योऽन्तः तु न रां स्मृतित्वसंसर्गो जन्य इति प्रकारवाचिनी तृतीया शिष्यं पुत्रेण पश्यतीत्यत्रेव इत्थंभूतलक्षणे तृतीया
तेन स्मृतित्वस्य संसर्गिताप्रकारेण यो निषेधः स संसर्गाभावः प्रतीयते हि घटो नेह संसृष्ट इति तादात्म्याभावे तु नायं प्रकारः पटसं
सृष्टे पि घटे नायं पट इत्येवं प्रतीतेरिति । अधिकस्येति संसर्गितां विहाय अधिकः प्रकारशब्दार्थो नास्तीत्यर्थः । तथा च संसर्गिता प्रा
तिपदिकार्थ इयं तृतीया न स्यात् अपि यदि संसर्गितेत्यर्थः स्यात्तदा पौनरुक्त्यं प्रातिपदिकार्थस्य चाभिधाने तृतीया न स्यात् स्यात् प्रथमैव यदि अ
चाधिकार्थोऽस्ति तर्हि कथ्यतामित्याशयः ननु तानि द्वैधं गुणप्रधानभूतानीति शास्त्रे द्विविधं त्रिविधमित्यत्र च लोके प्रकारशब्दार्थः

प्रसिद्ध एवेति तेन प्रकार एव पदार्थस्य प्रकार एवेति निर्वचनं स्यादिति संकते प्रकारः प्रकार एवेति संदिग्धः पदार्थो लक्षणात्तः सिद्धतीत्यभ्युप
गमात् संदिग्धाविदित प्रकार पदार्थस्य तल्लक्षणमभिधानीयं स्यादन्यथा सजातीयविजातीयव्यवच्छेदकतया — पदार्थाश्चराक्
सं तेरर्शयितुमित्याशयेनाह अविदितपदार्थस्येति अविदितं नानिश्चितं लक्षणेन तस्य संदिग्धप्रकार पदार्थस्य चेत्यर्थः प्रकारस्य लक्षण
प्रश्ने न तु स्वरूपाभिधानमर्थात् तद्ग्रस्तमिति भावः ननु लक्षणपदेनैव लक्षणान सिद्धो व्यर्थं लक्षणाभिधानमित्याशंक्याह अन्यथेति स्वरूपक
थनेनैव लक्षणमुक्तमिति भावो व्यन्यथेत्यनेनैव निरस्तः न वा स्वरूपकथनेनैव लक्षणकथनं तस्य लक्षणस्य स्वरूपतोऽ
न्यत्वात् स्वरूपस्य विनापि कथनं पूर्वमपि ज्ञातत्वाच्चेति सर्वत्र लक्षणाभिधाने योपादितं रीतिमन्यत्र प्रसारयति को घट इ
ति प्रश्नस्य घट इत्येवोत्तरं अन्यथा अज्ञान प्रश्नः को विदारभावच इतिवत् प्रश्नाननुगुणं स्यादिति । अनिष्टान्तरमाह प्रकार पदार्थ इति
निर्वृतीचरितार्थः सुखीवानविस्मनुपपन्नं नहीदं दोषलक्षणप्रश्नः किंतु दोषस्वरूपप्रश्नस्तत्र तन्मध्ये दोषस्वरूपानभिधाने हेतु
तः रेव नोपपादिस्यादिति दोषस्वरूपाभिधानमावश्यकं दोष एवेत्यनेनैव स्वरूपमुक्तमिति चेन्न को दोष इति दोषविशेषस्य प्रश्ने
सामान्येनोत्तरासंभवादिति चेन्नहीहापि कः प्रकार पदार्थ इति विशेषप्रश्ने प्रकार एव प्रकार इति नोत्तरं विशेषानभिधानादिति

भावः स्मृतिलक्षणरहितत्वस्येति तृतीयविकल्पेऽपि स्मृतित्वस्य चातिरिक्तपदोक्तं दूषणमिति दिगिति स्मृतित्वेनेति स्मृतेः स्मृतित्व
मेकं लक्षणं तदपेक्षया लक्षणान्तरे गृहीतग्रहणत्वादिकं तत्रापि रहितशब्देनाभावमात्रविवक्षायामन्योन्याभावमादाय संसर्गाभावविवक्षा
यामपि संसर्गान्योन्याभावमादाय स्मृतावतिव्याप्तिः किंचित्तु स्मृतिलक्षणरहितत्वं स्मृत्यन्तरेऽतिव्याप्तं यावत् स्मृतिलक्षणरहितत्वस्या
स्मादृशां तु ज्ञानत्वाभावः स्मृतिलक्षणं तदासि निरूपणक्षेत लक्षणं दुष्टमित्याह गृहीतस्येति ज्ञानपदं संस्कारध्वंसादिवारणाय यथा
रावाहिज्ञानद्युत्पन्नलक्षणमनुवादादतिव्याप्तिरेव दोषः भट्टमते धारावाहिनि कालकलनामगृहीतामपि गृह्णातीदमपि लक्षणं
चक्षुरादिसापेक्षेऽप्रमारूपेऽतिव्याप्तमिति विषयनियम इति ज्ञानापेक्षत्वलिंगिकज्ञानेपीत्यतः समानविषयेति तथापि पौरुषे
यवाक्यजे शाब्दज्ञानेऽतिव्याप्तिरिति विषयनियम इति न तु वाक्यस्याऽपत्यार्थमेव समानविषयकं ज्ञानमपेक्षते न विषयनि
व यमात्रापौरुषेयवाक्यजज्ञानस्य स्वत एव विषयनियमोपपत्तेः विषयपदस्य सामान्यवाचित्वेनासंभवः स्यादन्यविषय
नियमेन तथात्वाभावादिति स्वपदं स्मृतेः पूर्वानुभवजसंस्कारजन्यतया पूर्वानुभूतविषयत्वे। समुदायस्य जनकज्ञान
विषयताप्रयुक्तविषयताकत्वमिति निष्कृष्टार्थः न चैवं धारावाहिन्यतिव्याप्तिः पूर्वज्ञाने विषयतानियामकत्वेनोत्तर

तौ ज्ञानविषयतानियमोपपत्तेरिति भावः तत्रा(जनकज्ञानविषयाप्रयुक्त)भागस्येति तत्राभागो विषयो यस्य तत्त्वं ज्ञानस्ये
त्यर्थः भिन्नविषयत्वव्यवस्थितेर्यदि व्यवस्थितविषयतानांगीकार्य्या तदा सद्दत्वे शेषाणुऽप्यनुभवत्वस्य व्याप्यमिति संशे च स्मृति
त्वस्यापत्तेरिति विशिष्टाभेदः । शालिकानाथोक्तं स्मृतिलक्षणमनुपद्दूषयति असंभवादिति आत्ममनसोरपि तत्का
सर्व रणत्वात्तु न किंचिदेकमेकस्मात्सामग्र्याः संभवइति हि न्यायः मात्रपदानुपादाने तु प्रत्यभिज्ञायामतिव्याप्तिरिति भा
वः । सोऽहमिति प्रत्यभिज्ञानेऽपि अप्रापत्तेः स्मृतित्वस्येति शेषः आत्ममनोयोगस्येति न त्वात्मप्रत्यभिज्ञायां मनसइंद्रि
यत्वेन कारणत्वादसाधारण्यं तथात्मनश्च प्रत्यक्षाविशेषेतरात्मत्वेनासाधारण्यमिति स्वरसादाह कार्य्यैक्येति स्मृ
तिगतानुगतरूपापरिज्ञाने संस्कारकारकत्वं न शक्यमधिगंतुं तदधिगमे च तत्रैव लाघवेन मत्त्वव्यवहितप्रतिपत्तिकत्वा ए
दिसप्तव्याप्त्यान्तर्धूमालोकादावनुगतरूपाभावेपि व्यवहारैः कारणताग्रहात्तु व्यवहितप्रतिपत्तिकेपि संस्कारजन्य
त्वेन लक्षणत्वधर्मस्याभावसाधैर्मेवाधात्व । अत्राहुः संस्कारासाधारणकारणकत्वमित्यत्रासाधारणत्वं यदि त
दितराजनकत्वे सति तज्जनकत्वं तदाऽसंभवः संस्कारेण स्वध्वंसस्यापि जननात् संस्कारविषयकज्ञानसहि

155

नेन संस्कारेण संस्कारस्यापि जननादिति तु न युक्तं संस्कारज्ञानस्यैव तत्र हेतुत्वं सत्यपि संस्कारे तज्ज्ञानानुत्संस्कारोत्
पत्तेर्व्यभिचारात् सामान्यप्रत्यासत्तिविधया प्रत्यक्षस्यापि जनकत्वेन तदितराजनकत्वासिद्धेः स्मृतित्वावच्छिन्नका
र्य्यताप्रतियोगिककारणताश्रयत्वं वा स्मृतिमात्रवृत्तिधर्मावच्छिन्नकार्य्यकं ताप्रतियोगिककारणताश्रयत्वमसा
धारणत्वं वाच्यं तत्तन्मात्रपदं व्यर्थं स्मृतित्वाद्यसिद्धौ तदसिद्धेः सिद्धौ च तद्विहाय तदधीनस्य ज्ञानस्य संस्कारमात्रजन्य
त्वस्य लक्षणत्वेनाभिधानं तु दुर्बुद्धितामेवापादयति आवश्यकत्वद्बुद्धित एव प्रमाणलक्षणनिर्वचनसिद्धेरिति । ॥ ।
पूर्वविज्ञानविषयं विज्ञानं स्मृतिरुच्यत इति स्मृत्याधिकरणीयं वार्त्तिकं दूषयितुं केनचित् स्मृतिलक्षणमुक्तं तद्विधर्म्यपि वार्थ
सिद्धमनुभवलक्षणं तदनुवदति येन भ्रान्ते नेति पूर्वस्य ज्ञानतायाः प्राग्ज्ञाविनो ज्ञानताख्यधर्मस्य ज्ञाने कारणीभूतं यस्मात्कर्माज्ज्ञायते तत्तनु
पूर्वविज्ञानं ज्ञानताख्यो धर्मस्तद्विषयकं ज्ञानं स्मृतिरित्यर्थः तथा च ज्ञानताविषयकं ज्ञानं स्मृतिरित्यर्थः ततश्चार्थसिद्धमिदं ज्ञानता
ख्यधर्माविषयकं ज्ञानमनुभव इति तत्पोर्निष्कृष्टमर्थमाह येनेति भट्टमते ज्ञानताया ज्ञातार्थेन सहाभेद एव संबंध इत्याशयेनाह ज्ञा
तात्मकः ज्ञानत्वेन तथा ज्ञातताख्यिकाज्ञानताविशिष्टो ह्यर्थः स्मृतौ भासत इति ज्ञाततानिका स्मृतिरित्यर्थः ज्ञातं घटो ज्ञानो व्यवह्रिय नाभ जेति

ज्ञातता ३ ग

र्थो इति १

माणत्वात् ज्ञातस्य तेष्यवहरिष्यमाणत्वादित्येवं प्रतिसंधानजन्यानुमितावादिपदग्राह्यशाब्दादावित्यर्थः। स्मृतिलक्षणानुपप
त्तिमुक्तामुपसंहरति तत श्चेति विषयतः स्मृतिविवेचनमशक्यमित्युत्तरेणान्वयः स्मृते र्विवेचनमनुभवात् गृहीतविषयत्वेन विवेचनमेकं
ज्ञाततताविषयत्वेन चापरं तत्र द्वितीये ऽतिव्याप्तिं स्मारयति अंतत इति एतज्ज्ञानं स्मृतिं विविचनमशक्यमित्युत्तरेणान्वयः स्मृते र्वि
(वेचनमनुभवात् गृहीतविषयत्वेन विवेचनमेकं ज्ञाततताविषयत्वेन चापर) एतल्लक्षणवत्वप्रतिपादकं वाक्यस्वार्थमगोचर
एतल्लक्षणवत्तादित्येतल्लक्षणवत्वप्रतिपादकं वाक्यं स्वार्थमगोचरीकृत्य कथं नु प्रतिपादयितुमीष्टे ततश्च तद्वाक्यजन्यानुभवे
तिव्याप्तिः ननु वाक्यजन्यं ज्ञानं लक्षणमेव स्वार्थमगोचरयति न तु तमर्थमित्यत आह हन्त इति लक्षणविशेषणतया ऽर्थमपि गोचर
क्रतुभ यत्येवेति भावः तत्वं कार्य्यगतं रूपं तत् कारणानामिन्द्रियसन्निकर्षपरामर्शपदज्ञानरूपाणामवगमात् प्रागवगतं न वा अन्ते कारणमेतत्
वदुरवधारणं तथा तदिति साधारणत्वं च अन्वयेन स्यकार्य्यस्य नत्वं त्रिलेतदधीनज्ञानलक्षणाव्याप्तिः सम्भवाप्तित्वे तदेवलक्षण
मस्तु नेतरदित्याशयवानाह इति। प्रतिभायामतिव्याप्तिमाह तथाहीति परिणतनालफलपतनकाले यदा काकोपि तत्रैव तमाश्रयते त
दानतत्र काकसंयोगस्यान्वयव्यतिरेकविरहितः समकालतया पूर्ववर्त्तिताविरहिणश्चाकारणत्वेन तयाहृत्य काकयोगत्त इति

156

तथा देवा ज्ञातं विज्ञातं या वृश्चिककाकाना लीयसमभिनिकाकनालीयमित्युच्यते तत्र भादौ शिथलवंधे खडगेग्रीवाकंडूयनाय च्छागी
चेद्ग्रीवां प्रसारयति तदा ग्रीवाच्छेदो भवतीति तथा भूतो यो न्यायः सोऽजाकृपाणीयन्यायः स काकतालीयन्यायसमोपि अर्थपरिच्छेदकज्ञान
श्वो स्यच्छेदकत्वेउगताम्प्याधिक्येन दृष्टांतितः एतेन मेभ्रान्तागमिष्यतीति कल्पकावचः शालवाहनो नाम राजा श्रृंगाररसरसीत्तीरे दृश्या
लीलावत्याः सहानि मधुरं संगीतकमनुतिष्ठतीत्युदाहरणमित्याहृदृश्यंते दूति। वक्तुमिति यद्यपि वक्तुः स्ववाक्यजन्यं ज्ञानं नास्ति तथा
पि वाक्यप्रयोगमूलभूतं ज्ञानमस्ति वक्तृवाक्यमपि स्वस्य बोधकं न चाकांक्षाविरहः आनुपूर्वीविशेषस्य निराकांक्षत्वात् श्रोतरि तु ज्ञा त
रणजन्यसंसर्गावगमप्रागभावरूपा तन्नाकांक्षा तस्याः स्वरूपसत्याः शाब्दबोधहेतुत्वात् आनुपूर्वीविशेषरूपायास्तु निश्चिता
या एव हेतुत्वं दशरामशराइत्यादितन्न हि छेदज्ञाने सत्येव दशसेत्याविशिष्टरामशरज्ञाना नोत्पन्नैः अत एव मीमांसकानामपि स्यानेन
प्रकरणकल्पनेति सिद्धांतदृत्याशयेन वा वक्तुरित्युक्तिः वक्तुः प्रयोगकारणीभूतं यज्ज्ञानं तन्निश्चयरूपमिंद्रियसन्निकर्षादिरूप
प्रमाणजन्यत्वात् तत श्रोतुरपि आप्तोक्तत्वसंशये न तदाहितं संशय एव तथा च न तत्पादे निरन्तत्वावच्छेदद्वृत्यभिमानः ननु वक्तु ३
र्निश्चयाभावे कथं तथाभिवरनात्मको व्यवहार इत्याशंकामपनुदति एकतरेति वराटकापंचसंख्यावच्छिन्नानवेति संशयेसत्यपि

पंचेतिशब्दप्रयोगात्मको व्यवहारः कृष्यादिप्रवृत्त्यात्मकव्यवहारवदुपपन्न इत्यर्थः आहाररूपेति आहरणमाहार उत्प्रेक्षाद्
ते योनिश्चयः इत्यर्थः प्रवृत्तेः स्वविषयनिश्चयजन्यत्वेन तत्र फलावश्यकत्वसंदेहे सत्साहार्य्यफलनिर्णयो वृत्तत एवेत्यर्थः ।
प्रवृत्तेः स्वविषयनिश्चयजन्यत्वव्याप्तिरस्फलनान्तरभावे चाव्यवहार एव नोपपद्यत इति व्यवहारमूलतया पंचसंख्यावच्छिन्न
कोटिनिश्चय एव स्यादेवमन्यकोटावप्यविशेषात्तेन पंचैवं नैवेति कोटिद्वयसमुच्चयो विरुद्ध आपद्येत तथा कृष्यादाव
पीत्यर्थः । मैथिलानुसरहकारि संपन्नावश्यं कृषेः फलमिति ज्ञानमाहारः अन्यथेति एककोटिज्ञानस्यापि संशयत्वे
ऽन्योपि संशयः कोटिद्वयनिश्चयसमुदायात्मकः स्यादित्यर्थः यद्वा यदि संशयोपि निश्चयव्यवहारजनकः स्यात्तदा कोटि
द्वयनिश्चयात्मक एव स्यादित्यर्थः इति व्याचक्षते । मध्येध्यक्षादीति अध्यक्षादिमध्ये मध्येध्यक्षादि पारेमध्ये षष्ठ्या वेति
स्मरणात् इंद्रियसंयोगाजन्यत्वान्नाध्यक्षं तदविनाभूतलिंगाजन्यत्वान्नानुमानं पंचवराटका इति शब्दस्यादर्शनान्ना
गमः असादृश्यविषयत्वान्नोपमानं करतले पंचकपर्दकव्यतिरेके नानुपपत्तिव्यतिरेकाभावार्थापत्तिर्भावविषय
त्वान्नानुपलब्धिरित्यर्थः । अव्यभिचारीति इदं तु ज्ञानं व्यभिचारिलिंगधीजन्यमित्याशयः तत्र परवैयर्थ्यान्न च अव्यभि

चारिन्निंगेंद्रियादिकरणकानुभवस्यापि नैतद्विषयत्वं गंधप्रागभावावच्छिन्नपृथिवीपदकानुमितौ वह्निगुंजापुंजविशेषकज्ञानस्य
त्वगिंद्रियकरणस्य दृष्टमिति वाच्यं दोषापेतकस्य करणस्यैव तदर्थत्वात् व्यर्थं चेंद्रियं विशेषणं काकतालीयसंवादज्ञानस्य वारयितुम
शक्यत्वादित्याह काकतालीयेति पंचवराटकाइति ज्ञाने व्यभिचारिभिः शुक्तिरजतादिप्रत्ययादिभिः साधारण्या कारणस्य साम
ग्रीतज्जन्यभास्थानुं न इशिषेशक्तोभवसीत्यर्थः व्यभिचारिप्रत्ययस्य साधारणी कारणसामग्री साकल्यं यस्य कारणस्य तज्जन्यमि
तिवार्थः सामग्र्या अकारणत्वात् व्यभिचारिणो रजतादिप्रत्ययस्यापि यथार्थस्यात् कारणस्य व्यभिचारिमात्रस्याव्यभिचारात्
एतेन काकतालीयसंवादज्ञाने न व्यभिचारिकरणजन्यमित्युक्तं । नहीतिज्ञानस्य स्वरूपं नादेतुकं कादाचित्कत्वाभावत्वात् नापि
तु तद्गतं यथार्थत्वं निर्हेतुकं तथा सति नियामकाभावेन भ्रांतावपि यथार्थत्वापातात् तस्मात् परिशेषाद्व्यभिचारिकरणजन्यत्वमित्याहा
वश्यमिति अस्य काकतालीयसंवादज्ञानस्येत्यर्थः तथा च विमतमव्यभिचारिकरणकं व्यभिचारिसाधारणकारणाजन्यानीश्वरज्ञा
नत्वात् संप्रतिपन्नवदित्युक्तः अव्यभिचारीत्यस्य व्याख्यानं नियतमिति अव्यभिचारिकरणमनुपलब्धिबाधितमित्याशयेन पृच्छति
किंतदिति । आत्मनैवेति तथा च प्रमाणत्वादायातिनानुपलब्ध्या बाधमर्हति नममात्र निर्विकल्पमस्ति अनिर्विकल्पाबाधादित्वादित्याशयः

तथापि स्वपक्षसिद्धिं परपक्षं च प्रतिषेधता निरूपणीयमेव प्रमाणं सर्वविधिनिषेधानां प्रमाणाधीनत्वात् ननु किमिदमुच्यते स्वात्म
निवेश्याशंक्याह तयेनेत्यपव्याख्यानं विद्यासागरस्य येनेत्यस्य भवतेत्यर्थ के नैयायिकस्य प्रत्युत्तरावगतेः स्वस्य प्रत्युत्तर प्राप्तेः न च
त्वदभिमतप्रमाणबलेन त्वं तु परिगणितप्रमाणाविशिष्टं तं भावनीयमन्यथा प्रमातिरेकापातात् प्रमात्वं चेत् नु प्रमाणलक्षणेन
व्यावर्त्यमन्यथा निव्याप्त्यापत्तेरिति भावः इत्यपि व्याख्यानं युक्तं मम प्रमायाः प्रमाणानामपरिगणनाभावेन स्वप्रमप्र
माणेनाप्युपपत्तेरित्यद्वैतप्रश्नखंडनयुक्तितएवोत्तरदानाद्दोत्तरणीयमित्येवमेव सर्वोपपत्तेः अस्याप्रमात्वं तु विषया
बाधात्संभवतीति न वा स्मृत्यादिवत् प्रमाणविरुद्धवद्विरुद्धादिकं नैयायिकादीनप्रत्येवाभियोगोयं सर्वथाप्यपसिद्धान्तापाता
दिति। एवं लिंगाभासादिजा तमितिः आदिपदेनार्थापत्त्याभासपरिग्रहः ननु लिंगोपहितस्य लैंगिकस्य भानांगीकारे
तादृशानुमितिरप्रमैवेत्याशंक्याह देवगत्यादिति स्थिते लिंगलिंगिनी यस्मिन् लिंगांतरविरहिणपि केवललिंगिमस्ये
वयानुमितिर्निर्विषया बाधात् न प्रमा न त्वेत्यर्थः। तद्वति लिंगि स्वरूपे लिंगाभासवद्विशेष्यकलिंगि स्वरूप इत्यर्थः तथा वि
धमितिर्लिंगविशिष्टं वह्निमंतमितीत्यर्थः। लिंगाविषयिका या अपि तस्या वास्तववह्निमद्विषयत्वोपपादकतया पक्षस्तु लिंगवत्त्वाभि

158

धाने आभासकरणकत्वादिति आभासीभूतलिंगजन्यज्ञानविषयः पर्वतनिष्ठवह्निरन्यः आभासजज्ञानविषयीयत्वात् प्रत्यक्ष
भ्रांतिगोचरवह्निवत् अन्यथा अकारणकार्योत्पादापत्तेरिति सङ्गतार्थः। न चैवं धूमजन्यज्ञानविषयस्यापि तथात्वापत्तिरत्र
कारणबाधस्यैव तत्र बाधकाभावादिति विशेषस्याप्यत्रापीत्यभ्युपेत्यवादः रोषादेवारोपः दोषजनुसाध्याभाववति लिंगज्ञा
नं चेह न दस्ति तआ[illegible]यमात्रे तिअर्थं भावः व्यापकत्वविच्छेदरूपेण व्यापकभानस्वीकाराद्वह्नित्वेन वह्न्यंतरस्या
पिज्ञानं प्रमैव स्यात्तद्वह्नित्वेन हि तद्रहितेतत्ज्ञानं भ्रमः अनुमितौ नु वह्नित्वेनैव भानमिति यद्वा यथा प्रमाकारण
बाधाद्वह्न्यंतरमेव तत्र विषय इत्युच्यते तथा वह्नित्वप्रकारकतन्मात्रविषयकानुमितिकारणबाधोपि तन्मात्रवि
षयत्वे स्याद्व्यापकतावच्छेदकरूपेण गृहीतस्य तथैव भानादन्यथा त्विहस्त व्यापित्वेनापि भानं स्यात्। यत्तु तथापि व
ह्निमत्त्वं तत्राबाधितमेवेति तत्त्वविशेषस्येति प्रत्युतानुमितवह्नेः प्रत्यभिज्ञानाद्व्यक्तिरेव विषयत्वेपि प्रमाण्यमेवेति भावइति व्याख्यानं तत्र युक्तं २
विषयत्वस्योपपत्तिकस्य तदभिहितं तथा वह्निमत्त्वमात्रं तत्राबाधितमित्युक्तिनिरुपपत्तिका बाधिका अनुमितवह्नेः प्रत्यभिज्ञानं
भ्रम इति च तेनापि शक्यं वक्तुं। अथ वह्न्यनुमितिसामान्यसामग्री आभासीभूतज्ञानसामग्रीसहिता तत्रानवस्थितविषयामेवानुमितिं

जनयतिवह्निप्रत्यक्षसामग्रीवह्निमत्सामग्रीसहिताप्रत्यक्षधूममित्याशयेनशंकतेसामान्यसंबंधेतिसामान्यतःसर्वैरेवविशेषाव्या
पककोटिनिविशिष्टाइतिनास्त्यन्यविशेषभानसामग्रीकाधइतिभावःस्थितविशेषभानेकाविशेषसामग्रीतन्नुप्रमाकारणबाधइ
त तिचेत्रैन्नुप्रमासामान्यसामग्र्याःसत्त्वात् यदिचसामान्यसामग्र्येवनास्तितदाविद्यमानविशेषभानमपिनस्यादित्याशयेनसमा
धत्तेविशेषाप्रतिभावेपीतिविशेषाकारेणप्रतिभासेपीत्यर्थः तथाचप्रमासामग्रीसत्त्वात्प्रमादुर्वारा अस्थितमितिभा कत्र
नसामग्रीतुनास्त्येवप्रमाणाभावादितिभावः अस्तिचसामान्याकारभानसामग्रीत्याह देवदत्तयज्ञदत्तेत्यादि ननु
वह्निसामान्यानुमितिसामग्रीवह्निव्याप्तिघटितावाच्यासाचनसंभवतिवह्निसामानाधिकरण्यस्यैकस्याभावात्
किंतुतद्वह्नितत्तद्धूमयोरेवव्याप्तिरिति तथाचवह्निव्याप्यविरहिणिकथंवह्न्यनुमितिरित्याशंक्याह संबंधिविशेषस्य
चनिर्वचितविशेषस्वरूपतयेतितिर्न्वोढिचविशेषरूपत्वंतत्तद्व्यक्तिरूपत्वंव्याप्त्यादेरित्यादिपदेनपक्षधर्मतापरिग्रहः
पक्षधर्मतापिवह्निसामानाधिकरण्यधूमनिष्ठुवानुमित्युपयोगिनीनिपर्वतीयवह्निभानात्प्राक्तद्वृत्तिधूमेव्याप्तिज्ञान
वशमात्रानुमितिःस्यादिति अयमाशयोविशेषव्याप्तिरपिसामान्यात्मनागृहीतेवांगं तथाचययपितत्तवह्निव्याप्यो

नास्तितथापिनत्रतद्रूमोस्त्येवततएवानुमितिर्भविष्यतीत्यदोषः। विद्यासागरस्तुविशेषस्यपर्वतनिष्ठस्याभानेपिअग्न्य
वच्छिन्नस्यसामान्याकारत्वेनाभ्युपगमात्सामान्याभावेनतत्वानुभूतित्वंकेनवारणीयमित्याहसामान्यतःपरमार्थतत्वरूपंविशेषमप
हायेतिकारतन्मात्रवत्त्वाप्रतिभासस्येतिअग्निजातिसंसर्गतयाप्रतिभासस्येत्यर्थः विशेषाप्रतिभासेपिसामान्यप्रतिभासंदृष्टां
तेनाहदेवदत्तेतिपथिशालिसंपन्नंदृष्ट्वेत्रंपश्यन्नतस्यदेवदत्तयज्ञदत्तसंबंधानिश्चयेपियथापुरुषसंसर्गित्वंनिश्चिनोतितथा
व्यापकविशेषाभानेपितन्मात्रप्रतिभासात्तत्वानुभूतिःस्यादेवकिंचव्याप्यसामान्यस्यव्यापकसामान्येनव्याप्तिगृहीताकिंवा
तद्विशेषस्यतद्विशेषेनआद्येधूमत्वगृहीतधूलीपटलादिनाग्नित्वमात्रप्रतीतप्रतिभासःस्यादितितन्मात्रेनतत्वानुभूतित्वं
दुर्वारंद्वितीयेत्वाहसंबंधीतिसंबंधिनोव्याप्यव्यापकोतयोर्विशेषस्यनिर्लुठितविशेषरूपतयेतिविमर्दितसामान्यास
धारणरूपतयेतियावत् महानसनिष्ठव्याप्तस्यतन्निष्ठव्यापकेनव्याप्तिग्रहणेविशेषतयाप्रवेशपर्वताद्यभावःपर्वतनि
ष्ठयोर्व्याप्याधारतयाप्रवेशदृष्टांतानानुगमइत्यर्थइत्तिव्याचष्टेअतिव्याप्तिमुदाहरणांतरेप्याहसामान्यानुमानाभा
सेचेतिगोत्वस्यग्राहकेअनुमितिकरणेविषाणादेआभासत्वमेकसंवादितितत्र महानसप्रमाणांतरसंवादात्तस्या

विसंवादित्वमिति रूपादय: सामान्यवंत: पदार्थत्वाद्घटवदिति सामान्यग्राहकेऽनुमानदूतिशिष्यहिनैविष्ण्यां विशेषाण्येव
न्नेतिगोत्वसमवायं विद्यमानं विहाय अन्य एवारोपित: संबंधविशेष इति कल्पनायामशक्त: । न त्वत्र धर्मान्तरस्येति गो
रित्यनुमितौ गोवृत्तित्वसास्नागोत्वावलंबनाभास नरइत्यर्थ: अयं भाव: गोत्वस्य व्यंजक: सास्नादिरवयवस्तत्समानोऽयं गवाकार २५
णां धर्मिणां बोधयति अत एवाहतत्रेति गवीत्यर्थ: । धर्मिणि जातौ चेतिसामान्याहेगो त्वात्मनैव गवि भासते चैत्रे हि गोरित्येव
ज्ञानाकारस्तत्र च प्रमात्वेऽदुवारं सामान्यांशेऽपि अप्यारोपइत्यर्थ: । तथापीत्यपि शब्दद्योतिसमुच्चिमाह संसर्गारोपेति नायमारोपस्ता
दात्म्यगोचर: संसर्गारोपनिमित्तजन्यत्वात् प्रतिवादिप्रयुक्तप्रयोगाभासजन्यभ्रमवत् स्वार्थानुमाने कदाचित्तादात्म्यारोपसंभवेऽपि परा
र्थानुमाने परोपस्यापितसमस्तरूपोपेतलिंगभ्रमानुपदेशसाध्यसंसर्ग एव सिद्ध्यमर्हतीत्याशयेन परार्थानुमाने हीत्याह । संसर्गा
रोपनिमित्तादेव कदाचित्तादात्म्यारोप: किन्न स्यादित्याशंक्याह नत्वेति यत्र संसर्गारोपनिमित्तं न तत्र तादात्म्यारोपश्चन्तदा
शुक्तिरजतादौ संसर्ग एव भ्रम एव दूरस्थवनस्पत्योस्तादात्म्यभ्रम एवेति घोयं नियम: स न स्यादिति विद्यासागरस्यापव्या
ख्यानं अन्यस्य कारणादन्यकार्योत्पत्तौ व्यभिचारापत्ते: भ्रमनियमस्य निष्प्रमानकत्वादिति ग्रंथासंगतेश्च यच्चानुमानात्

160

संसर्गारोप एवेत्युक्तं तच्चनयुक्तं लिंगवतोऽभेदभ्रमे लैंगिकवदभेदभ्रमस्यापि संभवात् प्रमायामपि लिंगवत्तादात्म्यपरामर्शात्
लैंगिकवत्तादात्म्यप्रमा लिंगसंसर्गप्रमातो लैंगिकसंसर्गप्रमावत् अविद्यासागरेणोक्तं परवाक्यप्रतिपन्नपदार्थानां संसर्गा
९३ योग्यानां प्रतिपादनात् न्यायाभासात् संसर्गारोपे जनितदपि न संसर्गस्य ता[illegible]दात्म्येकेरूपकारणमस्तीस्यापि संभवात्
तस्मादेवं व्याख्येयं न तादात्म्यारोप एवेति नियमः प्रमाणाभावात् संसर्गारोपस्यापि कारणसंभवात् तन्नु प्रदर्शनं परार्था
नुमानाभासे यदि च तत्रापि तादात्म्यारोपकारणमस्तीत्युच्यते तथापि तथाभ्रमनियमे प्रमाणं नास्तीति यदा संसर्गारोप
एव जातस्तदा का गतिः अत एव यत्र संसर्गारोपे संवादोस्ति न तादात्म्यारोपे तत्रातिव्याप्तिमाह कस्यचिदिति जातसं
वादो गोत्वजातिसंसर्गभ्रमो यस्य य एव गोत्वसंसर्गो मयानुमितो नूनं स एवायं त्वया प्रत्यक्षेणाप्यनुभूयत इति प्रतिसंद
धानस्य पुरुषस्येत्यर्थः ननु जातिसंसर्गभ्रमस्य मितावित्यनुपपन्नं संसर्गस्य भ्रामं मिति त्वान्न संभवादिति चेन्न संवादेन
जातिसंसर्गभ्रमे प्रमितेसतीत्यर्थः तथा च संसर्गारोपो नास्तीति यत्त्वयोक्तं तदयुक्तं आरोपरूपता च तस्याभासकारण
जन्यत्वेन तत्र वाभिमतानतु गवि गोत्वसंसर्गधी राभासहेतुजन्यापि प्रमेवेति भावः अतिव्याप्त्यंतरमाह का वा गतिः

सिद्धसाधनइति । तत्रसिद्धसाधनहेतुजन्यानुमितिविषयेऽन्यत्वकल्पनायांपारमार्थिकपक्षनिष्ठान्यत्वकल्पनायांसिद्धत्वव्याघातइतिप्रमा
णांतरेणपक्षनिष्ठतयानिर्णीतस्यसाध्यस्यसाधनंहिसिद्धसाधनंतत्कथमविद्यमानस्याधुनेवभासमानस्यस्यात् तत्त्वेचसिद्धसाधन
स्थलीयज्ञानविषयस्यपक्षनिष्ठत्वेचेत्यर्थः हेत्वाभासस्यापिसिद्धसाधनस्ययथार्थज्ञानजनकतयाऽन्यत्राप्याभासेव्यभिचारि
णिनिर्णिमित्तत्वादित्यन्यव्याघातादित्यनुषक्तः शेषः आभासस्यनतत्त्वानुभूतित्वमितिस्ववचनविरोधइत्यर्थः कथंकल्पनाया
निर्निमित्त[illegible]त्वमित्यत्रहेतुरुक्त निमित्तस्यव्यभिचारेणनिकथितंयन्निमित्तमाभासजन्यत्वंप्रत्तत्त्वानुभवत्वस्यव्याप्य
मितितस्यात्रैवव्यभिचारेणनिमित्तत्वाभावादित्यर्थः अथसिद्धसाधनंनहेत्वाभासःस्वरूपसत्प्रतिबंधकत्वात् अनुमि
तिकारणीभूतयथार्थज्ञानविषयस्यैवहेत्वाभासत्वात् तथाचहेत्वाभासजन्यत्वस्यनातत्त्वानुभूतित्वव्यभिचारइत्याशंक्या
ग हसिद्धसाधनमितरेवेतिअन्वयव्यतिरेकेत्यन्वयः सिद्धसाधनस्थलीयाअनुमितिगृहीतग्राहिणीतिनप्रमास्मृतिवत्तथाचनतत्त्वा
नुभूतित्वमस्तीत्यतिव्याप्तिः चकारः क्वचित्पाठेसाध्यसाधनमितिरेवचेतिचकारादितरत्राऽव्याप्तहेतुजन्येतिव्याप्ति
दुष्टविहरेतिव्याचस्याणस्यविद्यासागरस्यचासौसम्मतः अत्रनैयायिकाः सिद्धसाधनस्थलेअनुमितिरेवनास्तिकुत्रतिव्या

प्तिः कथं नानुमितिरिति चेन्न सत्यां सिद्धौ पक्षतायाअभावे हेतोः पक्षधर्मताज्ञानस्यानुमितिकारणस्याभावादित्येके त
न्न सिद्धेः प्रतिवंधकत्वेन तदभावस्य पक्षतात्वं तदेव तु नास्ति धारावहनस्थिषः प्रत्यक्षायाः स्वीकारेन देवानुमितिधारा या
अपि सत्यां सामग्र्यामिष्टत्वात् वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्यनुमितिधारा नोच्छिद्येति सिद्धेः प्रतिवंधकत्वमित्येते
केन तदपि न तादृशधारा नास्तीत्युभयसिद्धमेन स्तदनुबोधे न सिद्धेः प्रतिवंधकत्वे वा कल्प्यं धारावाहिक्यामनुमितौ
पूर्वपूर्वज्ञानस्योत्तरोत्तरस्यां विशिष्यहेतुतावाकल्प्या तत्रोत्सः प्रकारएवोचितत्वेन यत्रोत्तरानुमितिः प्रमाणसिद्धा तत्र अ
पूर्वज्ञानादेव तदुत्पत्तिः यत्र तु न तत्र तन्नूकालोपधायिकापि नास्ति प्रमाणाभावात् विद्यमानैव किमित्युत्तरां न जनयतीत्यपि न देश्य
मुत्तरायाअप्रमितत्वेरेव इति दिक् तस्मादेवानुमितिः किंतु न प्रमेति तत्रातिव्याप्तिः स्यादेवेति रुत्तादप्रमाणलक्षणं खंडनं । यथा
राहस्य पदार्थान्तरनिवृत्तिपरताभादायाहतत्वविषयतावेतिव्यभिचारिणो भ्रमस्येत्यर्थः इंद्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचा
र्यपस्य पादेश्यं व्यवसायात्मकं प्रत्यक्षमिति न्यायसूत्रे अव्यभिचारिपदस्य प्रमायां प्रयोगात् व्यभिचरति भ्रमाविषयतासंबंधेन यत्रा
स्ति भ्रमस्य शुक्तिकायां तत्र रजतत्वाभावसामानाधिकरण्याभावाद्रजतत्वं ज्ञानविषयीकृतेनेति प्रकृतज्ञानविषयीकृतेनेत्यर्थः

तेन यत् किंचित् ज्ञानेन विषयीकृतं तस्य प्रमेयत्वस्य व्युदासः प्रमेयत्वादिरूपस्येति इदं रजतं प्रमेयं सदभिधेयमिति ज्ञानेति व्या
प्तिरित्यर्थः प्रमेयत्वाद्यंशइति प्रकाशमाने प्रमेयत्वाद्यंशे प्रमाभ्युपगमादित्यन्वयः धर्मांतरं रजतसंसर्गादिरूपादीति रूप
समवायी घटः द्वौ घटौ अभ्युक्ताविति प्रमा यौ वा प्रकाशमानेनेति प्रकाशमानेन रूपेन यदनुभवस्यार्थसादृश्यं धर्मगत
श्री धर्मः सविशेषणत्वेन विवक्षितं इत्यर्थः एतदेव व्याचष्टे अर्थस्य हीति विशेषणत्वं विशेष्यसंबंधमात्रमपेक्षते संबंध
स्त्वर्थे समवायेः ज्ञाने विषयतेति भावः एवं सती सस्य पूर्वोक्तिनीभ्युक्तिः रजतं तयाऽवगाहमानं ज्ञानं प्रमास्यादि
त्यनेनान्वयः एवं हीति यदि विषयतया विशेषणेन सादृश्यं विवक्षितमित्यर्थः पूर्वोक्तित्वादिना तथाभावस्य तथात्व
स्य प्रकाशमाणरूपेण विशेषणतया अर्थसादृशत्वस्य संभवादिति हेतुः। ननु अनुभूतिः प्रमेति लक्षणमव्याप्तिरिये
शानेन लक्ष्यताख्यातिनयइत्याशंक्याह सर्वेति ~~(उक्तदोषादिति धर्म्यंशेऽतिव्याप्तिरित्यर्थः)~~ प्रमायामेवानुभवत्वस्य स्थै
ति र्यादि अनुभवत्वं प्रमायामेव स्थिरं प्रमात्वव्याप्तमित्यर्थः अनुभवे प्रमात्वस्य स्थैर्यादित्यपव्याख्यानं तु मैथिलानां ग्रंथ
विरोधादुपेक्ष्यं। उक्तदोषादिति धर्म्यंशेऽतिव्याप्तिरित्यर्थः सर्वेनेति न चेदमतिव्याप्तं रजतादिभ्रमस्य प्रमात्वात्रित्वादिनार्थसादृ

श्येस्तस्यापि ज्ञानविशेषणीभूतस्य रजतादिसंसर्गस्य पुरोवर्त्तिविशेषणत्वाभावात् तस्यानुभवस्य येनार्थेन स्याद्दृश्यं सा तत्र
प्रमेति शेषः रूपसमवायी घट इति ज्ञाने घटो विषयतया विशेषणं न तु घटे स्वस्य स्वविशेषणत्वेऽप्रामाण्यापत्तेरनभ्युपगमादिति
प्रमाणलक्षणाव्याप्तिमाशंक्य परिहरन्ति न च तावतेति अयं भावः यस्य ज्ञानस्य यावान् अर्थो विषयस्तावतोऽर्थस्य तज्ज्ञाने विशेषणत्वे
ए सतीति तद्विषयविशेषणत्वं विवक्षितं घटस्य घटविशेषणत्वाभावेऽपि घटस्य रूपमेति प्रतीतेः पटादिरूपाद्व्यावर्त्तकतया विशेष
णत्वमस्तीति नासंभवो लक्षणस्यैवमयमयं घट इति प्रमाविषयेण घटेनाप्यन्यगतिं ताव्यावर्त्तनाद्भवति विशेषणं तथेदं ता
पि रजतज्ञानविषयस्य घटस्य परं तु प्रमेयोऽभिधेय इति प्रमायामव्याप्तिः प्रमेयत्वे प्रमेयत्वमित्यत्रापि तेन विशेषणत्वे हृतदु
परक्तबुद्धिजनकस्य वर्त्तमानतादिवद्दर्शनाच्च ज्ञाने विषयतासंबंधेन विषये तु समवायरूपादिने सवधेयं ननु तन्नु ज्ञानं
यावत्यंशे प्रमा तावत्संशेऽर्थस्याद्दृश्यमस्तीति चेन्नान्यथाख्यातिवादिनां ये ज्ञानस्यैकस्यां तद्धर्म्यंशे प्रमात्वाभावे दृष्टापत्ति
माशंक्य विनिगमनाविरहमाह अव्यभिचारिणं चाशमनेनुरुध्या किंचित्करीकृत्य तदीयायां भूमीयायाऽप्रमिति
कोटिस्तत्र निःशेषोऽर्थादव्यभिचारांशस्य तदेव साहसिकं सहसावलेन यः करोति स साहसिकस्तस्य कर्म साहसि

कथंदस्युकर्मेति यथाहि दस्यवः परस्वं बलात्कारेण नीत्वा कुत्रचिन्निःक्षिपंति तथा भवतापि अव्यभिचारांशमपहृत्य
व्यभिचारकोटौ निःक्षिपति अतो भवता साहसिक्यं भयहीनेन भ्रमीयो योऽव्यभिचारांशो वर्त्तते तदनुरोधेन व्यभि
चारांशापहार एव किमिति न क्रियते तथा च तदीयकोशाऽपहार्थः को वा नेत्यत्र विनिगमनाविरह इति भावः
तदीयोऽव्यभिचारांशो यो निःक्षिप इति वा व्याख्येयं । साहसिक्यादारभ्य ता भवता किं नाध्यवसीयत इति योज
नानन्तु नर्हि सर्वज्ञाने प्रमात्वे तर्हि तस्याः किं लक्षणं स्यात्त्वया सर्वलक्षणस्य दूषितत्वादतोऽविज्ञानलक्षणमवस्त्वेव
स्यादित्याशंक्याह शक्यत इति अनुभूतित्वमेव साक्षात्मान्यतयाज्ञानत्वमेव वा स्वमर्यादा न्यजवहु मणीतेरपि प्रमा
त्वस्य स्वव्यवच्छत्वात् आदिपदात् विशिष्टज्ञानत्वस्य परिग्रहः इति मैथिलाः विद्यासागरस्तु परोक्षत्वापरोक्षत्वान्यतरत्वमादिपदार्थः
अथवा अपरोक्षत्वमस्तु लक्षणमव्याप्तेर्दोषतापाधर्मिप्रमाणएवत्वाऽपाऽनंगीकारात् । तादृशाभिप्रायाविरोधिनेति यभिचा
र्य्यसज्ज्ञानस्य प्रमाकोटिनिवेशाभिप्रायो विरोधिना भवनेत्युक्तसप्याने अनुबोधिनेतिपाठः सुगमः ननु भ्रमस्य सर्वांशप्रमात्वे
रजतांशे बाधो न स्यादित्येव विनिगमकं । तस्मादेकमपि ज्ञानमंशभेदेन प्रमाचाप्रमाचानुभवस्पष्टरूपकत्वात् इति चेत्

ज्ञानं केवलाप्रमाते लोकविरोधमप्याह यद्वेति बाध्यांशोऽस्याः बाध्यार्थांशेऽप्यपि क्वचित् सा अबाध्यांशे प्रा प्रमैव अरुचिबीजो
न नार्थोऽपि एवकारोऽशतोऽपि प्रमाभावार्थः। तुहिनद्युतिवियुदाद्यवयविनमल्पपरिमानमुल्लिखत् प्रत्यक्षमप्रमा स्यादिति योजना
अल्पपरिमाणग्रहे हेतुस्तावत्परिमाणग्रहस्तत्र हेतुः परभागाग्रहस्तत्र हेतुर्दूरत्वमिति अत्र दृष्टान्तः सोधाग्रकुंभवदिति यथा दू
रत्वदोषेण प्रासादस्थितिस्वरस्थकुंभो महानपि स्वल्पपरिमाणतया प्रतीयते तथा [illegible] चंद्रमंडलं धरणीतोऽप्यधिकपरिमाणमल्पप
रिमाणतया प्रत्यक्षमित्यर्थः। यद्वा यथार्थत्वं निरूपितं यावत् ज्ञानविषयविशेषणकार्थमिति तत्रासंभवमाह क्वचेति मैथिलाविद्यासा
गरस्य वस्तुतस्तु बाध्यांशाधीश्प्रमेति व[illegible]दनाह सर्वथासाबाध्यत्वेनैव प्रमात्वं वाच्यं न चैवोदाहृतं नु मशक्यमित्याशयेनैवेदं प्रकृते संगतं
तत्र देशकालयोरप्रत्यक्षत्वान्न तु संयोगग्रहणप्रसक्षमसमर्थमालोकव्यक्तिः व्यावृत्ता कथ्यते व्यावृत्तिश्च न प्रत्यक्षा ततः परस्मिन् देश
स्तालोकं जलादिविद्युतद्युत्यादिज्ञानानां समस्ततावत्यर्थप्रवृत्तिसामर्थ्यस्योदाहरणं न क्वापि देशकाले वा संभावयितुं शक्यमित्यर्थः
अयमाशयः एतज्ज्ञानानां सर्वेषां बाध्यत्वं प्रवृत्तिसंवादेन ग्राह्यं न चैतादृशज्ञानस्य विषये प्रवृत्तिसंवादः संभवति देशकालयोरप्रत्य
क्षत्वेन प्रवृत्त्यविषयत्वात् आलोकव्यक्तेश्च तज्ज्ञानविषयीभूतायाः प्रवृत्तिकालेन नष्टत्वात् अत एव देशकालयोः प्रत्यक्षवादिनामपि

मते तयोरनुपादेयत्वात् प्रवृत्तिविषयतादूरापास्तात्। यद्वा विद्युत्प्रदीपसलिलादिज्ञानस्य विषयीभूतानां क्षणिकानां प्रवृ-
त्तिकाले विद्यमानत्वाभावात्। प्रवृत्तिविषयाणां चैषां प्रथमज्ञानागृहीतत्वात्तत्प्रवृत्तिसंवादेन सर्वांशाबाध्यत्वं ज्ञानस्य शक्य-
ज्ञानमित्यर्थः। सर्वांशाबाध्यस्य प्रामाण्यप्रयोजकत्वे सर्वज्ञानानामप्रामाण्यापत्तेः सर्वज्ञानविषयाणां बाध्यत्वसंभावनयास्यादिति दूषणा-
न्तरमाह यदि बाध्यांश इति। अबाध्यमपीति रजतं सर्वज्ञाने बाध्यं शुक्तिज्ञाने बाध्यत्वादित्यपि स्यादिति तर्हि किं तत्रोत्तरमिति चेल्लोक-
सिद्धप्रमाणपरित्यागापत्तिरेव तत्रोत्तरं तच्च भवतानाशितमित्याह अन्यदिति लोकसिद्धप्रमाणपरित्यागादन्यत्तत्रोत्तरमस्तीत्यर्थः
तस्माद्बाध्यार्थांशाविधीः प्रमेवेति व्यर्थं सर्वेनेति विशेषणमिति निष्पन्नं नदेयं तर्हि विशेषणं भ्रमातिव्याप्तिस्त्वन्यथा वारणीयमिति
शंकते अथेति। येनार्थेन विशेषणभावेन स्यादृश्यमनुभवस्य तत्रैव प्रमात्वमित्यत्र दोषमाह मेवमिति। प्रमेयोऽभिधेय इत्यत्र व्याप्तोऽसत्याम-
व्याप्त्यंतरमाह विशिष्टेति निरूपवान घट इति यद्विशिष्टं प्रतीयते तस्य विशेषणत्वाभावात् तत्र प्रमात्वापात इत्यर्थः न हि विशिष्टे विशिष्टं
विशेषणं स्वस्य स्वव्यावर्त्तकत्वात् विशेषणविशेष्यतत्संबंधानां विशिष्टतायामप्यशतः स्वष्टत्वापत्तेः न च गौरिति ज्ञाने गोत्व-
मिव गौरपि गोत्वस्य विशेषणं अन्यथा सर्वज्ञानानां प्रकारांशे निर्विकल्पकत्वापत्तिरिति वाच्यं तथात्वे तिसुतरां गवांशे गौरव्या-

वर्त्तिकतयाअव्याप्यापत्तेः।अतिव्याप्तिमाहअपिचेतिननुरजतत्वंशुक्त्यावर्त्तमानंकथंतदवच्छेदकमित्याशंक्यशुक्तेर्व्यवच्छेदिका
याप्रतीतिस्तदवच्छेदकतयेत्यनुभववलमालक्ष्याहरजतत्वतयाप्रकाशितेतिदीर्घदंडःपुरुष[illegible]द्रुत्सादावित्यादिपदेनरक्तपटो
मस्करीकृष्णाजिनोब्राह्मणब्रह्मचारीतयोःपरिग्रहः नचत्रदीर्घत्वादिकंनपुरुषस्यव्यवच्छेदकंकिंतुदंडस्यैवदंडादिकंतुपु
रुषस्यसाक्षादेवविशेषकमित्याशंक्याह इत्थंदंडादिभ्य इति अयंभावःयस्यपुरुषस्य इत्थंदंडादिस्ततोव्यवच्छेद इह प्रतीयते
नतुदंडरहितमात्रात्ततःदीर्घत्वादेरप्यस्त्येवविशेषकत्वंतथाचदीर्घत्वांशप्रमायामव्याप्तिरेवदंडादिद्वारेतिदंडस्यविशेषणीभूये
त्यर्थःद्वारत्वस्यतज्जन्यत्वेसतितज्जन्यजनकत्वात्मनोवाधात्।ज्ञानरूपज्ञानेरूपद्वारानपेक्षमितिज्ञानाविशेषणीभूतंसदावर्त्तक
मित्यर्थःरजतत्वंतुज्ञानविशेषणीभूयतथानतुदंडत्वादिकमितिभावःज्ञानप्रकाशितेयस्मिन्ज्ञानेयोर्थोयथाप्रकाशतेतेनरूपेण
विशेषणत्वमव्यवधानार्थानतुज्ञानानंतरितत्वमित्यर्थःरजतादिस्तुसमवायितयापुरोवर्त्तिनिप्रकाशतेनतुतेनरूपेणपुरोवर्त्ति
नोविशेषणमितिनातिव्याप्तिरित्यर्थः दूरंतुयमिति अतितुच्छमित्यर्थः ज्ञानप्रकाशितरूपेणविशेषणंज्ञानंप्रतिअर्थंप्रतिवा
आद्येयद्यपिभ्रमेनातिव्याप्तिर्ज्ञानेरजतत्वस्यसमवायित्वाभावात्तथापिरूपवान्घट इत्यत्राव्याप्तिरित्याह रूपादेरितिआदिप

देनघटत्वस्यपरिग्रहः अंत्यमालंब्य शंकते अयेति ज्ञानप्रकाशितत्वरूपेणैव युक्त्या परंपरासंबंधेन विशेषणतायाः निरासान्नातिव्याप्तिः।
मं ननु ज्ञानेपीति भवदुक्ताव्याप्तेरेवेति शेषः यदि चार्थप्रतीत्यावश्यकं तदा वैयर्थ्यादिति भावः तज्ज्ञानव्यक्तेरिति यस्मिन् ज्ञान इति ज्ञान
व्यक्तिघटितमिदं लक्षणं न तस्य घटोयमिति ज्ञानप्रकाशितत्वेपि तत्स्वरूपस्य घटत्वस्य पटोयमिति ज्ञानविषयविशेषणत्वाभावे
नाव्याप्त्यापत्तिरित्याशयः असाधारण्या व्याप्तिवृत्तित्वादित्यर्थः यदि तु यत्किंचिद्घटितं न लक्षणं किंतु ज्ञानप्रकाशितविशेषणकत्वं
तदा रजतत्वप्रकारकज्ञानविषयीभूतायाः शुक्तिव्यक्तेः सत्यमित्येवं प्रकारेण रजतत्वस्यापि शुक्तिविशेषणत्वादतिव्याप्तिः।
ज्ञानप्रकाशितेत्यत्र तत्तत्काले ज्ञानप्रकाशितत्वोक्तावव्याप्तिः अन्यथानुव्यर्थत्वं ज्ञानाप्रकाशितस्य भावात् किंच तज्ज्ञानप्रकाशित
रूपेणेत्यत्र रूपपदस्य प्रकारपरत्वे निर्विकल्पके व्याप्तिः स्वरूपपरत्वे घटोयमिति ज्ञानविषयस्य घटस्य घटे व्यावर्त्तकत्वादि
त्यादिदूषणमस्त्येवेत्याशयेनोपसंहरत्यलमिति। द्वितीयस्य प्रमामात्रलक्षणस्य खंडनं। कुसुमांजलौ न्यायाचार्योक्तं लक्षण
मनुवदति मितिरिति। तस्यापीत्यतः पूर्वमिति शब्दोध्याहार्यः केषांचिदिति अंत्यविशेषणमित्यर्थः प्रत्यर्थमिति यत्र योवर्त्ततेस
(साक्षात्कृत इत्यादावित्यादिपदेन स्मृतोऽनुभूत इत्यादयो गृह्यंते साक्षात्त्वं ज्ञानस्य विशेषणीभूयैव स्वविषयं परिच्छिनत्ति ज्ञानविषया)
दर्थाद्यवस्थापयति स्वमनुभवत्वादिकमपीति भावः)

स्यर्थः तथा च नानिव्याप्तिरिति भावः। विशेषाक्रांतपरत्वं तर्ह्यस्त्विति आशंक्याक्रमतिप्रसंगं स्मारयति अतिप्रसंगादिति।
यद्वा विशेषमात्राभिधानदूषणं तत्र तत्र विद्यमानत्वात्मकविशेषणरहितं परं विशेषमात्रपरं प्रत्यर्थव्यावृत्तेत्यत्र तन्न द्विशेष
परं सामान्यतश्चेत्यत्र विशेषत्वाक्रांतपरमतोनयोनरूढ्यं ऽक्रमेवं कं य्याः स्मारयत्युभयथापीति सामान्यतो विशेषतो ल
वाऽभिधानेऽतिव्याप्त्यव्याप्त्योः प्रसंगादित्यर्थः। विद्यासागरस्तु कनराः पश्चात्त्रोपादेय इति चेन्नोभयथापीति व्याचष्टे अभे
दादितिसाहित्यस्य भेदगर्भत्वादिति भावः। विशेषपरिच्छिन्निः प्रमेयमेवोच्यत इति चेत्तर्हि विशिष्टप्रमायामव्याप्तिः सा वि
शेषपरिच्छिन्निरपीति चेदस्त्वेवं तथापि विशेष्यप्रमायामव्याप्तिः विशेषपदस्य तत्र द्विशेषपरत्वेऽननुगमशास्त्यैवेति।
यद्दर्शनेति भ्रमस्य बाधः पुरुषो यं न स्थाणुरित्येकोवा संशयस्य व्यवस्थाएककोटिनिश्चयः पुरुष एवेत्याकारः अग्रहण
स्मरणाविवेकातिरेकेन भ्रमसंशयो न स्तः कुतस्तवा मुक्तरूपो विशेष इत्यत आह तदनभ्युपगमइति भ्रमादिगोचरो
ऽतत्वं तदितरस्तत्वमिति स्थितिः सैव न स्याद् भ्रमाद्यनभ्युपगमे भ्रमाद्यसाधारणत्वेन हि अविवेकः सिद्ध्यति तदभावे
कस्य कारणत्वेनाभावः सिद्ध्येत् वा अविवेकस्याभावस्यासाधारणकारणत्वं सिद्ध्यति तथा च द्वयं व्यवस्थानोपपद्येत

यद्वा प्रमाविषयत्वं तद्विषयत्वयोरेवानन्त्यात् तत्त्वपदार्थत्वादुक्तविशेषानभ्युपगमे तद्व्यवस्था न स्यादिति तथाभूतविशेषाभ्युपग
मे तत्त्वातत्त्वव्यवस्थैवमाने यद्वा भ्रमबाधौ न स्त इति कुतस्तत्त्वावस्थापकतया विशेषसिद्धिरित्याशंक्याह तदनभ्युपगम
इति भ्रमबाधयोरनभ्युपगमे बाध्यमतत्त्वं तत्त्वमबाध्यमिति विभागो न भवेदित्यर्थः मा भूदयं विभाग इत्याशंक्याह भवि
तव्यं चेति तत्त्वातत्त्वविभागोऽस्तीति मदीयज्ञानस्य तत्त्वविषयत्वे विभागसिद्धिः अतत्त्वविषयत्वे मदीयज्ञानविषयो
ऽतत्त्वं विभागो नास्तीति तावकीनज्ञानविषयस्य तत्त्वमिति तन्न सिद्धिरित्यर्थः व्याघातादिति तत्त्वातत्त्वविभागो नास्ती
वदतः किं सर्वज्ञानं तत्त्वं तन्नातत्त्वं आद्ये परकीयपक्षानुवादतः परपक्षसिद्धौ तत्त्वखंडनानुपपत्तिः अननुवादे च स्व
तत्त्वं न हि अननुवाद्य खंडनं शक्यं द्वितीये त्वद्वचनस्यातत्त्वविषयतयाऽनवधेयतापत्तिः किं च तवा[illegible] निश्चयवतः प्र
वृत्तिव्याघातः न नश्चनव जीवनमपि न स्यादिति च । स्वप्नदृश इति न हि स्वप्नदृशः सामान्यस्य भानमस्ति अस्ति
कुतूहलात्तु न वा विशेषसहिताविषयकं स्वप्न उपलभ्यत इत्यर्थः तर्हि भ्रमविरोधित्वेन विशेषो न निर्वाच्यः किंतु प्रका
रान्तरेणैवेति चेत् तन्न तस्य निर्वक्तुमशक्यस्य संप्रतिबोधनाशक्तेरिति । अथ दुर्वचस्यापि विशेषस्य व्याघातं दउभया

दवश्यमभ्युपेयतां तत्राह नेति । ननु स्वप्ने ये भासंते तेन विशेषाभ्रमाविरोधित्वात् अनुभूयंते हि ते स्वप्ने किंतु
जाग्रति ये भासंते तेन एव विशेषास्वप्नविरोधित्वादित्याशंक्य स्वप्नेपि जाग्रदवस्थाप्रतीता विशेषा एव भासंते तेन तस्य
न तेषां भ्रमविरोधित्वमित्याह न हीति न च वम्य एव ते स्वप्नेन हि जाग्रदवस्थानुभूतानां स्वाप्नभानं संभवति अन्यथा जाग्रत्यपि स्व
प्नापन्निर्विषयाणां भविशेषा इति चेत्तत्रान्यथाख्यातिवादिनस्तवतथावक्तुमशक्यत्वात् क्वचित्प्रमितानामेव क्वचिदारोपात्तथा च तेषां
प्रमाविषयानामेव स्वप्नेभानमित्येकप्रकारस्तया विशेषविषयता दुर्वारा । अनिर्वचनीया एव स्वप्नविषया असंत एव वेति मते विशेष
निरुक्तिः शक्येत्याशंक्याह वाक्याभासेनवेति नदीतीरे षट् फलानि संतीति वाक्याभासाद्याप्तवाक्यसमानाकारबोधोऽनुभूयते दूषद
पिवेलक्षण्यानुभवान्न हि नदीतीरस्थफलत्वानि सामान्येन तद्विषयको बोधो न विशेषस्याप्तवाक्यस्थापि तादृशस्याप्रा
माण्यापाताद् इति तथा विम्याघातपरिहारो अप्रतीयमानः कल्प्येषां विशेषो वा तादृशत्वत्र किं विनिगमकमित्यत्र विनिगमक न्यानि स्थित
माह प्रतिपत्त्यारूढत्वेति अप्रतीयमानानां विशेषाणां कल्पना प्रतिपत्त्यारूढत्वेन ततो वरं व्याघातपरिहारस्य कल्पनेति संबंधः
अयं भावः कल्प्यमाना विशेषा अनुपलभ्यमाना अपि प्रतीत्यारूढत्वेन कल्प्या अन्यथा तदनुभवाद्बाधितबाधानुपपत्तेः अतोनुपल

भ्यमानावुद्धारूढावृत्तिव्याघातं व्याघातपरिहारकल्पनायां तु नैवं कश्चिद्दोषोऽस्तीति । अस्य परिहारस्य सत्त्वे द्वैतापत्तिर्न
चेद्व्याघातो निष्प्रत्यूहकत्वादित्याशंक्याह वस्तुशश्चेति उन्मूलयिष्याम इति तुरीयपरिच्छेद इति भावः विषये विशेषस्याहितत्व
मपेक्षितं न तु ज्ञाने न च शुक्त्यादिके रजतत्वादिविशेषस्याहितमिति नातिव्याप्तिरिति शंकते न चेति विशेषेणासंहोपलं
भो विशेषस्य संहोपलंभ इति पदमध्याहार्य्य वाक्यार्थकथनं कृतवान् । अत्र शुक्तेरपि शुक्तित्वविशेषस्याहितत्वात् अव्याप्तिरित्याशंक्याह ९
न चेति तथा च प्रतीयमानविशेषस्याहितत्वं विवक्षितमिति भावः । उक्तदोषेनेति प्रथमविवक्षायां शुक्तस्य दोषस्यात्रापि सत्त्वादित्यर्थः
उक्तदोषं विशदयति यदीति एकारज्ञानगोचरयोरेकस्य प्रमारूपतया तत्त्वविषयत्वं अपरस्याप्रमारूपतया अतत्त्वविषयत्वमिति
विभागदर्शनादस्ति कश्चिद्विशेषः स एव लक्षणे प्रवेश्य इत्याशयः । कं विशेषमिति तथा चानुपलब्धिबाधितं विशेषस्वरूपमिति
भावः कथं तर्हि तत्त्वातत्त्वविषयत्वं विशेषः कार्य्ययोरिति चेद्वाक्यस्याप्तोक्तत्वानाप्तोक्तत्वाभ्यां ननु विशेषदर्शनभावाभावाभ्यां
न च तयोरेव विशेषपदेनाभिधानं प्रत्यक्षप्रमायामव्याप्तिः न च तदुभयं विषयनिष्ठं किं तु करणनिष्ठमेवात एवोक्तं प्रतिपाद्यमान इति
उक्तस्वं ज्ञानाविवेचकत्वं जडत्वं असकृदुक्तौ विवेचकत्वं जडत्वमतं जडत्वमत्वेनाप्यसो पेक्ष्यः किंतु प्रकारांतरेण बोधनीय इत्या

167

हसद्भिः । प्रमाणसिद्धौ तद्विपरीतार्थप्रमात्मकबाधसिद्धेः सिद्धे च बाधे बाधव्यवस्थाहेतुविशेषसहितोपलंभरूपायाः प्रमायाः
सिद्धिरित्याशयेनाह प्रमायाश्चेति सम्यक्त्वं विशेष्यनिष्ठप्रकारकत्वं विशिष्यनिष्ठविषयत्वं भ्रमभिन्नत्वं वा इत्येवलक्षणे
त शंकां योगाविताानि याथार्थ्यदूषणदूषितान्येवेति न पुनरुक्तं किं नानितत्राद्यं भध्यं च भ्रमे धर्मिणि शेनादृश प्रकारवत्वादति
व्याप्तं तस्य लक्षणस्य त्वे दपलेपरिहितिरित्येवानुविशेष्यत्वे प्रकारत्वं चैनेकमस्तीति तत्र द्विशेष्यत्वघटितलक्षणे निर्वचने
ऽतिव्याप्तिः । तृतीयं तु धर्म्यंशे प्रमायामव्यापकं भ्रमत्वस्य तत्तत्पदार्थघटितस्य भेदोऽपरभ्रमेपी सति व्याप्तिः यावद्भ्रमाणामस्मा
दृशैराकलयितुमशक्यतया तावदनुप्रतियोगिकानां तावद्भेदानां लक्षणे प्रवेशः संभवीत्यादयो दोषा याथार्थ्यलक्षणे पि निवि त
ष्टा अत्राप्यापतंतीति । विशेषानुभूतिः प्रमेति विवक्षायामतिव्याप्तिरपि दोष इत्याह किं चेत्यादिना तादिति संशयविषय्यो
नदीतीरे पंच फलानि संतीति वाक्यं कदाचिद्विप्रलंभमूलं भवति विप्रलंभश्चान्यथा संविदानस्यान्यथा विरोध… यिषा
तथा च तद्वाक्यार्थ अनुत्पन्ना इति याप्तिमाह वि… प्रलंभकवाक्यप्रयोगेति वाक्यस्यानुपूर्वीज्ञानादेव श्रुतकस्यारोपपत्तेर्विप्र
लंभस्य स्याकारणत्वेपि तत्पूर्वकत्वेन मूलत्वोक्तिरविरुद्धा आहार्य्यसंशयानामितुपलक्षणं आहार्यपूर्वपक्षभ्रमस्या

विविचारं प्रवर्त्तयतइष्टत्वात् । जातिक्रामतीति अनुभूतित्वस्य जातिरूपाधेर्वा खंडितत्वादिभावः चतुर्थप्रमाणलक्षणं प्रत्यक्षलक्षणमू
त्रेऽव्यभिचारिपदोक्तं खंडयति । नापीति नत्वविषयत्वादीत्यादिपदेन याथार्थ्यसम्यक्त्वयोः परिग्रहः । शिंशपात्वस्य वृक्षत्वाव्यभि
चारित्वात्तन्नादात्म्यं दृष्टमित्यवष्टंभेनाह यथा यादृगर्थस्तादृगेव ज्ञानमिति । यद्यपि नेयमव्यभिचारनिरुक्तिस्तथापि
यदि तथाविवक्ष्यते तदेवमिति वस्तुनस्तादात्म्यसंबंधेनाविनाभावो ज्ञानस्य बाधित इति ज्ञानमर्थसदृशरूपेनार्था
त्मकमित्यर्थः भवति हि स्वसदृशयोरिदमेतदात्मकं यथा वा सिंहत्वं माणवकस्य गौणं रूपं तथा ज्ञानमर्थात्मकमेवा
र्थस्य गौणं रूपं यदर्थसदृशत्वेन तदात्मकमेवेत्यर्थः । ज्ञानासमानदेशार्थप्रमितीनामिति घटप्रत्यक्षवह्न्यनुमिति
प्रमादीनामित्यर्थः आत्मसमवेतसुखादिप्रमायां नाव्याप्तिः संभवतीति ज्ञानसमानदेशेत्याह ज्ञानसमानदेश
मर्थमित्यात्मत्वमित्यर्थः अन्यत्र देहादावारोपयतः अहं मनुष्य इत्येवं भ्राम्यतः तथा च देहात्मप्रमेति व्याप्तिरित्यर्थः । सर्वा
कारेणेति घटत्वज्ञानत्वद्रव्यत्वगुणत्वादीनां महावैलक्षण्यान्न सर्वात्मना साम्यमित्यर्थः ज्ञानात्मयोरभेद इति योगाचा
रो हि ज्ञानमेव ग्राह्याकारेण भासत इति वदतीति मतमित्यर्थः । अभ्युपगंतव्यत्वप्रसंगादिति ज्ञानभिन्नस्यार्थस्यासत्वात्

ज्ञानानुपपन्नेर्ज्ञानमेव बहिर्वदवभासत इति भ्रमे विअर्थाभेदे सर्वस्याप्यस्याप्युपगन्तव्यतयातिव्याप्त्यापत्तिरिति तद्वा
रणाय विशेषणमसमर्थमित्यर्थः प्रकाशमानरूपेनार्थसाम्यमनुभवस्य विशेषणतावतिपक्षेऽपि यद्याश्रीयते तदाह तेनेति प्रका
त शमानत्वेऽप्यप्रसिद्धेरित्यर्थः। विशेषमात्राभिधाने भ्रमेप्यतिव्याप्तिर्विशेषद्वयाभिधाने ऽननुगम इति याथार्थ्यखंडनानि प्रसह्यं त
दित्यर्थः चकारात् तत्त्वप्रमेयत्वादिना सादृश्यभ्रमस्यापीत्यतिव्याप्तिरिति सूचितं। ननु व्यभिचारिणोर्थस्यानुभवः प्रमे
त्येव लक्षणं वाच्यार्थः अथाव्यभिचारस्तु यत्र ज्ञाने तत्रार्थः इति चेन्न धर्मिण्यप्रमात्वापत्तेः अर्थपदस्य यत्किंचिदर्थपरत्वे प्र
मेतिव्याप्तिस्तु तदर्थपरत्वे ऽननुगमः। प्रमाया लक्षणं पंचमं बौद्धनिरुक्तं दूषयति अविसंवादीति विसंवादः संवादराहि
त्यं तदभावः संवाद इत्याशयेनाह ज्ञानान्तरेणेति यदि विसंवादो बाधस्तद्धीनत्वमविसंवादं तदा ज्ञानान्तरेण विपरीत
तया प्रतीयमानार्थत्वं पूर्वप्रतीतरूपाद्रूपान्तरेण प्रतीयमानार्थत्वमित्यर्थः। प्रतीयमानव्याप्यविषयत्वं संवाद इति
केषांचिन्मतं प्रतीयमानो व्याप्यो यस्य व्यापकस्य तद्विषयत्वं प्रतीयमानो यो व्याप्यस्तद्विषयत्वमिति वार्थः अर्थक्रियाकारि
वस्तुविषयत्वं संवाद इति सौगतमाहान्यदेवेति। अजातबाधेति यद्यपि पुरुषान्तरेण विपरीततया प्रतीयमानत्वं तत्राप्य

स्तितथापियत्रकस्यापिनबाधस्तत्रातिव्याप्तिः शंखज्ञानादेवेत्यादिपदेनस्याशोऽस्याणुरितिदुष्टेदृष्टदोशोऽस्तत्रपुरुष
ज्ञानबोधितविपरीतत्वेनाप्रमात्वप्रसंगः परिगृह्यते। दुष्टत्वमितिविशेषदत्तुक्तेकारेसमवेतत्वरूपकार्य्यगतविशेषेऽतिए
व्याप्तिरितिरितिहेतुपरंतावन्मात्रंकारणगतिशङ्कावतिव्याप्तमितितनतपदंविपरीतज्ञानपरंतावदपिचदुष्टगतमतोज्ञान
प्रयोजकमितितच्चनज्ञानप्रयोजकंव्यभिचारात् तथापिगुणेऽतिव्याप्तिरितिविपरीतपदंविपरीतज्ञानप्रयोजकदुष्टिमस्वरू
त पेऽतिव्याप्तिरितितद्धेतुगंत्वविशेषणंतावदपिएकदेशकालावस्थानात्मकेमेलनेऽतिव्याप्तमितिविशेषणपदंनचमेलनंवि
शेषः सकलकारणसाधारणत्वात् अ— —कारण—मितितथाचप्रमान्नस्यादितिगुणेऽपिदोषत्वमतिप्रसक्तमितिभावः
नत्सणप्रवृत्तेः प्राक्प्रमायाअप्रतीतेस्तद्घटकस्तत्प्रतियोगिकोवाव्यवच्छेदोनप्रमात्वंशक्यतइतिपरिहरतिनेतिस्वरूपसत एवप्रमा
याव्यवच्छेद्यत्वंकुतोनस्यादित्यतआह तदीयस्वरूपस्येतिप्रमात्वरूपस्याप्रमाव्यावृत्तस्याप्रसिद्धत्वादप्रमायाः कुतः प्रतियोगितो
व्यवच्छेदः प्रसक्तव्यः नयतः कुतश्चिदात्मनोपिप्रसंगादितिचभेदः सत्तामात्रेणप्रतियोगित्वोपयोगीदूरस्थवनस्पत्योर्भेदाप्रतीतेः प्रति
योगित्वाप्रतीतेरित्याशयः ततः फलितमाहइतीतिव्यावृत्तप्रमात्वात्ताभावेअदुष्टकरणकज्ञानेनाबाधितत्वमित्यादिलक्षणाधीनव्यावृ

त्रप्रमाज्ञानसिद्धिरिति स्वसिद्धेः स्वसिद्धिरित्यात्माश्रयः प्रमासिद्ध्यालक्षणसिद्धिरितीतरेतराश्रय इत्यत आह अन्योन्याश्रयेति यावदिति
प्रमासिद्ध्यालक्षणसिद्धिरित्यतिलक्षणप्रमाव्यतिरिक्तमेव वा विपरीतज्ञाने विपरीतपरस्य व्यवच्छेद्यं तर्हि तदपि विपरीतज्ञानं विपरी
त्र तज्ञानव्यवच्छेदेन लक्ष्यं तस्यापि विपरीतज्ञानस्य निरूपणं भविपरीतज्ञानांतरव्यवच्छेदेनैवं तस्य तस्यापीत्यनवस्था यदि चाप्रमा
व्यावृत्तत्वेनादुष्टकारणकत्वज्ञानं तेन च प्रमानिरूपणं तेन चाप्रमानिरूपणं तदा चक्रकं स्यादित्यंतराणिका परस्य वेशेन तदित्यनव
स्थेवोक्ता। उक्तं वेउनेशिष्यहिताया अन्यत्राप्यतिदिशन्नेकानेकेति यत्रानेकविशेषेऽथ एको विशेषो लक्ष्यते न तु तद्विशेषांतरव्यवच्छेदे
न तत्रात्माश्रयादिदोषो धावत्येव नत्रैव धावतीति यथापूर्वत्रेति वार्थः। सचासो विशेषांतरभोन्यस्थितत्वादित्यर्थः तथा हि ज्ञानादेर्ध
र्मिणः स्मृतित्वानुभवत्वादयोऽनेके धर्माः संति तत्र एको विशेषः स्मरणमनुभवो यत्र लक्ष्यते स्मरणान्यत्वेनानुभवान्यत्वेन वा लक्षणान्न वा
यद्वाप्यनेकविशेषेऽर्थेन वा विधेद्रव्यपदार्थे यदा जलादिव्यावृत्तेनेन पृथिवीद्रव्यं लक्ष्यते ध्वत्वादिना तदा व्यावृत्तपृ
थिवीज्ञानेविनातद्व्यावृत्तजलादिज्ञानासंभवात् व्यावृत्तपृथिवीसिद्धेस्तत् व्यावृत्तपृथिवीसिद्धिरित्यात्माश्रयादिः स्यादित्यर्थः।
द्रव्यमाहृतं घ्राणग्राह्यगुणत्वं गंधत्वं तत्र गुणत्वादित्युक्तेः जलादावतिव्याप्तिः स्यादिति शेषः घ्राणग्राह्यत्वं विशेषणं वाच्यं तत्र अ

व्यवच्छेदाप्रतीतौ विशेषणादेः पर्य्याप्रतीतौ च स्वरूपेण प्रतीतिरप्रयोजिकेति व्यवच्छिन्नप्रतीतिर्वाच्या तत्तश्च व्यवच्छिन्नपृथिवीत्वे द्रव्यव
च्छिन्नजलादिव्यवच्छेदेन पृथिवीत्वसिद्धिरित्यात्माश्रयपरस्परमन्योन्याश्रयाद्यापत्तिसंपादनमिति दिक्॥ स्वप्रान्यप्रतीतिविषयव्याप्यविषय
त्वे विवक्षितेन मित्याशंक्याह ज्ञानाव्याप्नोति वस्तुतो निर्धूमाचलविषयकस्य तत्र धूमेऽचले वह्निज्वलतीति वाक्याभासजबोधस्य
त्वर्थः। अर्थः प्रयोजनं वह्न्यादेर्दाहपाकादि तदेव क्रिया यदा अर्थस्य वह्न्यात्मनः प्रार्थनीयस्य वह्नेः क्रिया वह्निसामग्री वा
सामग्री हि न कार्य्यं व्यभिचरतीत्यवश्यं तस्यां सत्त्वां वह्निस्तिष्ठतीत्याशयः पूर्वदोषेति दाहपाकविशिष्टस्य कृशानोः स्वसा
मग्र्याश्च स्वप्रविषयत्वसंभवादनाप्तवाक्यप्रबोधस्य च तथाविधस्य दुर्वारत्वादित्याशयः व्यापकविषयस्य व्याप्यविष
यत्वमविसंवादः किं वाव्याप्यविषयः प्रत्ययस्तदनंतरोत्पन्नव्यापकप्रत्ययस्याविसंवादस्तत्र नाद्यः कार्य्यकारण
योरयोगपद्यात् योगपद्ये कार्य्यकारणभावभंगापत्तेः नापि द्वितीयः भिन्नविषयस्य प्रत्ययस्याविसंवादित्वायो
गात्। अथ व्याप्यविषयः प्रत्ययो व्यापकप्रत्ययं जनयति स च व्यापकप्रत्ययो व्याप्यमपि विषयीकरोति सामग्रीसत्त्वा
दिति मतेतदपि न वह्निज्ञानस्य वह्निव्याप्यविषयत्वे संवादः व्याप्यज्ञानस्य च स्वव्याप्यविषयत्वेन तत्त्वे तथा तस्य तस्या

पीतिवाच्यं तत्राह एकदा सर्वत्र प्रमाणसंभवेनेति एकदा सार्वत्र्यं विना तावतां व्याप्यानां ज्ञानासंभवे आश्रयणं तथा
चैकदा यस्य व्याप्यस्य ज्ञानसामग्री तदा न व्याप्यं ज्ञायत इत्यसार्वत्र्योपि नानुपपत्तिरित्याशयेनाह क्रमाश्रयणे चेति
तथा चाल्पज्ञानं पंक्तिज्ञानं च कस्याश्चिन्मन्यस्य योग्यताज्ञानादिसंवादाद् व्याप्त्यापातो वेत्याह किंच प्रतीयमानवास्तवार्थक्रियालक्षणव्या एकदेशेति
प्यविषयत्वमविसंवादः उत वास्तवत्वं त्वादिविधुरप्रतीयमानार्थक्रियाविषयत्वमिति विकल्प्याद्ये ऽसंभवमाह वास्तवेति प्रतीतत्वव्यति
रेकेणावास्तवत्वासिद्धेः अद्यापि प्रमितेत्वसिद्धेर्वास्तवत्वासिद्धेः ततश्च प्रतीयमानव्याप्यविषयत्वानुभवात् प्रमेति व्यवहारः स्यात् तत्रश्चा
प्रमायामपि तदस्तीत्यतिव्याप्तिरित्यर्थः तथाहुरत्नत्रय धर्मकीर्त्तिरिति शेषः अर्थक्रियास्थितिरिति अर्थक्रियासत्त्वं तच्चार्थक्रियाकारित्व
मिति यावत् न च स्मृतावतिव्याप्तिः स्मृतेस्तन्मते विसंवादाभावात् प्रत्यभिज्ञावत् न च तृतीयविकल्पेनास्पयोनदूरत्वं तत्र व्याप्यत्व
पुरस्कारेणोद्भावनमिह अर्थक्रियात्वेनेति भेदात् सामान्यत इति भ्रमविषयः शुक्त्यादिरपि शुक्तिप्रभृतिकार्यकारीत्य
र्थः अथ शुक्तित्वादिना तथात्वेपि प्रतीयमानेन रूपेण रजतत्वेनातथात्वान्नातिव्याप्तिरित्याशंक्य निषेधति प्रतीयमानेति
मितभाविरूपं तु सामान्यतो रजतत्वादिना अर्थक्रियाक्षमत्वं यद्यपि शुक्तिरजतस्याप्यस्ति तथापि प्रतीयमानेनभ्रु

क्तिसंभिन्नरूपेणक्रियाद्यर्थदक्षमता नास्तीति चेदित्थं तस्यार्थद्वयमुक्तं न त्विसंप्रतीयमानं रूपं रजतं तदर्थक्रियासमर्थमेव शुक्तित्वादिना तथा
त्वेपि न हि शुक्तिसंभिन्नं तत् कदापि अन्यथाख्यातिमात्रस्वीकारात् यदापि अनिर्वचनख्यातिस्तदापि संभेदोऽनिर्वचनीय एव न तु
विद्यमानोपि भ्रमस्य प्रमात्वापत्तेर्बाधानुपपत्तेश्च विषयस्य विशेषदर्शनजन्मना ज्ञानेन ध्वंसेनेह रजतमिति तदाकारेण
स्यात् तस्याश्च रजते ध्रुवमिति । दुरवधानत्वा[illegible]दिति अर्थक्रियाशक्तिरतीन्द्रिया फलैकोन्नेया कथं मूलात् प्राक् प्रमातुः श
क्येति भावः । दृष्टाप्यर्थक्रिया अंगुरीयाद्या क्रियात्मिका किं रजतत्वादिरूपेणान्येन वेति दुरवधारणमिति भेथिल्लानामप
व्याख्यानं तदर्थक्रियादर्शनादित्युत्तरशंकानुपपत्तेः फलैकोन्नेयाया अस्याः फलेनैव प्रमितिर्वक्तव्येति तदर्थः । अन्वयव्य
तिरेकाभ्यां रजतत्वादिरूपेण तदवधार्यमिति तु तस्यार्थो न श्रोते । विनाप्यर्थक्रियामिति फलं ह्य[illegible]व्यभिचारशक्तिनिर्णये
स्वप्नादौ सत्यपि फलत्वाने पि शक्तेरभावात् घटे नोदकमाहरिष्यामीत्यभिप्रायस्य तत्र बाधो नास्तीत्यबाधि[illegible]बाधितारभिप्रायस्य तत्र बा
धो नास्तीत्यबा[illegible]धिताभिप्रायविषयत्वमेव विसंवादइतिकस्यचिन्मतं दूषयति नदाभिप्रायाविसंवादस्येति स्वप्ने यद्यपि अभिप्रायो नास्ति
तथापि तदभावप्रयुक्तो विसंवादाभावोऽस्त्येव अथवा अभिप्रायद्दष्टसाधनत्वादिना ज्ञानमुदकाहरणादौ न तः पिपासापितज्ञानरू

पापिपासोपशमज्ञानमित्येतत्तत्परोऽयं ग्रंथः स्वप्नस्य जागरे विसंवादोऽस्तीति चेदिहापि स्वप्ने विसंवादोऽस्त्येव वैदिकास्त्वत्र प्रत्ययेन वेति भावः
अर्थप्राप्तियोग्यत्वमर्थस्याविसंवादस्तज्ज्ञोऽर्थानुभूतिः प्रमेत्याशंक्याह एतेनेति स्वप्नेप्राप्यतेति भोज्यं तदनु भोजनं तदनु सुखमित्यर्थः सा प्रा
प्तिः प्रमात्मिकेति चेत्तुल्यं जागरेऽपि तच्च प्रमात्मिका प्राप्तिरपेक्षितातस्याश्च याप्यप्रवर्चनात् आदिपदेन प्रवृत्तियोग्यतापरितत्पादवि
शेषः प्राप्तियोग्यताशेषाविसंवाद इति यदि धर्मकीर्त्तिबौद्धविशेषो ब्रूयात्तदा लक्षणं गोन्मलनेनोन्मूलमैलेनीयोऽयमपि पक्षः विशे
षश्च क्रमविषयव्यावृत्तौ दुर्निरूप इत्याशयेनाह दुरवाध इवेति ननु वस्तुतः पृष्टं प्रमायाः लक्षणं तदबाधितानुभूतित्वं इदं च
निर्विकल्पे व्याप्तिधर्मेऽपि शेष्ठानां तरमेव प्रमारूपं भ्रमस्तु बाधितविषयको न्यत्र वा तदानीमिति भ्रमकालीन भ्रान्तो न विषयाभावं पश्यतीति
भ्रमेऽतिव्याप्तिरित्यर्थः स्वत इति स्वस्य दृष्टिरित्यर्थः न च भ्रान्तेरपि विशेषदर्शनदशायां स्वस्य बाध्येति वाच्यं अज्ञातबाधस्यापि मरणस्थ
वा सर्वजनेति सर्वजनानां ज्ञाने सर्वजनबोध्यत्वं न शक्यं ज्ञातुमित्यर्थः न चेदं ज्ञानं यदि बाधितविषयकं स्यात्तदोपलभ्येतेति योग्यानुपलब्ध्या बा
धसामान्याभावो ज्ञातुं शक्य एवेति वाच्यं एतस्य विषये परबाधस्यायोग्यत्वात् प्रमायाः सम्यक् लक्षणमनूद्य [illegible] दूषयति तर्केत्याद्यलक्षण
मित्यन्तेन अदुष्टं प्रमाया लक्षणं प्रमात्वं जातिरित्यत्र यद्यपि जातिशांकर्यमास्ते साक्षात्त्वेन तद्विसाक्षात्कारिणि भ्रमे प्रमात्वंप

दूषणातिदेशेनैव २

त्रिहिरण्णानुमितेतोनुभासासात्वपरिहारेणप्रमात्वेवर्त्तमानांभासासात्कारिप्रमायांसंकीर्य्येनेतत्प्रत्युद्भूतंजातेर्व्याप्यवृत्तित्वानियमेनधर्म्य
शेभ्रमस्यापिप्रमात्वेनसाक्षात्कारित्वस्यतन्नपरिहारेनाहृत्तेस्तथापि निर्विकल्पकंप्रमाप्रमावहिर्भूतमेवेतिमतेनसांकर्य्याभिधानंयदिचजा
तेर्व्याप्यवृत्तित्वनियमस्तदाअस्तुसाक्षात्वाद्यत्वेनसांकर्य्यमनतांतरेपिपरोक्षत्वेनवापरंत्विदंलक्षणंनभट्टाभिमतंतैः स्मृतित्वानुभूतित्वयो
भ्रमएवसांकर्य्याद्व्याप्यवृत्तित्वयोरिष्टेरिसवधेयंयत्नुमितभाषिण्णं।प्रमात्वाप्रमात्वयोरसांकर्य्यमवश्यमेष्टव्यंमन्यथाभ्रमेतिव्या
प्याप्तेरित्युक्तंतत्रेष्टापत्तौकोदोषःयवस्यापितर्हिधर्म्मिविशेषेप्रमात्वंतत्रव्याप्तीतिशंकनीयंतथाप्यनुभवत्वेनसहाव्यूनानति न
रिक्तवृत्तितयाप्रमात्वेनजातिःस्यात्तस्मात्प्रमात्वंजातिरितिसिद्धंतत्प्रमात्वंनास्त्येवभ्रमइत्येवमतंअस्तिन्दोषेसत्यपिदोषांतर
न माहात्स्येनेति।भ्रमसंशयाविनियद्यपितैर्नव्यवहारएवेतितन्नज्ञानेनकिंचिद्बाधकंतथापिअभिज्ञापिअभिवदनवव्यवहार
पदार्थइतिमतेनेदंभ्रमजन्यव्यवहारपरोग्रन्थः।अजायमानभ्रमसंशयप्रमाव्यवहारइतिदोषेसत्यवश्यंभ्रमसंश
जो योस्यानोसत्सांसर्ग्गिकार्य्यानुपादानात्नचैवंयतएवतत्रप्रमात्वनिश्चयइत्याशंक्याहयत्रप्रमाव्यवहारोपिनजायतेकिंतु
ज्ञानमात्रंज्ञायतइत्यनुभवसिद्धं।अत्रचपरतःप्रामाण्यप्रामाण्यवादिनोनैयायिकाअपिसाक्षिणःतर्हिजानामीत्येवं

प्रत्यक्षजे ज्ञानं मे वोदाहार्य्यो। ज्ञानस्यातीन्द्रियतया तद्वृत्तिजातिर्न योग्येति चेन्न मुरारिमते ज्ञानस्य प्रत्यक्षत्वाज्ज्ञानमेवेदं
दृश्यते नैयायिकवैशेषिकयोर्जातिसांकर्य्यस्य जातिबाधकत्वात् प्रभाकरस्य गुणे जात्यनंगीकारात् धर्म्मिवदिति प्रमात्वाश्रयवदि
त्यर्थः। अथ रजतत्ववच्छिन्नसहकृते मनो नेयं प्रमात्वं तदज्ञानान्तज्ञायत इति न संशयाद्यनुपपत्तिः अस्तु वा विशेष्ये वनुमेयमेयमेकतान्
योग्यवृत्तिजातिः प्रत्यक्षत्वनियमानंगीकारात् प्रमाया अतीन्द्रियत्वस्वीकाराद्वायस्यास्य ज्ञौ ज्ञानायामपि प्रमात्वसंशयादिः सानयो
ग्या ज्ञानस्य प्रत्यक्षयोग्यतापि विषयांतरसंचाराभावप्रसंगेन कस्यचिज्ज्ञानस्यायोग्यत्वमित्याशयेनाशंकाचिन्न सापेक्षाणि लक्ष
णीभूय व्याप्तीभूय स्थितेन ज्ञापनमनुमितिजननमित्यर्थः। नच्चिन्नमनुगतं चेन्नहि तस्याविज्ञायमानस्य प्रमात्वव्यंजकत्वे तत एवेयं प्रमा
इयं प्रमेत्यनुगतबुद्ध्युपपत्तेः प्रमात्वं न जातिः अननुगतत्वे ताहृते षामिति कानि तानि नानारूपाणि तत्त्वानुभूतित्वादीनि
अथ भ्रमप्रमायोः कार्य्ययोर्वैलक्षण्याद्विलक्षणकारणजन्यत्वमवश्यं वाच्यं तत्र यस्माद्यस्मात् कारणगुणात् प्रमाया
जन्मतज्जन्यत्वमनेकरूपमेव तच्चिन्नभिन्नाशंक्याहृ प्रामाण्यपरत इत्यनिरूपयिष्यमाणत्वादिनीश्वराभिसंधाविति शेषः।
गुणस्य न प्रमाहेतुत्वं मानाभावात् दुष्टकरणात् कुतो न प्रमेति चेत् दोषेन प्रमाजननशक्तेः तत्सारण्यात् अदृष्टे हि करणे

प्रमाशक्तिस्तिष्ठतीति ननु किंप्रमाशक्तिरीश्वरमात्रशक्तितोऽन्या आद्ये शरदवगुण इति चेन्न गुणो हि प्रामाण्ये हेतुरिति भवन्मतं शक्तिस्तु कारण
तेति महतो विशेषात् विनापि च गुणं प्रमाणस्येश्वरज्ञाने सत्वात् जन्यज्ञानप्रमात्वं गुणजन्यमिति चेन्न तद्वदेव दोषवत् करणजन्य
ज्ञानवृत्तितायाः प्रामाणिकत्वेन भ्रमेतरस्याप्रभावसिद्धिरित्याद्याशयेनाह विस्तरेणेत्यादिना एवमप्रमायाः लक्षणं शक्ति
विशेषश्चेत्यनूद्य दूषयति एतेनेति वक्ष्यमाणेन दुरवधारणत्वहेतुनेत्यर्थः विशेषः समर्थप्रवृत्तिजनकत्वं अज्ञातज्ञापनश
क्तिरिति तु मितभाषिणां दुरवधारणत्वादिति अनुगतरूपं विना शक्तिः परिज्ञातुमशक्या यदि चानुगतं रूपं शक्यं वक्तुं
ला तदा तदेव लक्षणमस्तु न च शक्यं तद्वक्तुं सर्वस्य दूषितप्रायत्वादिति भावः । अथ प्रमात्वमखण्डोपाधिः अज्ञातार्थपरिच्छित्तिर्वा
सच प्रवृत्तिसामर्थ्यादिना ज्ञायत इत्याशंक्य सर्वप्रमालक्षणानां साधारणदोषमाह यद्वा किंचिदिति वस्तुतो नन्वेवमपि प्रमालक्षणं न प्र
मितमिति वादिनिः स्वरूपतः प्रमितिरिति वक्तुमशक्यत्वादित्यर्थः । वैयर्थ्यमेवाह वस्तुत इति । लक्षणं व्यतिरेकिलिंगत्वात् कथं स्वरू
पसद्भाविकमित्यादि वक्तुं वक्तुं शक्यमपि नो तैव तावदभिधेयत्वमुपसंहरन्नाक्षिपति । इति प्रमाणलक्षणखण्डनानि । हेतुत्वं कर्तृत्वप्र
तिव्याप्तमिति कारणानां तादृशार्थत्वेति अन्तरपदानुपादाने कर्तुरपि कारकेष्वपि चरितार्थता नास्तीति कारकाचरि

तार्थहेतुत्वकरणापारत्वं तस्यैदं कर्तृकारकं हि स्वातिरिक्ते करणकारके जाते चरितार्थं कृतकार्यं फलाय तूदासीनमिति
यावत् ननु करणं कारकांतरमुत्पाद्य चरितार्थं तस्य साक्षादेव फलहेतुत्वात्। एतावता फलानुकूलकारकाजनकत्वं करण
त्वमित्युक्तं भवति तच्चाकाशादावपीति हेतुत्वं विशेष्यमिति भावः। ननु तथापि कुठारादिरूपकरणनिष्पादकत्वं कर्तुर्न सिद्धं तस्य
कर्तृव्यापारेण तत्प्रागेव सत्त्वादित्याशंक्याह नादृशस्य च तस्य करणत्वादिति तथा च विशेषजननद्वारा विशिष्टस्यापि कर्त्ताजनकः
विशिष्टस्याति[illegible]रिक्तत्वादिति भावः विशिष्टस्यानतिरिक्तत्वे तु कारकांतरव्यापाराजनकत्वमेव कथयिष्यतीति तदभावे हि क
रणव्यापार एव न निष्पद्यत इति करणव्यापारो ह्यहीति उद्यमननिपातनादेश्छेद्यविषयत्वादित्यर्थः एवमन्वयमभिधाय व्यतिरेकमाह क
र्माभाव इति यद्यपि चोद्यमननिपातनेन कुठारक्रियेयं न स विषयेन वा तयोश्छेद्यं कर्म कुठारस्यैव तत्त्वात् न हि च्छिदामुद्यच्छतीति निपातयतीति
कथयंति अपि तु कुठारमेव तथापि निर्देशं ति तथापि न उद्देश्यकोयं व्यापारविच्छिदेरर्थ उद्देश्यता व्यापारेण पते वा व्यापारविषयत्वेनोच्यते
ननु कर्मैव व्यापारकर्मेति यद्यपि च्छेद्यापि न कर्मजन्या किंतु तज्ज्ञानजन्या तथापि विषयस्यापि विशेषणतया जनकत्वं वैशेषिक
गुणस्सत्त्वं तथा च गुणभाष्यं सुखमिच्छा[illegible] दुःखं द्वेषः नैः प्रयत्नं स च क्रियामिति एवमधिकरणस्यापीति कर्तृकर्मणोः करणव्यापारनिर्वा

१७३

हृह्स्रोः स्थितिसंपादकं तथा देशकालरूपमधिकरणं कारकांतरे चरितार्थं स्थालीस्थमधिकरणं तु कर्ममात्रस्थितिहेतुत्वादित्यर्थः । संप्रदानेत्या तेरितार्थ
द्दिदानविश्लेषक्रियैव संप्रदानापेक्षा यस्मै सम्यक् प्रदीयते तत् संप्रदानं विश्लेषावधिरपादानमिति तयोस्ताभ्यामंतरेण निष्पत्तेः नतु सर्वा
क्रिया । एतावता निर्व्यूढं लक्षणमाह कारकांतर इति । इदं लक्षणं नयुक्तं कर्त्रादिव्यापारस्यापि फलपर्यंतस्यापि त्वानुभवात्तस्य
कारकांतरे चरितार्थत्वव्याख्याने युक्तं तथा हि देवदत्तः पलाशे छिनत्तीति देवदत्तस्य कर्तृनयातस्य पूर्वक्षणे अवश्यं व्यापारितयाऽव
स्थितिरेष्टव्यात लक्षणत्वात् कारकस्येति विद्यासागरस्तन्नयुक्तं करणव्यापारनिष्ठाद्यनंतरं तद्व्यापारस्यानुपलब्धिबाधितत्वात्
करणव्यापार एव तद्व्यापारोऽस्तीति चेन्न तथापि तस्य कारकांतरव्यापारजनकत्वमव्याहतमेवेति कथमतिव्याप्तिः । मैथिलास्तु
कारकांतरपदस्य करणपरत्वे आत्माश्रयः तथा सार्वत्रिकत्वं च तस्य न व्यक्त्यभिप्रायेण बाधान्नापि करणत्वेन तदनिरुक्तेरिति नाद्यः सं
कारकांतरपदस्य कर्तृकर्मभिन्नकारकपरत्वात् सार्वत्रिकत्वं च संप्रदानापादानेतरत्वमिति न द्वितीयोऽपि । एतेन यथादि विषयतया कर्मकर
णे चरितार्थं तथा करणमपि कर्तृव्यापारविषयतया कर्तरि चरितार्थमित्यसंभव इत्यपास्तं तथापि कर्तृकर्मभिन्ने चरितार्थत्वाभा
वादेवेति । अत्र ब्रूमः कर्मकरणव्यापारेण चरितार्थं तयोक्तं सा न युक्ता लिंगकरणतादोषदुष्टत्वात् किं च कुठारकर्तृकायामनु

175

पत्नौकुठारस्यासिद्धतयाव्यापाराजनकतयाकरणतापत्नौकुठारेणभवतीतिस्यात्सिद्धकर्तृकक्रियाहेतुत्वस्यविवक्षायांमृ
दाघटोभवतीत्यत्राव्याप्तिः किंचकारकांतरेऽचरितार्थस्यहेतुत्वलक्षणवाक्यस्यनेदंव्याख्यानंव्याख्येयस्यसार्वत्रिकपदस्ये
ष्टाभावात्तथाचलक्षणवाक्यांतरमेवेदमित्याशयेनग्रंथः व्याख्यानमितिपदपदार्थानांविविच्यकथनंहिव्याख्यानमुच्यते। अन्यो
रंतरंमहदित्यादावंतरस्यशब्दस्यविशेषोवाच्यः सचेदिहविवक्षितस्तदाननवच्छेदकोनयावत्वैकइत्यंतरशब्दस्यवैयर्थ्यमित्याशयेनाह
अंतरशब्दइत्यादि कारकेऽचरितार्थइत्युक्तएवहिकारकविशेषाजननालभ्यतेनहिकरणादिविशेषमपास्यकारकसामान्यं
विर केनजन्यतेयन्निषेधेनविशेषणमर्थवत्स्यादित्यर्थः। अन्यवचनइतिदृष्टोहिपीतघटाद्घटांतरमित्यादौतत्रप्रयोगः। समभि
व्याहारादितिकरणत्वमितिलक्ष्यपदेनेतिशेषः इत्यादावित्यादिपदेनगोलकमन्यदन्यदिंद्रियमित्यत्रैवेत्युक्तंभवति। अनिव्या
प्तेरेवेतिकर्त्राहिकरणएवचरितार्थोनतुतदतिरिक्तइत्याशयः। स्वरूपोपदानेपरइतितत्रानुपपत्त्यकइत्यर्थः अंतरग्राह्योऽन्य
१ मात्रेऽव्याप्तिनतदुभयात्मकान्यमात्रपरंनचात्राप्यव्याप्तिस्तदाश्रयः करणान्यत्वेनाबोधनादितिताभ्यांभेदेतिनकर्त्राकर्मवाखास्मिन्नन्यो
न्यस्मिन्वाचरितार्थइतितयोरेवातिव्याप्तिरित्यर्थः नापिकर्तृकर्मणीइतिअत्राप्यव्याप्तिसामान्यवाच्यपितदुभयप्रतियोगिकभेदा

अजन्यादित्यर्थः । अत्र कारकांतरदित्यस्य कर्तृकर्मभिन्नमित्यर्थः । स चाधिकरणादिकारकात्मको यद्यपि तथापि कारकत्वरूपेणालाभाद
ऽप्रवेशान्न व्यर्थत्वशंका । नहि कारके अचरितार्थत्वमित्येवं प्रतीतिः कर्तृकर्मव्यतिरिक्ते ऽचरितार्थत्वमिति प्रतीतिरेव समाना
धिकारेति यद्यपि तथापि अंतरशब्दस्य कारकशब्दसमभिव्याहारे व्यक्तत्वेन तत्र एव सर्वसामंजस्ये अधिकशब्दप्रयो
गो नुचित इत्यभिप्रायेणाह न प्रयोक्तव्य इति तथा सतीति तथा सत्यपीत्यर्थः तथा चांतरशब्दसहितेऽप्ययं दोषो स्त्येवेति ध्येयं
हस्तादीनि तथा च देवदत्तो हस्तेनाग्निनापचतीत्यत्र हस्तेनेति तृतीयाऽऽदिपरग्राह्ये च पञ्चाम्नुपानज्ञां यातीति च न
प्रयुज्यते इति भावः व्यापारवत्कारणमिति व्यापारवतः कुठारस्य पर्यायो कारकत्वनिरासाय कारकपदं नत्रापि तत्त्वेति
शेषपूरणेन तन्निराकरणं बोध्यमिति विद्यासागरस्तादसत्त्व जन्यत्वे सति तज्जन्यजनकस्यैव पवित्रं प्रतिकुठारे ऽभावात् व्यापारस्य
३ परं तु कारणपदं स्वरूपकथनपरं यद्वा दंडघटाविति प्रत्यक्षे घटोपि दंडव्यापारः स्यादिति कारणपदं तच्च व्यापारिणो
य रूपावच्छिन्नं प्रति जनकत्वं विवक्षितं न च दंड प्रत्यक्षत्वावच्छिन्नं प्रति घटकारणत्वं चेति नातिव्याप्तिः अग्नेः का
त रकत्वे [illegible] त्वेन तत्र [illegible] व्याप्तिः स्यात्तद्वत् नुनास्तीत्याशंक्याह शिवेति यथा चक्षुर्घटसंयोगो व्यापारस्तथाग्ने

स्थालीसंयोगो व्यापारः अन्यथा अग्निना पचतीति प्रयोगाभावप्रसंगादिति भावः। आदिपदाद् द्रुतत्वं ज्वलनावयवसंयोगपरंप
रया तंडुलोदकसंयोगोपि परिगृह्यते। तत्र हेतुत्वमेव तेषामिति तथा च कारणविशेषः कारकं न तु विशेषः करणमतं कारकत्वा
भावात् तद्व्यापारस्य करणत्वस्याप्यभावद्व्यापाराशयः हस्तादेश्च यद्व्यतिरेकादन्यथासिद्धेन कारणताग्राहकाविरहाद्धेतुहेतुत्वं
हस्तादीनामिति हेतुहेतुविषयादित्यर्थः। देहस्पंदादिरित्यादिपदात् करचालनं कुठारव्यापार उद्यमननिपतने आदिपदेन तस्य
त्व कर्मणि संयोगः परिगृह्यते। पूर्वोक्तव्यर्थदूषणेऽनुशयवान् अव्याप्तिप्रसंगाद् व्याप्तिमाह एतेनापीत्यपिशब्दः पदपदार्थान्तरं योज्यः
अग्निहिकर्तृकर्मव्यतिरिक्तो हस्तादिजन्यद्रुतिहस्तसंदावकरणत्वप्रसंगेनेत्यर्थः न्यायभाष्यवार्त्तिकटीकानिबंधेनुसंधानि
कृतस्य साधकतमं करणमिति पाणिनिसूत्रगततमेरर्थस्याद्यमर्थं दूषयित्वा द्वितीयं दूषयति कर्तृव्यापारेऽज्ञानविषये घटा
दावतिव्याप्तिरित्याह कर्तृव्यापारेति तथापि कारणव्यापारविषये कर्मण्यपि नियाप्तिरिति कर्तृपदं। तेन हस्तादावतिव्याप्तिः परिहृ
ता क्रियायाः प्रयत्नविषयता प्रदर्शनाय निष्पाद्यत्वं विशेषणं प्रयत्नसाध्यत्वात् प्रयत्नविषयत्वमित्यर्थः अमुकविषये प्रयत्न
इति साध्यविषयता प्रयत्नस्यानुभवसिद्धेति भावः यदि च शरीरमेव प्रयत्नविषयः क्रियातु तांतरीयकतयोत्पद्यत इत्युच्यते

तद्रूपप्रयत्नविशिष्टं वा शरीरमिति विद्यासागरमतं तस्य शरीरस्य सिद्धत्वेन पुरुषासाध्यत्वेन च प्रयत्नागोचरत्वात् स्वव्यापारस्वहि
वै पुरुषः प्रवर्त्तते चेष्टावत्वेन तस्यापि साध्यत्वं चेष्टासाध्यत्वपर्य्यवसितमेवेति तदसाध्यत्वेन तत् कथं स्यात् तस्मात् चेष्टायाः साक्षात् प्रयत्न
साध्यत्वात् तथा प्रयत्नविषयतयोक्ता यदि प्रयत्नः प्रयत्नवदात्मसंयोगमसमवायिकारणमासाद्य चेष्टां जनयदपि चेष्टासमवायिकारणं
शरीरमपेक्ष्यैव जनयति अन्यथा तदनुपलब्धेः तदा शरीरमपि क्रियाविशिष्टं प्रयत्नेन जन्यते क्रियात्मकविशेषणजनकत्वादित्युच्यते न तद
पि क्रियाविशिष्टं तत् साध्यमिति तत्त्वानिष्पत्तिरित्याशयः। भविष्यतः क्रियाप्राक्कालेऽसतः कारकत्वाभावात् तथा च तद्विशेषः कारण
त्वं कथं स्यात् अपृथक्क्रियाक्रियातः प्रागसती भास्तु कारणं शरीरं तु ननु प्राक्काले सतः कारकं स्यादेवेत्याशंक्याह स्वं प्रतिचेति अ
यं भावः केवलं शरीरं कारकमिष्यते परं तु चेष्टां प्रतिकर्तृवत्तत् न तु कारणं प्रयत्नागोचरत्वात् क्रियाविशिष्टं तु प्रयत्नविषयी भवति
यद्यपि स्वरूपतः प्राक्सत्तथापि क्रियाविशिष्टमात्मानं जनयदात्माश्रयापत्तेर्न जनयितुमर्हति क्रियाविशिष्टस्यात्मनः
क्रियातः प्रागसत्त्वात् सत्त्वे च क्रियाविशिष्टस्य निष्पन्नत्वेन निष्पाद्यत्वाभावादित्येव मत्वा व्याने आत्माश्रयतस्य दोषां
तरानुपपत्तेः तदर्थं येनात्मनासत्त्वं तद्रूपेण न प्रयत्नविषयत्वमित्यकारणत्वं येन च विशिष्टात्मना प्रयत्नविषत्वं

निष्कर्षः।

176

तेनात्मनानस्वस्य जनकं क्रियान एव क्रियाविशिष्टस्योत्पत्तेः यदि च क्रियाविशिष्टक्रियाविशिष्टजन्यं स्यान्नोत्पद्ये
तैव क्रियाविशिष्टस्य सत्वादेवासत्वेकारणेनैवन स्यात् स्वरूपासतो मिथ्यात्वादिति। अस्याति व्याप्तिदोषस्य यद्यपि श
रीरक्रिया मनोव्यापारव्यवधाने न चेतनव्यापारविषय इति तत्र नातिव्याप्तिस्तथापि मनःक्रियाया मतिव्याप्तिरित्याह
साक्षादिति चेतनेनकर्त्रा साक्षादेव मनश्चाल्यते न तु शरीरमिव मनश्चलनद्वारा निश्चले हि मनसि संकल्पहीने शरी
रक्रियाया अदर्शनात् संकल्पश्च हितसाधनतानुसंधानमिच्छा वा स यद्यपि मनोवृत्तिर्न भवति तथापि मनोधीनतया
तथोच्यते मनोधीने संकल्पेनात्मनस्तादृशं कर्मान्तरमपेक्ष्यमिति साक्षाद्व्यापार इत्युच्यते। न हि मनसः क्रियान्तरं संभ
वदपि संकल्पमपेक्षत इति शक्यते वक्तुं तथा च संकल्प एवातिव्याप्तिरित्यर्थः यद्वा जीवनयोनियत्नजमनःप्रमाण
दिक्रियामित्यर्थः साक्षात्वविशेषणे कुठारावतिव्याप्तिश्चेत्याह अव्यापकत्वाच्चेति न हि हितसाधनतानुसंधानचिकी
र्षे विना कुठारे कर्तृव्यापार इति भावः अव्याप्तिरुक्तानासंभवः मनःक्रियायां मनसो विवक्षितकरणत्वसंभवात् यत्तु
कुठारगोचरा क्रिया शरीरव्यापार तत एव तत्र च देवदत्ताद्यात्मकं शरीरमेव कर्तृ तच्च न संकल्पं मनोव्यापारमपेक्षत

इत्तिनकुठारादावव्याप्तिरितितन्न तथा सति ननु क्रियायामेवातिव्याप्तिस्तावदवस्थादिति न वाच्येतन्नो देववदत्तादिः कर्त्तेति नैयायिका
नां मतं तदनुमतकरणत्वं दूषणं चेदमिति ॥ शरीरक्रियायामतिव्याप्तिवारणाय ननु क्रियाहेतुरिति तन्नूपदानुपादाने क्रियाविशि
ष्ट शरीरेऽतिव्याप्तिस्तस्य क्रियां नरहेतुत्वात् ननु क्रियाविशिष्टं तु तन्नू क्रियाहेतुर्न भवत्येव तत आत्माश्रयापत्तेः केवलं शरी
रं तु करणतया लक्ष्यमेव न चैव क्रियाविशिष्टस्य क्रियाहेतुत्वाभावादेव नातिव्याप्तिः क्रियावति क्रियानुपपत्तेरिति किंन
छ्वेने निवाच्यं येषां मते कर्मवत्यपि कर्मान्तरोत्पत्तिस्तन्मते न तदुपादानात् यदा तु न तदादि क्रियाकर्तृव्यापारगोचरे परस्वादौ
पाकक्रियाकरणताऽतिप्रसंगवारणाय तन्नू परं कर्त्रर्थ्यमिति व्याप्तिवारणाय ननु क्रियाकर्तृव्यापारस्य विषय इति अत्र कर्तृपदानुपादा
ने करणव्यापारविषये कर्मण्यतिव्याप्तिः स्यात् तन्नूपदानुपादाने ईश्वरस्य सर्वकर्तृव्यापारगोचरे अधिकरणादावतिव्याप्तिरि
ति तन्नूपरं तदुपसंहारेन नासाधारणकर्तृव्यापारविषयत्वं विवक्षितं अत्र कुठारादेः पठि क्रियाकरणतां प्रसक्तिं निवारयति ननु
क्रियाकरणमिति यद्यपि छिदिक्रियाकरणेऽव्याप्तिवारणाय इदं तथापि न करणमात्रमिह लक्ष्यं किंतु विशेष इति नाव्याप्तिः
(करणलक्षणं) अंकुरादीनामिति तथा च बीजेनांकुरं जानमिति प्रयोगो न स्यात् तथा कार्यकारणपूर्वकमिति व्याप्तिभंगे हू

177

पादित्वानलिंगेनचक्षुराद्यनुमानेनस्यात्सतीहीश्वरेतत्कृतिगोचरतयाबीजादीनांकदाचित्करणतास्यायद्यसाधा
रणकर्तृघटितंकरणलक्षणंनभवेदितिअनीश्वरवादएवदूषणांतरमाहसुषुप्त्यादावितिसुषुप्तौचेतनाद्यतःकर्तुरभावा
त्तद्व्यापारविषयस्यकरणस्याभावेसुषुप्त्यनंतरभाविण्याप्रमायाअकरणत्वप्रसंगःततश्चरूपकारणजन्यतात्ताः
प्रमापरिगणिताभ्यांषेऽप्रमाभ्योबहिर्भूताःस्युर्नचैवमिष्यतेतस्मात्तासांकरणमस्तितच्चप्रत्यक्षादिकमेवतत्रलक्ष
णमिदमव्यापकमितिभावःपरिगणितानींद्रियादीन्येवोपायस्तद्वेदिनसंख्यातेषुप्रत्यक्षादिषुषट्स्वेवेत्यर्थः।एतद्दोष
भियायदिचेतनभोक्तृशरीरमेवकर्तृप्रमायांस्वीकार्यंतेनानातिव्याप्तिरित्याशंक्याहानिप्रसंगादितिसुषुप्तावपिक
र्तृसत्वेऽंकुरादावपिसकर्तृकत्वप्रसंगइत्यर्थइतिविद्यासागरस्यापव्याख्यानमनुवादेचचेतनकर्तृकत्वस्यतैरभ्युपग
मात्बीजेनांकुरःकृतइतिप्रयोगात्तेषांमतेसुषुप्तौजीवनयोनियत्नवत्तःकर्तुस्तत्प्रयत्नगोचराणांचक्षुरादीनामेव
प्रमाणतात्रप्रमायाबहिर्भावःतस्मात्कारणलक्षणंयदिचेतनकर्तृघटितंतदामीमांसकमतेऽव्याप्तिःअथनेदंलक्ष
णंमीमांसकानांकिंतुन्यायविदामेवतथाचनांकुरकरणाव्याप्तिःनवाअसाधारणकर्तृघटितंकरणलक्षणंअधिकरण

देरविस्यात्वापचतीसादिप्रयोगात्करणत्वनिष्ठामेवयदिक्रियाकर्तृव्यापारविषयःकुठारोपिपाकेकरणंस्यादितिननुक्रिया
कर्तुरितिनकुठारस्यननुक्रियाहेतुत्वाभावादेवअतिप्रसक्तिर्नेतिवाच्यंकालोपाधिधियाकुठारस्यापिननुक्रियाहेतुत्वा
न्नुतत्रव्याप्तिमाहसुषुप्त्यादावितिनैयायिकमतेजीवनयोनियत्नेमानाभावान्नचेश्वरकृतिगोचरत्वयैवेंद्रियाणां
करणत्वंसुषुप्तावपिप्रसक्तापत्तेःनचकारणांतरविरहात्तत्रकार्यानुत्पादःसतिकरणेफलावश्यंभावापत्तेस्तस्मात्
फलसमानाधिकरणाकृतिरेवइंद्रियाणांव्यापारःचनालीत्यव्याप्तिःस्यादेवमिश्रवादेस्तिनिदूषणांतरमेवनचभो
क्तेरदृष्टद्वाराचक्षुरादिक्रियांजनयतीतिकर्तृव्यापारगोचरत्वयंचक्षुरादेरितिवाच्यंश्रवेननस्याक्रियाकालेचेतन्यर
त हितस्यापिकर्तृत्वेसुषुप्तावपिचक्षुरादिक्रियाजननप्रसंगइत्यर्थःतस्मात्चेतन्यकालीनाकृतिरेवापेक्षितानचसालीत्य
व्याप्तिरेवेपिनाकरणंकारणंस्यादितिकारणंकिमपिअकरणंनस्यात्सर्वमेवकारणंकरणंस्यादित्यर्थःईश्वरप्रयत्नगोच
त रस्यवीजावयवस्यांकुरेकरणेमिष्टतएवातोनातिप्रसंगइत्याशयेनकुमित्यभिधानेऽनुमतिवाचकशब्दाभिधानइत्य
र्थः।वृथाविशेषणपूरणप्रयासइतिनन्वेवंशरीरक्रियादिशरीरक्रियाकारणंस्यात्तस्याअपिविभागादिकारणत्वात्

नचक्रियाकारणत्वमेवतद्धितथास्तुतन्नपदंव्यर्थमितिवाच्यंतथासत्यपिछिदाकरणस्यभिदाकरणताचस्यादितितन्न
पदमावश्यकंएवंलक्षणमपितत्करणमेवान्यथाव्याप्याप्रापत्तेःकर्तृत्वमितिव्याप्तिवारणायव्यापारविषयपदंकरणव्यापारवि
वृ. षयोर्भिन्नत्वेव्याप्तिवारणायकर्तृपदमितितुक्तंतस्यविशेषणंतन्नपदंव्यर्थमितितेनतत्परमविशिष्यतेतदपिसार्थक्यमितिचे
न्नइदंहितन्नतत्क्रियाकरणस्यविशेषस्यलक्षणंचेन्नदाक्रियासकरणकेतिव्याप्तिर्भंगःअनुगतस्यव्यापकतावच्छेदकभावात्
अतःक्रियाकरणत्वंसामान्यलक्षणमवश्यंवाच्यंतत्रचविशेषणंलक्षणमपितत्क्रियाकारणत्वमेवास्तुतन्नकर्तुरपितत्क्रिया
करणत्वेदात्यभावात्कर्मण्यपिव्याप्तिस्तुवारयितुंशक्यमेवनईश्वरव्यापारविषयत्वात्तथाकर्तुरपिभगवत्कृतिगोचरतामंत
व्यात्तदीयज्ञानसुखादेःकर्तृजन्यतोपपत्तेर्यद्वृत्तितन्नकर्तृव्यापारविषयद्वृत्तिविशेषणंचार्थमितिभावःलक्ष्यमात्रमितितथाचार्था
श्रमितिभावःलक्षणार्थइतिलक्षणपदस्यार्थगुणवत्त्वादेरितिपृथिवीत्वादिजातिमपेक्ष्यतस्योपाधितयागुरुत्वेनप्रवृत्तिनिमित्त
त्वाभावादितिभावःननुप्रवृत्तिनिमित्तंलक्षणमेवेतिमनुक्त्वाज्ञानादेर्वंवदतस्तवनिरनुयोज्यानुयोगइतिचेन्नलक्षणत्वकर्तृक
मीतिव्याप्तेरुक्तत्वात्तथाचास्यलक्षणत्वासंभवात्पदप्रवृत्तिनिमित्तत्वमेववेत्यर्थान्तरतावदवस्थमितिभावः।उक्तलक्षणस्यप्र

वृत्तिनिमित्तत्वमपि नास्त्येकारले कर्त्तरि कर्मणि च गतत्वात्। यदि च तयोरप्येतादृशधर्मस्य प्रवृत्तिनिमित्तत्वात् करणपदवाच्य
तानतदावस्तुत्वं करणपदप्रवृत्तिनिमित्तमभ्युपेत्याकरणस्याधिकरणपदवाच्यत्वमेव तन्नामित्याहापि चैवमिति प्रवृत्तिनि
मित्तमपि व्यवहारानुसारि वाच्यं ननु यत्किंचित्तत्पाशयेन शंकते स्यादिति सत्त्वं घट इति ज्ञानतोपि छिदाकाले सन्निहितोपि घटेन छिन
त्तीति व्यवहाराभावादित्याशयेन हि यदि सर्वत्र वस्तुनि करणव्यवहारः स्यात् स्यादेवमिति संबंधः। तदुक्तलक्षणमपीत्यत्र प्रवृत्तिनिमि
त्तमिति शेषः सर्वत्र कारण इति तदुक्तनिमित्तस्य सर्वकारणवृत्तित्वादिति कर्तृतावदिति तावद्धातृकर्मापेक्षया तथा च कर्त्तरि करण
व्यवहारेपि सिद्धे कर्मण्यपि कारणत्वलिंगेन करणव्यवहारः सेत्स्यतीति भावः। आप्तप्रामाण्यादिप्रसंग चरणसूत्रे प्रमाणपरं वेदकर्त्ता
दिप्रयुक्तमिति भावः। वामबुद्धेरिति यदृच्छया व्यवहारोपपर्दिकत्वं वामबुद्धित्वमिति निमित्ताः वामबुद्धिः कोमलबुद्धिश्चतत्वबु
द्धिर्वा उभयोरपि विजिगीषया भ्रांत्या च तदभिधानसंभवादिति विद्यासागरः वामे प्रतीपे प्रतिकूले वा भावा बुद्धिर्यस्य परोक्त
प्रतिक्षेपे बुद्धिर्यस्येत्यर्थः लाक्षणिकं लक्षणसूत्रं तत्प्रसिद्धं कर्त्तृकरणयोस्तृतीयेति सूत्रेण प्राप्तमित्यर्थः [illegible] लोपः शाक
ल्यस्येति लक्षणसिद्धस्यापि तथा गतोऽइत्यादेव प्रयोगस्तथाह न हि सागत्योरिति गतावनुशिष्टोऽहं तिकेवलोहं तिर्यथा

१ [illegible]: त्रैर्ष्मति व्याप्तमिति प्रयोगव्यवच्छित्रत्वं विशेषणं क्रियापर

न ग्रामं गच्छतीति वत्प्रयुज्यते तथाऽहापीत्यर्थः। शंकरमिश्राणां तु यद्यपि करणपदप्रवृत्तिनिमित्तत्वं तथापि न लाक्षणि
कत्वं तथापि तथा प्रयोगादिविषये प्रयुज्यमानत्वमेवेह त्वात् लाक्षणिकत्वं विवक्षितमित्यस्तान्त कृतं व्याख्यानं इहेयं किं च तथा प्र
योगादिविषये प्रयुज्यमानत्वं चेल्लाक्षणिक पदार्थ[illegible]त्वात् प्रयुज्यमानत्वप्रयुज्यत इति व्याहतं तदभावे प्रयोगाभावे त्वेत्यु
ङु क्तिवर्णुक्तलाभिप्रायं वक्तुर्वे च नं कर्मणि करणव्यवहारः प्रयोगातिरिक्तो न शक्यवचनः तत्वेह त्वेयेवानभिधाननिरस्तत्था
तृ च प्रवृत्तिनिमित्तत्वं तत्रातिप्रसक्तमिति भावः। [illegible]तीयं करणत्वलक्षणमनुवदति अप्लुतवदितीति संबंधिकरणमि त्युक्तेगुणेति
व्याप्तिरिति निरित्रियेयेत्युक्तं तत्र प्रधानक्रियापरं कारकमात्रस्यैव स्वव्यापारैर्योगव्यवच्छिन्नत्वात्। तत्र्यापि हि कर्त्रादेर्यावत्क
रणं न व्यापिपर्त्ति तावत् क्रियाया अयोगस्तिष्ठति व्याप्रियमाणेतु करणे क्रियाऽयोगो व्यवच्छिद्यते जायत एव क्रियेत्यर्थः योगसंबंध
स्तदभावोऽयोगस्तस्य व्यवच्छेदो अभाव तथा चाऽयोगव्यवच्छेदशब्देन संबंधउक्तः तथा च क्रियया संबंधी त्येतावतैव संबंधेनेत्यस्यार्थ
लाभात् संबंधिनेति पुनरुक्तं न च तृतीयार्थस्य करण[illegible]त्वस्य लाभाय [illegible] संबंधप्रातिपदिकमिति वाच्यं संबंधस्य जन्यत्वे इह संबंधो नास्ति
भेदात् निषेधद्वयसमभिव्याहारात् स्वार्थदिकः संबंधो लभ्यत इत्याशयेन शंकते यदेतिसामान्याभिधानसामर्थ्यादेव विवक्षित

७०

सिद्धिरित्याशयेन परिहरति नेति सामान्यं यत्किंचिद्विशेषमादायैव चरितार्थमिति भावः। निषेधद्वयस्थले नैवमित्याशयेन
शंकते अथेति स्वाभिप्रायं विवृद्यति संबंधीत्यस्येत्यादि। खंडनिकोपि स्वाभिप्रायमाविष्करोति मैवं तर्हीत्यादिना इति मैथिलाः
अथवा संबंधीत्यादिग्रंथस्य संबंधोस्यास्तीति इन्प्रत्ययो वर्त्तमाने संबंधे प्रयुज्यते तेनाभिधानदशायां वर्त्तमानसंबंधसत्त्वे संबंधीत्व
तो लभ्यते लक्षणांतरे संबंधिनापीति तदयोगव्यवच्छेदाय विशेषणं सार्थकमित्यर्थः। सूत्रे लिंगं कालः संख्या चातंत्रमिति
स्मरणात् संबंधमात्रमेव प्रत्ययार्थ इत्याह न कालविशेषसंबंधिनाऽभिहितेति। अयमन्यायबलाद्वर्त्तमानकालसंबंधलाभइ
त्याशंकते अथोच्यत इति संबंधसामान्याभिधायिनोपि प्रत्ययस्य यत्किंचिद्विशेषमादाय पर्य्यवसानमिति कालविशेषनियते
संबंधे पर्य्यवसाने सति यस्मिन्कस्मिंश्चित्क्रियाकाले वर्त्तमाने क्रियावर्त्तादावतिव्याप्तिवारणाय पदांतरमुपादेयमिति भावः
मैवमिति अयोगव्यवच्छेदस्यापि यत्किंचित्कालायोगव्यवच्छेदपरत्वेनैवोपपन्नो न सर्वकालायोगवादपरत्वमिति कर्त्रादा
वतिव्याप्तितादवस्थ्यमिति भावः। अयमिह खंडननिष्कर्षः संबंधि अयोगव्यवच्छेदपदाभ्यां कालद्वयसंबंधित्वं लभ्यते तच्च
कर्त्रादावप्यस्तीति पुनरपि कालांतरीयासंबंधव्यवच्छेदाय विशेषणांतरं पुनस्तत्रापि तथैवातिप्रसंग इति विशेषणानंत्ये

ऽनवस्थापत्तिः संबंधिपदादाक्षिप्तयोगपदादाक्षिप्तकालान्यकालासंबंधित्वावच्छिन्नसामान्याभावपरमपरं विशेषणसंबंधिपदप्रति
५ पदेति पाद्यातिरिक्तकालव्यवच्छेदपरं वा अयोगव्यवच्छेदपरं तदा हेतुं तत्तरं नाम निगृह्य स्थानमित्यर्थः। कृतमित्यलमित्यर्थे १
नाथमर्थो विवक्षाबललभ्यः किंतु शब्दलभ्य एवेत्याशयेनाह निषेधव्यवच्छेदेनेति निषेधो योगस्य तद्व्यवच्छेदेन तथा च तद्व्य
वच्छेदपदार्थ एव। तथा हि नेह घट इत्युक्ते घटत्वावच्छिन्नप्रतियोगिताकाभावलाभः तादृच्छेदकावच्छिन्नप्रतियोगिताकाभाव प्रतियोगि
बोधकत्वात् यथा नीलघटवति पीतघटाभाववत्यपि तादृशप्रयोगापत्तेरिति भावनिषेधः यत्र भावप्रतियोगिकोऽभावः प्र
तीयते तत्रास्त्वेवं यत्र त्वभावाभावः प्रतीयते तत्र नैवं युक्तं तस्य सप्रतियोगिकत्वाभावात् न हि घटाभावाभावोऽस्तीत्युक्ते
घटातिरिक्तं किंचित् प्रतीयते तद्वदिहापि योगमात्रं प्रतीयते ननु तद्भूतं सार्वदिकत्वमन्यथा तद्घटाभावो नास्तीत्यत्र स्यह
टस्य सार्वदिकत्वमपि सिद्ध्येदित्याशयेनाह निषेधव्यवच्छेदस्येति अविशेषादिति संबंधिपदाद्योगव्यवच्छेदपदस्य सर्वः
यत्र धर्मिणि प्रधानक्रियासंबंधस्य तद्संबंधसामान्येनाधिकरणं नास्ति तत्कारणं कर्त्रादेस्तु नैवमिति शंकते तद्धर्मिकमिति अयोग
व्यवच्छेदपदेनोच्यते इति निर्विद्यते योगो यत्र सोऽयोगस्तन्निष्ठा संसर्गाभावप्रतियोगियोगकत्वं तदभाववत्त्वमर्थः तेन नायं निषेधप्र

प्रतियोगिकोत्यावच्छेद इति नोक्तदोषः तदाविवक्षालक्ष्योयमर्थ इति भावः। कर्त्रादौ तु प्रधानक्रियाभावसमानाधिक
रणप्रधानक्रियासंबंधसत्त्वान्नातिव्याप्तिरित्यर्थः तदयोगव्यवच्छेदपदमिति। तस्यापीति तत्समानाधिकरणस्य संबंधकाले संबंधाभावस्याभावा
देवासंबंधस्वीकारात् कर्त्रादावतिव्याप्तिरित्यर्थः। यावत्सत्त्वमिति यद्यपि एतल्लक्षणप्रविष्टपदार्थ इति हेत्वंतरं निग्रहणस्थानं तथा
पि अप्रतिभयैवायं निग्राह्यो नान्यथेति तदुपेक्षणे तर्हीति न चायोगव्यवच्छेदेनेत्यस्यानन्वयः संबंधिपदत्यागेस्यादित्यत आह तदुपात्त
मित्याशंक्य संबंधिपदोपात्तं धर्मिस्वरूपमेव विशेष्यमस्तु संबंधपदं त्वप्यनामित्याशयेन तदेव प्रकटयति यद्विशिष्टमिति उपल
क्षितमिति यद्यपि विशेषणत्वसंभवे नोपलक्षणत्वं न्याय्यं तथापि तृतीयेयं विशेषणे उपलक्षणे वा उभयथाप्युपपदविभक्तिः
प्रकृते च विशेषणत्वमसंभवि प्रथमक्षणसत्ताविशिष्टे क्रियासंबंधाभावात् सत्ताविशिष्टाकारेण तायाश्च खंडितत्वेन तद्विशेषक
रणतानुपपत्तेरित्युपलक्षितपक्षस्याश्रितः उपलक्षणतावच्छेदकं तु नानेन व्यापारवत् कुठारत्वादिकमेव इति ध्येयं अयोगव्यवच्छे
दोपलक्षितधर्मित्वापेक्षया लघुलक्षणमाह संबंधी त्वेव वा इति तथा यावत् सत्त्वं क्रियासंबंधित्वेनेत्यर्थः तथा च दंडी रिणो वृद्धा
इति वन्नित्ययोगे मत्वर्थीयविधानादेवायमर्थो लभ्यत इति भावः ननु गुरोरपि लक्षणं तं न दुष्टं वस्तुतो यथासन्निवेशनवैयर्थ्यमन्य

181

धियावत्सत्वं क्रियासंबंधित्वं अन्यथा योगव्यवच्छेदेन संबंधित्वं असत्तुवा संबंधिपदं संबंधमात्रपरं अयोगव्यवच्छेदेनैतस्य यावत्
सत्वमिति तत्र च विशिष्टमेव लक्षणं धावत्सत्वं क्रियासंबंधित्वमित्याशंक्याह यमर्थ इति । निषेधसमभिव्याहारालभ्येप्यर्थे समभि
व्याहारलभ्याभिमानलरूपयाकुसृष्ट्यान्यर्थः । एवमिति रोहिण्यासत्वे कृत्तिकोदयक्रियया अयोगव्यवच्छेदेन संबंधित्वा
दित्यर्थः अतिव्याप्त्यंतरमाहानंतरेति पूर्वभावि चतुर्दशनक्षत्रस्याक्तमयः अनंतरभाविनश्च तुर्दशनक्षत्रस्योदयं प्रति
कारणं स्यादिति संबंधः एतदुक्तं भवति अभिजिता सहाष्टाविंशतिनक्षत्राणि तत्र सपादनक्षत्रद्वयमेकैकस्मिन्राशौ
गच्छति उदयराशिमारभ्य षष्ठराश्यंशे ऽस्तमयः एवं षष्ठराशिषु चतुर्दश चतुर्दशनक्षत्राण्यस्तं यांति अनंतरराशौ
पंचदशसंख्यावच्छिन्ननक्षत्रस्योदय इति एककालीनयोस्तयोः कार्यकारणभावेपि कारणत्वं स्यात् । स्वभावसंबंधा
त्मिकायाइति अनोपाधिकसंबंधरूपायाः कालिकी हि तत्र व्याप्तिः सैवैरेव घ्यत इत्यर्थः यदाहुर्भट्टचरणाः यो
यथा नियतो येन यादृशे यथाविधः । स तथा तादृशस्यैव तादृशोन्यत्र बोधकः । अयमर्थो यो भावो येन यादृशेन यद्दे
शकालवर्त्तिना यथा येन प्रकारेण संयोगसमवाये कार्यसमवायकार्यकारणभावादिना केनापि संबंधेन सादात्

परं परयावा नियतत्वेन दृष्टान्तधर्मिण्यवगतः स तादृशो धर्म्यन्तरेऽप्युपलभ्यमानस्तादृशं तद्देशकालवर्त्तिनं तथाविधसं
बंधेन संबंधिनमनुमापयति यथा धूमो त्रिशिखरवृत्तिरुत्कृष्टत्वेनातिदूरवर्त्तिना वह्निना नियतस्तथैव तं गमयति नदीपूर
स्त्वधुना ततोऽभ्यासगतस्यातिदूरवर्त्तिवृष्टिं तद्वयस्तु चंद्रुगतः समुद्गतां तत्कालवृद्धिं नत्सेवनभोमध्यस्थितिस्तामेव
पंचदशनाडिकातिक्रान्तां तादृश्यात यातस्यानियतत्वादिति । एवं कृत्तिकोदयरोहिण्यासत्पादेऽप्यौत्पत्तेरेव स्वभावसंबंधः । संबंध
परं सामान्यशब्दमपीह विशेषपरमित्याशयेनाह अथेति । निर्वृत्तः दोषोद्धारप्रयासाभावात् स्वस्थ इत्यर्थः । ननु सा
मग्र्यपि करणमित्यस्माभिः करणलक्षणवादिभिः स्वगुरुमुखादाकलितं गुरवस्तु श्रद्धेयवचसो भवन्तीति चेन्नहि
श्रद्धयाभवतेदं गुरुगृहे प्रतिपन्नं अस्माभिस्तु यदा सभामध्ये तस्याः करणत्वाभावो व्यवस्थाप्यते तदा नैवं शक्यं वक्तुं ते
मद्गुरवोऽस्मिन्नर्थे प्रमाणं का प्रतीतस्याप्तत्वासिद्धेः अतः प्रकरणपूर्विकां श्रुतिपरमेश्वरवाक्यं किंचित्पठित्वा
त्वद्गुरुरुक्ते श्रद्धां जनयिष्यति संवादेन प्रामाण्यव्यवस्थापनात् न चैतादृशं वेदवाक्यमस्तीति भावः । हन्तेति खेदे किम
र्थं परिहससि तत्रातिव्याप्तिसंभावनेव कुतः कारणताया एवासत्वेन सतस्तत्प्रयोगव्यवच्छेदे विशेष्याभावाद्विशिष्टल

क्षणं नास्ति सामग्री हि कारणानां मेलकरूपं कारणं तु समवाय्यसमवायिनिमित्तरूपेण प्रसिद्धं ननु तर्हि का सामग्री
समग्राणां कारणानां मेलकमिति संभवि अनंततोऽदृष्टजनकस्य चिरध्वस्तस्य कारणं तरेण मेलकासंभवादित्याशंक्य सामग्री निर्वक्ति
यदनंतरमिति कर्त्तव्यता व्याप्तिवारणाय भवेत्येवेत्येवकारः अत्र विद्यासागरः करतलानलसंयोगादिरूपसामग्र्यां सत्यामपि
दाहप्रतिकूलमंत्रादिसद्भावेन कार्य्यमुत्पद्यत इत्यव्यापकमिदं लक्षणं न च तत्र प्रतिकूलमंत्राभावात्मककारणाभावान्
सामग्र्यभाव इति वाच्यं प्रतिबंधाभावो न कारणं प्रतिबंधकाभावत्वात् प्रतिबंधकान्योन्याभाववदिति चेन्न सत्यमस्य
वाव्याप्तिस्तथापि अतिव्याप्त्यात्मकं दूषणांतरमाह एतादृशस्येति तदसत् प्रतिबंधकाभावस्याकारणत्वे कार्योत्पाद
स्य दुर्वारापत्तेः न च प्रतिबंधकस्य कार्य्यस्य च विरोधादेव न प्रतिबंधकसत्त्वे कार्योत्पाद इति वाच्यं प्रतिबंधकस्य विरो
धे किं मूलमित्यस्यैव चिंत्यमानस्य कारणाभावं विना अन्यस्य वक्तुमशक्यत्वात् गोत्वाश्वत्वयोरपि विरोधे गवाश्वसाम
ग्र्या विरोध एव मूलमविरोधे क एवं तत्कार्य्यापत्तेः । यत्तु प्रतिबंधकाभावकार्य्योत्पादयोः समसमयत्वान्न कार्य्यका
रभाव इति कश्चिदाह तदसत् अस्तिद्धेः प्रतिबंधककाले च कुतो न कार्य्यमित्यत्रोत्तरादानाच्चेत्यलं तावत् तस्मान्नाव्याप्तिरिति

क्रियाविभागादाविति क्रियाविभागादेरपि विभागसंयोगनाशकसामग्रीत्वापत्तेः न चेष्टापत्तिरेकस्य सामग्री
त्वे सामग्रीपरस्परकरत्वापत्तेः क्रियाविभागस्य विभागः संयोगनाशस्य सचोत्तरसंयोगस्य सामग्रीस्यात् नतु क्रियापि तथा च संयो
गविभागयोरनपेक्षकारणं कर्मेति सूत्रविरोध इति भावः प्रतिसामग्र्येकदेशमिति सामग्र्या एकदेशान प्रतिप्रतिसामग्र्येकदेशमित्स
व्यर्थीभावः। तदकारणेनेति तथा च सामग्र्यां करणलक्षणातिव्याप्तिः। प्राक्कालमिति यावतां कारणानामेककालसंबंधः सामग्री
त्वर्थः नादृश्याश्च प्राक्कालघटितायास्तत्पर्थः प्राक्कालस्य यतः प्राक्कालसत्त्वं नास्त्यात्माश्रयापत्तेरतः समग्र्याश्रयापि प्राक्कालस
त्तात्मकं कारणत्वं नास्तीति कथं सामग्र्यां करणलक्षणातिव्याप्तिरिति शंक्यं किंतु भावः। तत एवेति कारणं हि सामग्र्यामंतर्भावप्राक
कालस्तु न कारणं तथा च सामग्रीमध्यनिवेशिनं सर्वस्यैव कारणत्वात् तद्घटितयोः प्राक्सत्त्वगर्भकारणत्वं दुर्वारमिति सामग्र्याम
तिव्याप्तिस्यादेवेति भावः। अथैकदेशैककालावच्छिन्नानि कारणान्येव सामग्रीति न सामग्रीलक्षणं यावतां कारणानामेकदेशैक
देशसंभवात्। कतिपयानां तत्त्वस्य चातिप्रसक्तत्वात् किंतु प्रागभावे तव कदाचिन्नूक यावत्कारणप्रागभावानाधारः प्रागभा
वाधारः लक्षणमेव सामग्रीलक्षणत्वानुपादाने प्रहरादावतिव्याप्तिः लक्षणस्तु जनकः कार्याधारक्षणस्य पूर्ववर्त्तित्वाभावात् न१

पूर्ववर्त्तिनस्तु कार्य्यानाधारत्वात् कालोपाधीनाम विकरणीभूतानामेव कारणत्वादित्यस्वरसादाहापि चैवमिति यावत्तूलत्वं
करणमिति विवक्षायां कुठारादावव्याप्तिरिति व्यापारविशिष्टस्य यत्तू यावत्तलत्वं क्रियाजनकमिति विवक्षितमपि करणं तस्यात्व्यापार
वतः कुठारादेरपि क्रियायाः प्राक्काले सत्वेन हस्तान्तरधमननिपतनविशिष्टे कुठारादौ प्रथमक्षणे छिदासंबंधोऽस्तीत्यत्र प्रमाणाभावात्
संदेह इत्यर्थः ननु क्षणान्तस्यानन्तुवृत्तेनी नियतप्राक्सत्वाभाविनाकालेरणस्य तस्य कारणत्वाभावे करणत्वेन तस्यादित्यवश्यमेकक्ष
णं व्यापारविशिष्टस्य क्रियानुपहितस्य सत्वेन लक्षणमसंभवेव स्यादिति चेन्न कुठारस्य क्रियायाः प्राक्कालसत्वादेव नाकारणत्वं
व्यापाराविशिष्टस्याव्यापारावेशकाले क्रियायोगनियमे क्रियाव्यापारयोर्योगपद्येपि नक्षतिर्नहि व्यापारोपि क्रियाकारणमित्य
भिमानेन यदि छिदाव्यापारयोर्योगपद्यमंगीकृत्य लक्षणं लक्ष्येसंगम्यते तदा प्रमाणाभाव इत्यर्थः वस्तुतो व्यापारस्याकारणत्वे
नतोपि प्राक्क्रियापत्तिर्न च करणतावछेदकः सः तथापि अस्यास्तथात्वे तद्दोषतादवस्थ्यं ततस्तथात्वे तस्यापि प्राक्सत्वमावश्य
कं मवछेदकहीनस्य अवछेद्याभावापत्तेः कदाचिदवछेदकवतोप्यवछेद्यसत्वेसत्वदोष इति अथवा क्रियाया छिदात्मिका
याः स्थितिकालेपि छेद्यसंयुक्तः कुठारे[illegible]स्यैव छेद्यनाशान्तरमेव छेद्यसंयोगस्य कुठारनिष्ठस्य नाशात् ननु लक्षणभंगपत्ते

॥ ॐ ॥

संयुक्तकुठारः कार्योत्पत्तिक्षण एव न तस्यतीत्याशंक्याह क्रियाकाले क्रियोत्पत्तिक्षणे यदि तस्य नाशस्तदा क्षणमपि तस्यानुवृ
त्तिनिषेधे ऽनुवृत्तभावे यन्नु प्रमाणं तल्लौकिकादिभिरुपन्यस्यते तत एव तत्तूत्तिद्धिर्भवेत्तच्च तथा भवति तस्यते अप्रसिद्धत्वापत्तेः न च
नादृशं प्रमाणं तदुपन्यासं भवत्यपि तु दुरुपन्यासं संसत्वस्य लौकिकत्वयोरेकस्मिन्नधर्मिणि ग्रहणासंभवात् तद्विषयदिप्रत्यक्षेण ग्राह्य
न तत्संयुक्तधर्मयोरनुगतयोर्मिथ्याभूतयोः प्रत्यक्षासंस्पर्शात् धर्मिस्वरूपात्मकयोस्तु स्थिरत्वादेपि तत्त्वभावात् यदि चा
त्रापि निर्दोषं किंचित् प्रमाणं संभाव्यते तदापि लक्षणं संदिग्धाव्यापकत्वेनेतरानेदसाधकमेव संदिग्धाव्याप्तिमुक्ता निश्चि
ताव्याप्तिमाह प्रत्युतेति व्यासंगदशायां करस्पृष्टधरणिपाषाणादौ त्वगिंद्रियसंयोग एवानुवर्तते न तु तदभावो मंतुमुचितः
यदि तु तदभावो मंतव्यस्तदा मनःसंयोगस्याविभुपदेऽप्यभावात्तत एव ज्ञानानुत्पत्तिसंभवे मनसोऽनुकल्पनानप्रामा
णिकी स्यादिति भावः॥ असंभवमप्यत्र लक्षणे कथयति यावत् सत्वं च कारणमिति भाषायां वाक्यद्वत्सर्थ यावच्छब्दस्य
कृत्स्नवाचिनः सह शब्देन संबंधस्य कारणत्वात्मकसंबंधेन योजनया सर्वस्मिन्कारणसत्वकाले कारणत्वं यत्तत्र वर्त
नेतत् कारणमिति वाक्यस्यार्थ इत्यन्वयः॥ कुचिदिति किमुत सर्वस्मिन्निति भावः कारणसंबंधकाले कारणत्वस्य

वृत्तावात्माश्रयापत्तिस्तदा स्याद्यदि कारणताघटक कालएव [illegible] कारणतावच्छेत नत्वेवं किंतु कालांतरमेव कारणताघट
कान्कारणतायाश्चाश्रयउत्पा शंक्याह कालेवृत्तीति नियत कालसंवंधात्मकस्य कारणत्वस्यातभूतकालादन्यस्मिन्न
कारणेकालेऽभावादित्यर्थः। आश्रयमर्थ इति संवंधीत्यनंतरं भवतीति विभुत्तिवेसवभ्यमध्याहार्य्यं शावृत्साधुत्वायतथाच
कात्यायनः यत्र क्रियापदं न श्रूयते तत्रास्तिर्भवंतीपरः प्रथमपुरुषेऽप्रयुज्यमानोप्यस्तीति अस्तिरसधातुः सत्ता
त्मकधातूपलक्षणमिदं भवंतीपरो लट्परः संवंधीत्यस्य विशेष्यं यत पदमध्याहार्य्यं तेन यदा योगव्यवछेदे नक्रि
यायाः संवंधी भवतीति विभुत्तिवेनिवर्ण्यवसितं वाक्यं तत्र प्रथमे कल्पे क्रियाया अयोगव्यवछेदेन विशिष्टं यत्संवंधजा
यते तन्न करणं द्वितीये तु तादृशं यत्तिष्ठति तत्रैवेति। इदमुभयमपि कर्त्तृत्वमनि व्याप्तं कादाचित्कायोगव्यवछेदस्य तत्रा
पि सत्वादिति यदि क्रियाअयोगव्यवछेदपदेन क्रियाव्याप्तिः कालिकी विवक्षिता तत्रापि तूपोर्नैक काल संवंधरूपा
स्माविवक्षा किं त्वानंतर्य्यरूपा तत्र श्वयत्फलितं तदाह यस्मिन्सतीति निमित्तसप्तमीयं निमित्तता च भूतस्यैव मुख्येति
भावेन व्याचष्टे यस्मादनंतरमिति संवंधी हि क्रियायोगव्यवछेदविशिष्टं तदा भवति यदि तदनंतरं क्रियोत्पद्यत इति भावः

चिरातीतस्यापि निमित्ततासंभवति व्यापारद्वारा परंतु तनावनाकालिकी व्याप्तिर्लभ्यत इत्यत आह यस्मिन्नविद्यमाने इति सामग्र्या इति तद्घटि
कारणत्वघटितमिदं लक्षणमिति भावः एतेनाव्यवहितोत्तरक्षणे जायमानक्रियाकारणं करणमिति प्रथमविकल्पार्थ इति विद्या
सागरव्याख्यानमपास्तं यद्यपि सामग्र्यनंतरं द्रव्यादिवत्क्षय एव जायंते न क्रियाइत्याशंक्य तथापि क्रियासामग्र्यामतिव्याप्तिर्वोध्या
अथवा द्रव्याद्युत्पत्तिरपि क्रियैवेत्याशयेनेदं न च तस्या न जन्मास्ति किंतु घटादेर्वेति वाच्यं तथासति जनने तन्निष्पन्नत्वे नानादि २
तया तदाश्रयघटादेस्तपनादितापात् । नच जनिर्न क्रिया किंतु कारणसमवाय इति वाच्यं ध्वंसजनकस्याव्याप्तेरिति विद्यासा
६ गरवचनं लवनेर्धारीनकं तुपेयं आद्यक्षणसंबंधस्य जन्मपदार्थस्य तेनाश्रुतत्वात्तदाह न्यायाचार्याः आद्यक्षणयोगस्य
क्षणयोगो जनिर्मतेति । अथ कारणत्वेन विशेषणान्नातिव्याप्तिरिति चेन्न तस्याः कारणताया अनुपदमावेदितत्वात् क्षण
त्वकसामग्रीपदस्य तु प्रागभावघटितत्वया तस्या प्रामाणिकत्वेनैव निरस्तेः किंच कार्याधिकरणं कालोपाधिरेव कारण
मित्यपि स्वसमयसंतमसाख्यादिते नेत्राणाम्भवतेधाभिनिधेयं । सुखदुःखादेरित्यादि पदेन ज्ञानव्यक्तिविशेषस्य परिग्रहः
कस्यचिदपीति सुखमनुभवतः सुखेनानुभवामीति व्यवहारदर्शनात् सुखनिर्विकल्पके व्यापारश्चैत्यस्य तस्याकारक

तथा तद्व्याप्तकरणत्वव्यवहारस्य सर्वानुमतत्वात् प्रमाणप्रमेयव्यवहारोच्छेदापत्तेश्च । सामग्र्यादेरित्यादिपदेन सुखोत्
पत्त्यनंतरं तन्नूत्प्रमा तिष्ठतीति तत्रातिव्याप्त्यापत्तिरिति बोध्यं एवं कर्मशब्दादावपि उत्पन्ने स्थिरत्वात् तिस्थिरपदादित्यर्थः घटो
त्पत्तेरनंतरं घटस्य सत्त्वादनूत्पन्नावतिव्याप्तिरित्यर्थः न चेष्टापत्तिरुत्पन्ने निर्व्यापारत्वेनाकारकत्वात् क्षणभंगस्थिते
रभावात् किं प्रतिकरणत्वमापाद्यतिस्थिरइत्युक्तः । विद्यमानस्तु स्थिरो न तु आद्यादिक्षणनिरिक्तो घटादिस्तस्योत्पत्त्यनंतरं स्थिति
नियमात् स्थितिक्रियां प्रति न द्विशिष्टं घटं प्रति च करणत्वं स्यादित्यर्थः उत्पत्तिस्थितिरिति कुचित् पाठस्तदा तत्पत्तौ स्थितिं
प्रति स्थितिः तदुत्तरभाविनाशुत्पादिकरणत्वं स्यादित्यर्थः सहस्थायिनामिति रूपरसादीनां सहस्थायिनामन्योन्यं करण
उत्पन्नेरित्यर्थः न चैतेषां क्रियात्वाभावात् कथमतिव्याप्तिरितिवाच्यं क्रियाशब्दस्य कार्य्यमात्रपरत्वादन्यथा कार्य्यकारण
पूर्वकमिति व्याप्तिभंगापत्तेरिति यद्वा कुठारक्रियया सह कुठारसमवेतानां रूपादीनामित्यर्थः व्यापारवत्त्वे तु इति सामग्र्या
निर्व्यापारत्वान्न तत्रातिव्याप्तिरित्याशयः न चैवं फलाभिचारित्वमिति व्यर्थमितिवाच्यं तथा सत्यसंभवापत्तेः न च व्यापार
वतोऽभिचारित्वमित्येवास्तु तथा सति कार्य्यांतरनिरूपितव्यापारवतो व्यभिचारशून्यस्य दंडस्य पटेपि करणत्वापत्ते

रिति फलपदं तु प्रकृतफलपरमित्यदोषः हलाद्यव्यापनादिति सत्यपि हलस्य पाकानुगुणे किंचिद्व्यापारदशायां पाकानुत्पादाद
करणत्वप्रसंगादित्यर्थः। अथ फलाव्यभिचारित्वं यद्व्यापारवत्तत्तद्व्यापारवत्त्वे सतीति काच्यमेवं तथात्वे तत्फलाव्यभिचारिव्यापारवत्त्व
स्यैव सम्यक्त्वान्नत्वग्रे दूषयिष्यन्निति। किंच फलाव्यभिचारो दैशिकश्चेत्तदा ज्ञानकरणव्याप्तिज्ञानस्यात्मवृत्तित्वेन देहादिदेशवृत्ति
नाकरणेन सादेश्याभावात् कालिकाव्यभिचारस्तु हलाद्यव्यापकत्वेऽपि बोध्यं न व्यापार इति तस्य व्यापारवतो विशेषणीभूतो
व्यापारपदार्थः क इत्यर्थः तेन करणेन जन्य इत्युक्ते क्रियायामतिव्याप्तिरिति कारणपदं तद्वत्तज्जन्यस्य विवक्षितत्वमन्यथा क्रियाया
अपि स्वप्रत्यक्षादिकारणतया अतिव्याप्तितादवस्थ्यं कारणमित्युक्ते कत्रादावतिव्याप्तिरिति जन्यत्वं विशेषणं तदाश्रय इति तत्का
रणमाश्रयो यस्येत्यर्थः। शंकते पक्षे प्रथमेत्यादि दृश्यत इत्यंतेन तथा च व्यापारशून्यः परामर्शः करणमेव नेति कुत्र व्याप्तिरित्याशयः
प्रथमस्य पक्षे निष्ठलिंगदर्शनस्यापि मनुमितिकारणत्वात् तत्र च व्यापारविरहितोपि तस्यैव करणत्वमप्येष्टव्यमित्याशयेन परि
हरति अप्रसन्न इति अदृष्टस्य संस्कारोद्बोधकत्वतया विनापि प्रथमलिंगदर्शनं व्याप्तिस्मृतिसंभवान्न प्रथमं पक्षीयलिंगज्ञानं परा
मर्शहेतुरिति भावः तत्रापीति अदृष्टोद्बोधितसंस्कारजस्मृतावपि प्रथमलिंगदर्शनमपि कारणं न चादृष्टादेव स्मृतिसंभवे प्रथम

लिंगदर्शनस्य कारणत्वे गौरवत्वं मितिवाच्यं मदृष्टादर्शनत्वेन प्रथमदर्शनस्यापि कॢप्तकारणाभावत्वात् किं किं न्यथासिद्धमिति वक्तुमशक्यत्वा
दित्याशयेन दृष्टांतं दर्शयन्नेव शंकते अभावो भेद इत्ययं पदार्थानित्यं धर्मिप्रतियोगिधीसापेक्षप्रतीतिर्यथा धर्मिग्रहणे प्रतियोगिस्मरणे च स
तिप्रथममभावाज्ञानेपि पटाद्भिन्नो घट इत्येवमाकाराजायते न याद्दृहापि न प्रथमतादृशपरामर्शात् संभव इत्यर्थः। सत्ताद्वादिधर्मिप्र
तियोगिसापेक्षस्य तद्विशिष्टतया प्रतिपत्तिरिति योज्यं अभावादेर्धर्म्यादिप्रतीतिपरं परमेव भाननियमात् प्रतियोग्याद्यिज्ञानेन ग्रह
न णात् योगा प्रथमत एव प्रतियोग्यादिविशिष्टप्रतीतिरस्तु लिंगस्य तु व्याप्त्यादिस्मृतिव्यतिरेकेनापि प्रतीतेः प्रथमतो लिंगस्य तत्त्वरूपतः
प्रतीतिरस्तु ततो व्याप्तिस्मृतिद्वारा विशिष्टपरामर्श इत्यर्थः प्राक्कारणेत्यत्राविनिपक्षनिष्ठलिंगज्ञानात् प्रागेव व्याप्तिस्मृतेः न नु सहि
तलिंगेन्द्रियसन्निकर्षात्मककारणसंपन्नो नान्यत्रैवमिति निरपेक्षापेक्षितरः प्रथमत एव विशिष्टज्ञानं तु जायत इति वक्तुं न शक्यमि
त्यर्थः। ननु मित्युत्पादकत्वं नानुमितिकारणत्वमित्यर्थः अन्यथा अनुमितिप्राग[illegible]भावबाधाभावादौ व्यभिचारापत्तेः। एवेति य
द्यपि निर्व्यापारे कारणकत्वाभावात्तद्विशेषः करणत्वं बाधितं तथापि कारकतापि न व्यापारघटितास्तु किं वानेन ज[illegible]न्मेव विषये बुद्धि
व्यापार इत्यत आह तिभट्टमतमेवालंब्यतां कारणव्यवहारानुरोधादित्याशयः। तद्यापरकस्येति सपरामर्शो व्यापारो यस्य तस्येत्यर्थः।

परामर्शो हि धूमत्वविशिष्टज्ञानं तथा निर्विकल्पकजन्य इति भावः। नित्येति नित्यं धर्मेप्रतियोगिघटितो यो विषयो यस्य स सविकल्पक
प स्येत्यर्थः कर्मधारय एवा विशेषणज्ञानांतराभावे हि निर्विकल्पककल्पना प्रकृते तु व्याप्तिस्मृतिरेव विशेषणज्ञानमिति किन्निर्वि
कल्पेनेत्याशयः इति मिश्राः स्मृतत्वात् तथा सति नित्यत्वसंघटिते पीति ग्रंथे न व्यभिचारो धारानुपपत्तेः तस्मात्परामर्शस्य सविकल्पकत्वेन
हेतुनिर्विकल्पकजन्यत्वे साध्ये सत्वे वधिकस विकल्पके व्यभिचारे दत्ते नित्यसंघटिते पीति तत्रापि प्रतियोगिस्यादि निर्विकल्प
कत्वेन व्यभिचाराभावमाशंक्याह कारणांतरादेवेति प्रतियोगिस्मृतिरेव भावादित्यभावस्य सविकल्पकोपपत्तेरित्यर्थः विकल्प 13
ककल्पनां प्रमाणाभावान्निरस्य अपसिद्धांतापत्त्या निरस्यति प्रत्युतेति विशेनमित्यर्थः निर्विकल्पकं न कल्पनीयमेवेनिया
दी वन् अभावोनामिदमेव स्वाभाव्यं यद्विशिष्टज्ञानमात्रविषयत्वमिति तथाभ्युपगमादित्यर्थः। इति मैथिला व्याचक्षते विद्यासागरस्तु
(भावादिति ~~सविकल्पकोपपत्तेरित्यर्थः निर्विकल्पककल्पनां प्रमाणाभावान्निरस्य अपसिद्धांता~~पत्त्यानिरस्यति) भनिर्विकल्पक
विषयत्वे सविकल्पकं प्रमाणमेव तस्मात् प्रमेयस्याधिकस्याभावात् प्रतियोग्यभावो यदि निर्विकल्पके न गृहीतः तदा तयोर्वैशिष्ट्यं
सविकल्पकेन ग्राह्यमिति वाच्यं तच्च न संभवति विशेषविशेष्यस्वरूपानतिरेकाभ्युपगमाद्वैशिष्ट्यस्येति याचष्टे तत्र नाद्यः अभा

१८७

187

वाभावत्वांशे निर्विकल्पकत्वेपि प्रतियोग्यंशे सविकल्पकैकरूपत्वात् नापि द्वितीयः घटस्याभाव इति षष्ठ्यर्थस्य निर्विकल्पकाविष
यस्य सविकल्पे भानात् तत्राभावाभावत्वमतिरिक्तमेव वेसम्पदेतत् । अत्र क्रमः सविकल्पकत्वेन प्रतियोगि निर्विकल्पकजन्यत्वा
साधनमशक्यं तस्य प्रतियोगिसविकल्पकजननेनान्यथासिद्धेः यदि च निर्विकल्पके जन्यत्वभानं स्वाप्यते तदाह प्रत्युते
ति अभावत्वविशिष्टज्ञानस्य निर्विकल्पकजन्यत्वस्य बाधितत्वात् अभावत्ववैशिष्ट्याविषयकाभावज्ञानस्य निर्विकल्प
कात्मनोऽभावात् न ह्यभावेन सहाभावत्वस्य स्वरूपातिरिक्तः संबंधोस्ति न च निर्विकल्पकस्याभावत्वं न विषय इति । यद
पि सविकल्पकं निर्विकल्पकपूर्वकमिति व्याप्तेर्निर्विकल्पकजन्यत्वेपि न भंगस्तथापि तत्रानुकूलतर्काभावः निर्विकल्पकस्यानं
गीकारेण तादृशव्यापकघटत्वाभावाच्च मास्तु निर्विकल्पकस्य परामर्शाव्यापारकस्य तथापि न क्वापि परामर्शकरणकानुमितिर्येना
व्याप्तिःस्यादित्याशयेनाह । यत् किंचिन्न जनकमिति परामर्शस्य जनकं व्याप्तिः स्मृतिः क्वचित्पूर्वं न परामर्शजसंस्कारः परामर्श
प्रागभावो वेति । तथेति परामर्शजनकत्वेनेति इंद्रियादेरित्यादिपदेनादृष्टादिपरिग्रहः तथा च प्रत्यक्षाद्यनुमित्योर्भेदो न स्यादिंद्रि
यजन्यत्वादिति भावः । मैथिलास्तु अनुमितित्वप्रत्यक्षत्वसांकर्यापत्तिरित्याशयस्तदसदिंद्रियत्वेन जनकतायामेव प्रत्यक्षत्वात्

नवाद्वयोरभेदापत्तिरपि दोषः परामर्शजन्यत्वेनानुमितेः कारणभेदेन भेदात्। अत्राहुस्तथा करणत्वे प्रमाणाभावः जनकज
नकत्वेनान्यथासिद्धिश्च तस्माल्लिंगमेव करणमस्तु तस्यैव परामर्शो व्यापारोस्त्वित्याशंक्याह लमतिप्रसंगेनेति तथा सति घटज्ञा
नेदंडतः कारणं घटो व्यापार इत्यपि स्यादिति भावः। तस्मादतिप्रसंगाभावेन लिंगपरामर्शः करणं न तत्रश्च स्वव्यापारलक्षणेतद्घटि
तकरणलक्षणाव्याप्तिरिति ग्रंथदृष्टार्थः तत्तुल्यं कारणं व्यापार इत्यत्राजन्यत्वांशप्रयुक्तमव्याप्त्यंतरमप्याह शब्दे श्रोत्रसन्निकर्ष
स्य चेति अत्र नाय इत्यनुषज्यते तेन श्रोत्रसन्निकर्षस्याव्यापारत्वप्रसंगात्तन्नायमित्येव पर्यवसितं वाक्यं तस्याव्यापारत्वेपि करणल
क्षणे को दोष इत्यत आह तथा चेति। क्वचित्तु अन्यथा श्रोत्रस्येति सन्निकर्षो हि प्रत्यक्षेऽपेक्षितो न तु व्यापारोपीत्याशंक्याह करणकल
प्रसंगात् [illegible]स्यापि सन्निकर्षे निर्व्यापारत्वेन विशेषः। न वस्तुतो हि सन्निकर्षातिरिक्त एव तस्य व्यापारश्चक्षुषो यथोन्मीलनं
भट्टानामित्याशंक्याह सन्निकर्षो हीन्द्रियव्यापार इति नोन्मीलनमिंद्रियव्यापारो विप्रकृष्टस्यापि ग्रहणापत्तेः। विप्रकृष्ट
मयोग्यमिति चेत्तर्हि समीपगमनानंतरमप्यप्रत्यक्षतापातः अथ चक्षुषः संयोग एव व्यापारः श्रोत्रस्य तु सन्निकर्ष
स्य समवायस्य व्यापारत्वासंभवाद्व्यापारांतरमेव करणतोपपन्नेयं कल्पनामित्याशंक्याह दार्ष्टांतिकमसिद्धं न हि परिदृष्टाने

चक्षूरूपं चेत्तन्न श्रोत्रस्य विभ्रमात्। स्थिरं चेत्तन्न श्रोत्रजन्यं समवायवदित्यर्थः। किन्त्वस्मादितिस्यादेवेत्यर्थः सहि श्रोत्रे
णाकाशात्मना जन्यः श्रोत्रजन्यसाक्षात्कारजनकश्चेति तस्य व्यापारत्वं दुर्वारमित्यर्थः शब्दनित्यत्ववादिनां तु वायुकर्ण
शष्कुलीसंयोग एव यद्वा न्यायमतएवेदं दूषणमित्यदोषः। शब्दो न श्रोत्रव्यापारः तद्विषयत्वात् यदेवं तदेवं यथा रूपादि यद्वा श्रो
त्रं न स्वविषयव्यापारकं करणत्वाच्चक्षुरादिवदिति भावेन परिहरति नेति तस्य शब्दस्येत्यर्थः कर्मतया श्रोत्रजन्यज्ञानं प्रतीति शेषः
करणकोटिः करणांशः शब्दो हि विषयः स यदि व्यापारतया करणकोटौ प्रविशेत्तदा विषयी भवेद्व्यापारेणानुबंधितयेनेति तच्चानुपपन्न
मिति तर्कोऽनुग्राहकोऽनुमानस्योक्तः शब्दस्य श्रोत्रव्यापारतया शब्दजन्यज्ञानं प्रति करणत्वं तत्प्रयुक्तव्यवहारविषयतया कर्मत्वमप्य
स्त्विति तर्कोऽप्रयोजकः इत्याशयेनाह क्वचिदिति उभयनिमित्तसमावेशादित्यर्थः विपक्षबाधकमूलकोऽयं तर्क इत्याह एकस्या
मिति श्रोत्रकार्य्यायां शब्दबुद्धौ उपधायकतया विषयतया व्यावर्त्तकत्वेन प्रविष्टस्य शब्दस्य करणीभूतश्रोत्रव्यापारतया करणको
टावपि प्रविष्टतः नियम्यनियामकत्वविरोधः आपद्येत व्यापारविशिष्टस्य करणतया तद्व्यापारत्वात् करणत्वं तस्यैव पुनः कार्य्यबु
द्धिविशेषणतया कार्य्यत्वमापद्येत तच्च विरुद्धं नियतोत्तरभावस्य कार्य्यत्वादिति एकस्यां क्रियायां कार्य्यकारणत्वं च क्वापि

नदृष्टमित्यर्थः। ननु घटादिबुद्धावप्ययं दोष आपतेत् यतो घटबुद्धिजन्या घटेन्द्रियसन्निकर्षो जनक इति घटस्य जन्यजनककोटौ न भावादि
ति परिहरति किमिति नास्माकं किंचिन्निवाह्यमस्ति तथा च तदपि दृष्टमिति नास्माकं किंचिद् दृष्टमापद्यत इति भावः। बाध इति नियम्य
नियामकत्वरूपो बाध्यबाधकभावो भयोक्तः स च यद् दृढः प्रशिथिलमूलत्वदोषेण दुष्टः तदा अन्यसाम्यात्कथा अलं तदुपजीव्य
यति प्रशिथिलमूलत्वं तदेवोद्भाव्यतां यदि तु दृढः प्रशिथिलमूलत्वादिहीनस्तदा प्रतिवादिमूलमपि बाध्यतां। न चैवं तर्हि तत्त्वस्व
पदोऽपि न सिद्ध्येत् तत्र अजातु न तरतोऽपि स्यादिति वाच्यं यतो मुमुक्षूणां कुमतनाममस्याप्यपदार्थ एव नास्ति यद्बाधया जातु न तरतो स्या
दा दिति मुमुक्षूणां स्वपक्षेऽनावपि निर्विकारतया ऽवस्थानं प्रतिवादी खंडनाय यत्संग्राहकश्लोकं लिखति तथा चेति पुराणेन कथनेन
निर्णाययति तथाहीति मिथिलानाथो राज्यविशेषस्य राजा जनकः आदेहे किं मिथिलानगरी ना दाह्ये। जाज्ञवल्क्येन ज
नकस्य वेदान्तश्रवणयोग्यतापरीक्षार्थं धायावह्निना मिथिलायां प्रदीप्तायां ममकाराभावान्न मे किंचिन्न दह्यतीत्याहेति
आदेहे मिथिलादाह इति पाठे तु तथाहीत्यत्र तथाहे ति पठनीयं। अत्र वदन्ति शब्दस्य कार्य्यतावच्छेदककोटिप्रविष्टस्य कारण
व्यापारतया करणता घटकत्वेऽपि न करणत्वमिति कुतश्चकस्यां क्रियायां कर्मकरणत्वयोर्विरोधः न च दर्शनतः शब्दस्य निय

स्यत्वे नियामकत्वं च विरोधः शब्दप्रत्यक्षस्य करणताघटकव्यापारीभूतशब्दनियम्यत्वेपि शब्दस्य शब्दानियम्यत्वात् किं च शब्दप्रत्यक्षे
शब्दस्य कारणत्वे श्रोत्रस्य च शब्दजनकत्वं स्वीक्रियत एवान्वयव्यतिरेकाभ्यामतस्तस्यासिद्धेः श्रोत्रव्यापारत्वेन द्वतश्च
श्रोत्रस्य न तु साक्षात् कारणत्वात् श्रोत्रस्य करणताप्रमाणसिद्धा चेत् कथं विरोधः अथ एवं सत्यपि न कारणता तस्या अन्य
था निर्वाच्यत्वादिति उच्यते तत्र तथापि लक्षितव्यापारतायाः सिद्धेः न त्वनः करणताया अपि दुर्वारत्वात् किं च शब्दप्रत्यक्षे शब्द
नियम्यमेव तेन विना तदनुपपत्तेः सत्यं व्यापाररूपशब्दनियम्यं शब्दस्य व्यापारत्वेन नियामकता नास्तीति चेत् मास्तु व्यापारत्वेन नि
यामकता परं तु नियामकत्वं व्यापारत्वं च मास्त्वीति न शक्यं वक्तुं अयं न शब्दः स्वसाक्षात् कारकारणं किं तु श्रोत्रमेव कर
णं तयोस्तु सन्निकर्षमपेक्षते सन्निकर्षस्तु शब्दसमवायः स्वपदे शब्दो न कारणतयेति चेन्न श्रोत्रकरणतावच्छब्दस्या
पि कारणताया अपि प्रमाणसिद्धत्वात् अत्र ब्रूमः शब्दोपलब्धिः सकरणिका क्रियात्वात् छिदावदिति परिशेषाच्छ्रोत्रस्ये
व तत्त्वे सिद्धे तत् सन्निकर्षः शब्दसमवाय इत्यपि सिद्धम् इति ननु शब्दस्य प्रत्यक्षे कारणतापि तथा सति तस्यापि निर्विकल्प
कव्यापारस्य शब्दसविकल्पकात्मकप्रमा(व्यापार) करणतापत्तेः एवं च चक्षुःसंयोगोपि सन्निकर्षतया सिद्धः तत्र संयोगस्य

कारणतां गमयतीत्यर्थः । किंच प्रत्यासत्त्या चक्षुःकरणमिति सत्यथासिद्धः सन्निकर्षः तेन अवान्तरव्यापारघटकतया घटादेरपि नका
रणताकारणत्वादिति घटादेर्न प्रमाणता व्यापारः करणत्वापेक्षायां नकोपीत्येव तुर्ष्यः व्यापारवत एव करणत्वमिति सत्याप्यसि
द्धेः । तथाच शब्दस्य न व्यापारत्वमिति साधूक्तं किंच शब्दप्रत्यक्षस्य करणनियामकस्य तया उभयसिद्धव्यापारत्वार्थं शब्दस्य व्या
पारतावश्यं अन्यथा तस्यापि करणकोटिनिविष्टस्य करणतापत्तेः नियामकतानुनियतप्राक्कालतासाव्यापारस्यापि व्या
पारत्वतएककरतादगमाच्छब्दस्य व्यापारत्वे श्रोत्रस्येव शब्दस्यापि करणतास्यात् नवा शब्दप्रत्यक्षे शब्दस्य नियामकत्वं शब्दस्य प्रत्यक्षावि
शेषतया शब्दस्यापि प्रत्यक्षे पूर्ववर्तितावत्त्वप्रतितथात्वापत्तेः अंशतः इत्यस्यापि शब्दांशतः इत्यर्थः नच शब्दप्रत्यक्षे शब्द
उपलक्षणं उपलक्षणस्य नावच्छेदकांतराभावात् नच श्रोत्रप्रत्यक्षत्वं तथा शब्दत्वेपि सत्त्वात् । यत्तु सन्निकृष्टः शब्दोपिका
रणे विनिगमकाभावादिति तन्न सन्निकर्षसत्तिविषयस्यापेक्षाभावात् अन्यथाभूतभाविघटानां घटत्वप्रत्यासत्त्या प्र
सक्तेंनस्यात् तस्माद्यस्य प्रत्यासन्निरक्षितस्य भासते अन्यथा शब्दस्य भूतस्य भाविनोपि तिर्यग्विप्रसक्तविषयतापि नस्यात्
अत एव लौकिकसन्निकर्षस्य न शब्दस्य विद्यमानस्याप्यन्यथासिद्धतापत्त्यासन्नेरन्यत्र कृप्ता एव कार्योपपत्तेरिति ।

दृष्टे न दपि बाधानामिति चक्षुरादित्वं योगोपि न व्यापारः किंतु करणस्य सन्निकर्षः एवोक्तयुक्तेः व्यापारलक्षणं च नतज्जन्यज
नकत्वघटितं किंतु तत्कूलत्वघटितं शक्त्यादेरपि यागादिद्वारतया भट्टैः स्वीकृतत्वात् अन्यथापत्तिर्द्वं घटितयागुरुत्वाच्चेति दि
क्। लिंगपरामर्शस्येति लिंगपरामर्शस्यानुमितिकरणस्यानुमितिकारणाधारत्वादित्याशयः लिंगस्य सविकल्पकं नानुमि
तिकरणं किंतु लिंगनिर्विकल्पकमेवेति सविकल्पकस्य कारणानाश्रयत्वेपि न हानिरित्याशंक्याह निर्विकल्पकस्यापि
तस्येति निर्विकल्पकस्यापि करणस्याभ्युपगमेवस्तुतो निर्विकल्पकं विनापि सविकल्पकं उपपादितोऽतः करण
मेव तत्र नवास्ति प्रमाणाभावादिति॰ ननु निर्विकल्पकं यद्यपि सादात्मसविकल्पकाश्रयो न भवति तथापि एककालत्वव्
त्तिनैव तत्स्यकरणाधारतास्त्वित्याशंक्याह तद्धेत्वाश्रयास्येति सचासौ हेतुश्चेति हेतुः करणं स्यात्सादाश्रितस्यैव क
रणव्यापारत्वं अन्यथाऽनुमितिप्रागभावस्य तथा पक्षतादेरपि व्यापारतापत्तेरित्यर्थः। विद्यासागरस्तु तस्याः प्र
धानक्रियायाहेतुमन्याश्रयतोपि व्यापारत्वे सर्वस्य व्यापारत्वप्रसंग इति व्याचष्टे व्यापारनिरूपणे न लक्षणं दूषयित्वा फलाव्यभिचा
रनिरूपणेनापि दूषयति किं चेति देशिकी व्याप्तिरसंभावनीति कालिकीशंकते किमिति स्थूलकालमादाय व्यभिचार इति द्वारणमाद

यद्दूषयति कारणस्येति तथा च फलप्राक्काले व्यभिचार इति भावः अव्यवहितव्यापारवतः कारणस्य कालानंतर्यं व्या
पारस्याव्यवहितत्वेनुफलाभेदाया अतो नाव्यवधानानंतर्ययोः पौनरुक्त्यं यत्किंचिद्व्यापारवत इति फलव्यवहितव्यापार
वतः अनंतरफलव्यभिचारिव्यापारवत इत्यर्थः। काष्ठसंयोगादिव्यापारवतो हस्तादेः पाककरणत्वेपि तस्यानंतरं पाकानुत्पत्तेः
करणत्वं न स्यादिति भावः। अफलव्यापारवतद् इति अफलं यस्य व्यापारः किं वा फलाव्यभिचारी यो व्यापारस्तद्वत इत्यर्थः कर्त्रादेरि
त्यस्यापि फलपर्यंतव्यापारस्यापृथ्वत्वाद्न्यथा अकारणत्वापत्तेरिति। अथाव्यवहितस्येति व्यापारस्य विशेषणः आनंतर्य
मात्रं विवक्षितं न तु व्यवहितत्वेन विशेषितमिति विद्यासागरः तन्न व्यवधानासंभवादिति ग्रंथस्य कर्त्रादिष्वपि व्यवधानासंभवादिति
व्याप्तिःस्यादित्येवं साध्याहारवाक्यानस्य व्यवहितत्वेनस्याग्यापत्तेश्चेति। आनंतर्यस्य पूर्वदोषेपि सत्वेन प्रागुक्तदोषानुद्धारे फलोत्
पत्तिपर्यंतं परतस्येति यावत्। न च व्यापारविशेषणमपि व्यर्थमेवेति वाच्यं व्यापारवत इत्यत्र व्यापारपदं फलाव्यवहिततत्परं व्यवहित
तत्परं वेति विकल्पस्य च विनाते नानुपपत्तेरिति। वस्तुतस्तु तदनंतरं फलसत्वमित्यत्रानंतरपदमुत्तरकालपरमन्यथा पूर्वक्ष
णस्याव्यवहितत्वात्सकानंतर्यसत्वात्तत्फलासत्वेन व्यभिचारापत्तेरिति न द्वितीय इत्यत्र आनंतर्यपदमुत्तरत्वपरमाराय वि

कल्पयति मानं न तथ्यमुत्तरत्वेन अव्यवहितस्य व्यापारवत्त्वमुत्तरत्वं चेत्तदापि व्यापारपदं व्यवहितसाधारणव्यापारपरं व्यापारवि
शेषपरं वेति विकल्पद्वयेऽपि दूषणमुन्नाव्य व्यापारवतो व्यवहितस्योत्तरत्वपक्षं परिगृह्य तस्मिन्नपि पक्षे व्यापारं विकल्प्य व्यापार
मात्रपक्षे हस्त्याव्याप्तिमुन्नाव्य फलपर्यन्तव्यापारपक्षे तादृशव्यापारवतो व्यवधानासंभवाद्विकल्पोऽनुपपन्न इति दूषणमिति
व्याख्यानमेव युक्तं कालिकमात्रेति आकालव्यापारवतः फलाव्यभिचारित्वमिति। लक्षणं कर्त्रादावति व्याप्तमित्यर्थः कार
कमात्रस्यैव फलपर्यन्तव्यापारत्वादिति भावः। तद्व्यापारस्य यस्य कस्यचिदिति शेषः। हस्ताद्यकरणत्वापत्तादिति काष्ठसं
योगवति हस्ते फलाभिचाराभावादिति भावः। यागादेरिति स्वर्गादिकाले यागादेर्विनष्टत्वेन सत्यपि व्यापारे विशिष्टाभावादित्या
शयः इदं दूषणं नैयायिकस्य भट्टस्य च मते प्रभाकरमते तु नायं दोषस्तस्य यागकरणताभ्युपगमेऽपूर्वस्य वाक्यार्थतानुपप
त्तेरित्याशंक्याह चरममिति अपूर्वोपस्थित्यनन्तरमित्यर्थः। यद्यपि प्रथमं क्षणिकस्य यागस्य कालान्तरभाविफलकरणतानव
शक्यत्वेन बोद्धुं भावस्यापूर्वस्यानुपस्थितेस्तथापि स्वर्गकामस्य यागविषयकं कार्यमिति वाक्यार्थबोधे सति उपादानिकं फल
फलकरणताज्ञानं नासंभवि अत एव यागे रागाधीना प्रवृत्तिः काम्यसाधनताज्ञानादिति न मतं ज्योतिष्टोमेन स्वर्गकामो यजे

तेति करणतृतीयापि संगच्छते। इदमजानत एव पूर्वयागसंस्कारसहितस्य पूर्वपूर्वयागजन्यारं[illegible]तरापूर्वसहितस्य वा चरमयाग
स्य परमापूर्वलक्षणे फलविषये तथा करणत्वमुपगम्य तेकाम्यस्य वा स्वर्गादौ तत्रस्याद्यागस्य स्वर्गे व्यापारात्मकस्य व्यापारा
भावादित्यर्थ इति मितभाषिणीकृतो विद्यासागरस्य च व्याख्यानं प्रभाकरमतविरुद्धं हेयं। चतुर्थकरणलक्षणं न्यायवार्त्तिको
द्योतकरीयं शंकते अथेति अलंकारादावतिव्याप्तेराह यदा मेवेति अत्र यद्यपि नकिमुच्यते करणं चेदात्माश्रयः अथाकरणं तदाव्याप्ता
तः तथाविशेषाभिधानेऽनुगमः सामान्यं तु असिद्धमेव यद्यदूषणं वाच्यमित्यपि दूषणं बोध्यं आत्मधर्मीन्द्रियाणिकाबुद्ध्यादयः प्रसंसादीना
मिति उत्पत्स्यमानप्रागभावस्यादिपदेन परिग्रहः प्रमाणत्वप्रसंगादित्युक्त्या करणलक्षणमपि दूषितं करणव्यापारस्येहि आत्ममनः
संयोगस्येत्यर्थः। येन व्यापारेणाकारणेन युक्त एव प्र[illegible]मिमीत इति न च करणपदं व्यर्थं व्यापारवतः कारणत्वनियमादिति वाच्यं मनः
संयोगात्मककार्यान्तरव्यापारवतो मनः कर्मणोपि करणतया प्रमाणतापत्तेः कारणपदस्य प्रकृतक्रियाकारणपरतया तस्य च प्रमा
करणत्वाभावान्नातिव्याप्तिः एवं हीति पूर्वं निर्व्यापारे व्याप्तिरुक्ता अधुना तु सव्यापार एव मा स्यादित्यर्थः न हीति व्यापारवति परानु
त्पन्नेश्च अनुभववाधितत्वाच्च व्यापारान्तरस्य सन्निकृष्टत्वादात्माश्रयापत्तेश्च व्यापारवतो निर्व्यापारतया कारकानानुपपत्तेः क

रणत्वाभावाच्चवोध्यं॥ व्यापारेण विशेषणं किं तूपलक्षणमिति शंकते अथेति लक्षणमेव निष्कर्षयति यस्य करणमिति तथा च
व्यापारसमानाधिकरणं कारणमेव करणं तं प्रमेयत्वादि व्याप्तिवारणाय कारणत्वोपादानं उदास्यनिपातस्य च पटप्रक्षालयतो रजक
स्य प्रक्षालनक्रियायां पटस्य करणतापत्तिः पटज एव प्रक्षालनकर्तृतात् उदास्यनिपातस्य केवलेन पटत्वेनाकर्तुरुक्ता
सकर्मैव बहुलु गत्यास पटः कर्मैव तल्लक्षणेन तदपि करणं स्यादित्यर्थः। लक्षतावच्छेदकापरिचये लक्ष्यानुद्दिष्टलक्षणवि
धानमशक्यमिति तस्य निर्देशोऽवश्यमपेक्षितः केन रूपेणेत्याशयेनाह तस्येति लक्षतावच्छेदकाश्रयस्य करणत्वमि
दमित्याकारेण लक्षणाभिधानस्येत्यर्थः। लक्षतावच्छेदके नानुगतो धर्मो लक्ष्यः अननुगतो वास्तवरूपेण आद्येयदीत्या
दि तथा च लक्षणेनो लक्षणमिव मित्यस्य लक्षणवति लक्षणवन्नन्तु इत्यर्थपर्यवसानादाहात्मा अयापत्तेः अथ कुठारत्वेदं लक्षण
मिति वाच्यं तत्रादिपदार्थाज्ञानात् अथ कुठारस्वरूपं करणमिति वाच्यं तदा कुठारस्वरूपस्यैव लक्षत्वे करणत्वं लक्षणं अग्निनापचती
त्येवं प्रतीयमानेऽतिव्याप्तिमित्याह स्वरूपस्येति तत अथ वह्नेः करणत्वेन लक्षस्य लक्षणं श्रोत्रेऽपिगतं तस्यापि करणत्वधर्मवत्त्वादल
क्षत्वाच्चातिव्याप्तिरित्याशयः॥ ननु स्वरूपाणामनुगमकं स्वरूपमेव लक्षतावच्छेदकमस्तु — लक्षणतो भिन्नमतो नानात्वाश्रय

यद्वृत्तित्वेन्न हि तत्तदेव लक्षणमस्तु अलं यद्ज्ञानेनेत्यादिना कौपीनाच्छादनादेरिति कौपीनं गुह्यं तदाच्छादनं पटः। परोक्षत्वं
नज्ञा तिः। किं तु साक्षात्त्वाद्यद्वृत्तित्वमेव विवक्षितात्वित्याह साक्षादिति। प्रत्येकमुपादानं यद्ज्ञानेनेव साक्षात्प्रमां जन
यतीत्येवमाद्याकारेणासंभूयोपादानं यद्ज्ञानेनेव साक्षात्कार्यादिसर्वं प्रमां जनयतीत्येवं यस्य कस्य यदा कदाचि
दुपादानमनिमित्तनियमः प्रत्येकोपादानपक्षे तु सर्वेषामेव तद्रूपेणेति विशेषः। यद्यदा तेन यद्ज्ञानेनेव साक्षात्कारि
प्रमां जनयतीति कदाचिन्न एवं यद्ज्ञानेनानुमितिप्रमां जनयतीति कदाचिन्न एवमनियमेपि प्रमाणसामान्यस्य ल
क्षणत्वादव्याप्तिरित्याह अनियमेति। पंचमं करणलक्षणं शंकते यदभावादिति। यदवच्छिन्नकर्मक्रियात्वजनयतीत्युक्ते क भावा
र्तर्य्यतिव्याप्तिरिति कर्तृपदं नन्वकर्तुर्निरस्तत्वात्तदभावोऽसिद्धः कर्तृपदेन प्रयत्नविशिष्टस्याभिधानात्तद्व्यतिरेकस्य क्रियानुत्
पत्तिप्रयोजकत्वात् एवं कर्मपदानुपादाने कर्मणीत्युभयोपादानं तु वकर्त्रा यदभाववद्वृत्तिपाठे विद्यासागरेणधृतः यदभाववत्ति
मित्रीकृत्य प्रमां न जनयत तद्रूपस्यार्थः निमित्तसप्तमीयमिति व्याख्यानात्। इदं च करणलक्षणं संप्रदाने गतं दानकर्त्रादानकर्मवत्स्थि
पं तदभावाद्दानक्रियां यतो न जनयतीति यद्यपि तथापि प्रमाणलक्षणघटकमिदमिति ध्येयं अतएव प्रमाणलक्षणमेवदूषय

तिकिमित्यादिना अस्तीत्यपीति यथा प्रमाणत्वाभिमतोऽसंस्तथा प्रमातृप्रमेये अपीत्यर्थः प्रमातृप्रमेयसत्त्वं प्रमाणलक्ष
णांतर्गतमित्याद्यविकल्पार्थः । अतीतानागतानुमानयोः करणे नदीपूरपूरणे अतीतवृष्ट्यनुमानकरणे विशिष्टमे
घोदये भविष्यद्वृष्ट्यनुमितिकरणइत्यर्थः तत्र प्रमातुः सत्त्वेपि प्रमेययोरसत्त्वादुभयासत्त्वं यद्वा प्रमायाः करणात्प्राग
सत्त्वेन सर्वत्रैव प्रमातुरप्यसत्त्वमिति । अनुमाणदीत्यादिपदेन तादृशप्रमाकरणे शब्दादौ अतीतानागतादीतिपाठे तु कर्त्रनुमानेप्य
भावानुमानं यथा कदलीपक्वे पिदाशाभावानुमानमिति विद्यासागरः । ननु पदभावात्प्रमानजाय तद्रूपैव लक्षणं न तु तयोः
सत्त्वमसत्त्वं वा विवक्षितमित्याशंक्याह एतेति प्रमातृप्रमेययोरतिव्याप्तेरित्यर्थः इदमुपलक्षणं कारणमात्रेऽतिव्याप्तिः ।
अतिव्याप्त्यंतरमाह अस्मदादिरित्यर्थः कर्त्रा आश्रयस्तान् साऽपेदा ईश्वरः कर्त्ता यस्य तादृशि अस्मदादेः कर्त्तुराश्रयस्या
वितियावत् ननु प्रवृत्तिनिमित्तभेदादस्मदादेर्ज्ञातृत्वं ज्ञानकरणत्वं चास्त्वित्याशंक्याह एवं चेति व्यतिरेक[illegible]द्वा
ण करणत्वावधारणे सतीत्यर्थः । ननु ज्ञातृत्वं कर्तृत्वं कर्तृनिष्ठप्रमाव्यतिरेकप्रतियोजकव्यतिरेकप्रतियोगित्वं तु कर
णत्वमित्यस्ति प्रवृत्तिनिमित्तभेद इत्याशंक्याह येनैवेति येन रूपेण अस्मदादेः प्रमायामन्वयः प्रमासमवायित्वेन तेनैव

रूपेण प्रतियोगिनानिरूपितस्य व्यतिरेकस्य प्रमानुत्पत्तिप्रयोजकत्वात् शंकथ्यंस्यादित्यर्थः। ननु रूपांतरेण तथात्वं
प्रमाणाभावादिति भावः। षष्ठं कारणलक्षणमनुवदति चरमेति चरमो व्यापारो यस्य स तथा तद्भाव इत्यर्थ चरमत्वं च सकल
कारकव्यापारोत्तरकालभावित्वं। व्यक्तिवैचीर्मेयत्वात् जातिप्रमेयसामान्यत्वादित्यत्र प्रमेयपरामर्शोऽनुमितिकरणे
ऽव्याप्तिरित्याह केवलेति ननु परामर्शस्य संस्कार एव ध्वंसो व्यापारो वाऽस्त्वित्याशंक्याह संस्कारादीति न हि तज्जन्यत्व
मात्रं व्यापारलक्षणं किंतु तज्जन्यजनकत्वसहितं न च संस्कारादेर्जनकत्वमानमस्ति तन्न समकालत्वादनुमितेः पराम
र्शस्य चरमकारणत्वव्याघातश्च स्यात् स्वोत्तरभाविभावभूतकारणानपेक्षत्वं परामर्शस्य करणत्वेऽनुमितेः प्रसक्तत्त्वापात
रूपाशयेनाह किं चेति अज्ञातकरणत्वं प्रत्यक्षत्वं तदापातोऽनुमितिरिति शेषः। अनुमितानुमानादावितिरूपोपल
क्ष्याचक्षुरादिकमनुमीयते न च करणप्रेरकाधिष्ठितत्वमनुमीयते तत्रानुमितस्य चक्षुषः स्वविषयपरामर्शाजनक
त्वात्तन्नास्ति तत्र लिंगजः परामर्श इत्यर्थः। यद्विच चक्षुरादिकं कर्मकः परामर्शोऽपि कर्मजन्य एवान्यथा तस्य कर्मतानुपपत्ति
रिति तदाहाप्तोप्त्यादिभिरिति अनुमितानुमानादावित्यत्रादिपदग्राह्यमप्येतदेव इत्थमित्यादिपदस्य गृहधूमत्वं च ध्वजन-

न्तु विशेषानुपपत्तिरूपार्थापत्तिरुक्ता। ननु तत्र धूमध्वंसएव लिंगमस्तु अत्राग्निरासीदिति बोध्ये तस्यापि भानान्तरस्य च सततः पशमग्नी
विकारणत्वात् धूमात्यंताभावाभावत्वेन वह्न्यनुमितिव्यभिचाराच्चेत्याह –सादाहृ किंचेति। स्वापेक्षये नियद्यपि स्वापेक्षयास्वव्यापा
रोपि चरमोभवत्येव तथापि व्यापारविशिष्टस्यैव करणविवक्षायामिदमुक्तं न च स्वेतरसकलकारकव्यापारापेक्षया चरमत्वं
विवक्ष्यमिति वाच्यं स्वस्याद्याप्यनिरुक्तेरात्माश्रयापत्तेः कर्तृस्वरूपमात्रापेक्षया चरमत्वं कर्तृकापवस्यैव तस्य तज्जन्य
त्वादतो व्यापारवति कर्तर्यतिव्याप्तिरित्याह कर्त्तरीति। प्रसंगमुपपादयति एकव्यापारवदिति एको यो व्यापारस्तदपेक्ष
योत्तरव्यापारश्चरम इत्यर्थः व्यापारस्य हि विच्छेद इति यदि हि कर्त्ता कारणं तद्व्यापारं वोत्पाद्य विच्छिन्नव्यापार इत्यर्थः। नदे
तुलक्षणेनितस्य कर्तुर्हेतुलक्षणमनन्यथासिद्धनियतपूर्ववर्त्तित्वं तस्य क्षीणतापत्तिः तथा च कारणताहीनस्य तद्विशे
षकत्वायोगइति भावः कर्तृव्यापारविरामादिति ईश्वरस्य कर्तुर्व्यापारप्रयत्नात्मकस्तस्य नित्यत्वात् कारकांतरव्यापा
रस्य तदानंतर्यादीश्वरस्य कर्त्तुरपि करणतापत्तिरित्यर्थः। अयमाशयः सर्वं हि कारकमीश्वरप्रयत्नकालएव व्याक्रिय
तेननु तदंतरकाले यथा किंचित्प्रयत्नोत्तरकाले तं तु तथा नेह उत्तरकालता याज्ञ्यघटिता या वा ईश्वरप्रयत्ननिरूपिता

याऽभावादिति भावः यदि च तत्क्षणध्वंसानधिकरणतत्क्षणाधिकरणवृत्तित्वमानंतर्यं तदा सुतरां सर्वक्षणानां ध्वंसाधिकरणत्वात् मैथिलास्तु
अर्थ्यं तु संयोगात्मकव्यापारस्यापीश्वरजन्यतया दृष्टेश्वरीयत्वं तदनंतरं च कारकांतरं न व्याप्रियत इतीश्वरस्य करणतापत्तिरित्यर्थः
इत्यादुः छिन्नादिरणमोक्तेः प्रकृतानंतुगुणत्वात् आनंतर्यस्य विशेषणस्यासिद्धेः तदसिद्ध्यभिधानमसंबद्धं व्यापारांतराभावदश्र
वक्रयोनोपात्तत्वदिति संगतिः । अद्रायोगः संयोगः आदिपदेन संयुक्तसमवायादयो गृह्यन्ते यथा ऽऽदासन्निकर्षात्वस्या
दृष्यापारस्यानंतरं ज्ञानजननाय कारकांतरं न व्याप्रियतद्वत्स्वं करणं तथा कर्मापीति तदपि करणं स्यादित्यर्थः । प्रमाण
लक्षण इति व्याप्तिं करणमात्रस्य लक्षणेऽतिव्याप्तिमाह नैयायिकैरिति न च करणमात्रमेवेह लक्ष्यं न तु प्रमाणमिति व्याप्त्य
भिधानेऽर्थांतरत्वेतिवाच्यं प्रमाणलक्षणायैव करणलक्षणस्य निर्वचनं वार्त्तिकादाविति तद्दूषणस्यैव प्रकृतत्वात्
मैथिलास्तु न केवलं ज्ञानकर्मणि किंतु छिदादिक्रियाकर्मण्यप्यतिव्याप्तिरिति छेद्यां देरित्यादिपदेन पाकादि
कर्मतंडुलादिकमपि गृह्यन्ते । हस्तादीति हस्तादिव्यापारानंतरं काष्ठादीनां व्यापारादिति भावः । सन्नमं करणलक्षण
मनुद्यद्दूषयति अनंतरफलमिति सामग्र्यामतिव्याप्तिस्तु नाशंक्यते तस्याः फलाभावात् सामग्रीध्वंसस्तत्कार्यमिति चेन्न

स हि प्रागभावध्वंसः पटादिस्वरूपपर्यवसितः स च न प्रागभावानंतरभावी प्रागभावस्यांत्यतंतुसंयोगात् प्रागपि सत्वात्
अंत्यतंतुसंयोगध्वंसस्तु नानंतरभावी न वा सामग्रीध्वंसः सत्यपि तस्मिन्न पटोत्पत्तिक्षण एव सामग्रीध्वंसोऽन्यत्रेः। अनंत
रमेव फलं यस्येति हि समासार्थः। कर्त्रादौ नास्तीति नातिव्याप्तिः। तत्रानंतर्यं यद्यव्यवहितत्वंमात्रं तदा परामर्शोत्पद्वि
क्षणोपरामर्शाव्यवहिते फलाभावादव्याप्तिः स्यादिति आनंतर्यमुत्तरत्वं विवक्षितं तत्र च सर्वकारणा[णां]मपि कारणानां वा दि [तं]
त्याहाविशेषितमिति अव्यवहितत्वेनाविशेषितमुत्तरत्वमित्यर्थः चिरविनष्टकारणमात्रस्योपलक्षणं न हि स्वर्गो
यागस्याव्यवहितोत्तरक्षणेऽनुत्पत्तेरिति भावः। व्यापारापेक्षस्येति यद्यपि अनंतरफलमित्यत्र व्यापारेणाकृत
स्तथापि यच्छब्दार्थो योग्यपदार्थः सव्यापारविशिष्टो व्यापारोपलक्षितो वाद्य आद्ये यागादीति अंत्ये यस्य व्यापारोऽनंतर
फलं इति पर्यवसितं तत्राह हलाद्यव्यापनादिति आदिपदेन यागस्यापि परिग्रहः न हि सत्यपि अपूर्वे तदानीमेव फलं व्यापारपरंप
ग रेति कर्त्रादेरपि फलपर्यंतं व्यापारविच्छित्तिर्नु परं परापेक्षया अनंतरफलकत्वमस्त्येव कर्त्रादेरपि फलानंतर्यं वा नु न हि स्व [अ]
व्यापारः स्वस्यव्यवधायकः तथा च फलाव्यवहितपूर्ववर्तित्वं क्वचित् स्वतः कुत्रचिद्व्यापारद्वारा वेत्याशयः हेतोः स च इति तथा च तज्जन्म

जनकत्वघटितं व्यापारत्वमित्यर्थः। आत्ममनोव्यापारत्ववारणाय तज्जन्य इति विशेषणं। अस्तितावदिति अनन्यथासिद्धत्वे
सति पूर्वभावित्वमेव कारणत्वं न च रासभेऽतिव्याप्तिः। अस्य च कृप्तपूर्ववर्त्तिसहभावित्वेन तस्यान्यथासिद्धत्वात्। ।
नियतत्वमपि तद्व्यक्तिं प्रति तस्यास्त्येव घटत्वावच्छिन्नं प्रति नियतत्वं विवक्षितमिति चेन्न यदा घटस्तत्र प्राक्काले
रासभ इति नियमस्यापि सत्त्वात् यत्र घटस्तत्र पूर्ववर्त्तिताभिमत इति नियमो विवक्षित इति चेत् न सत्त्वं किंतु तद्वारणी
यस्य रासभस्यानन्यथासिद्धपदेन वारणादित्यर्थः। केनचिदिति तत्स्वरूपमिंद्रियत्वादिकं न्यूनवृत्तित्वादिति प्रमाकर
णत्वं वाच्यं तथा च प्रमात्वावच्छिन्नकार्यं प्रति तेन रूपेणेंद्रियस्यापि प्रमाकरणतापत्तिः। नियतपूर्ववर्त्तित्वं तत्त्वयैवोपपा
द्यमिति विद्यासागरस्य मतनिरासाय व्याख्यानं तथाकरणतायामननुगमतापत्तेरवस्यात् न हि घटपटप्रमात्वमनु
गतं घटप्रमात्वमनुगतमिति चेत् न तस्यापि प्रकारत्वघटिततया तस्य च तत्तज्ज्ञानव्यक्तिगर्भस्यात्वं न मनुगत
त्वान्निर्विकल्पकेऽसत्त्वाच्च निर्विकल्पकरणः। पंचमप्रमाणतापत्तेश्च भ्रमभिन्नानुभवत्वं चेत् न तथापि तादृशधर्मेण
कारणतायां किंमानं जन्यप्रमासकरणिकाक्रियायां लाघवमतवदित्यनुमानमेव परिशेषेण तत्रमाणमिति चेन्न

प्रमाकरणत्वे सिद्धे तेषामनेन रूपेण नियतत्वावच्छेदकत्वं सिद्धं च तस्यावच्छेदकत्वाभिन्नरूपेण नियमसिद्धिरित्यन्योन्याश्रयः
अदृष्टविशेषत्वमेव तथेति चेन्नासिद्धेः धर्मित्वाधर्मित्वाभ्यां सांकर्यापत्तेर्न सा जातिस्तदन्यो विशेषस्तु दूरत एव। शक्ति
विशेषत्वं तथेति मीमांसकानामेव शोभते अन्यतरत्वमेव तथेति तु न्यायमतं तन्नैवं व्यभिचारिणमन्तर्भाव्यापि कारण
तास्यादिति नियतपदं कारणतालक्षणे व्यर्थमेव स्यान्न व्यभिचारिणोप्यन्यतरत्वेन नियमसंभवादिति वाच्यमन
एवप्रकारांतरेणासिद्धेः कारणत एव तदुद्देशार्थमन्यतरत्वोपात्त्याकल्पनया।। एतेनैवाखंडोपाधिः प्रमाणेनेत्यपास्तमन्यतरत्व
स्यावश्यकत्वान्नैव तदन्यथासिद्धेरिति दिक्। मनःसंयोगादेरिति तथा चेन्द्रियस्यानुमितिकरणतापत्तिरिति भावः। आदिप
देनेश्वरेच्छापरिग्रहः अप्रमासाधारणं तथा च जन्यज्ञानत्वावच्छिन्नं प्रत्येव तन्न कारणं तेन प्रमाऽप्रमात्मकयोः कार्ययोर्वैल
क्षण्यं न स्यादिति भावः। अपि चाज्ञादेव कारणतापत्तिरिति मनःसंयोगादेरेव तथात्वमित्यस्यैव विशेषोऽयं अकारणतापत्तेरिति प्रमा
याभिनिवेशं एकत्वकरणद्वयोर्गौरवादिति भावः इति विद्यासागरः वस्तुतस्तु इन्द्रियलिंगादिसाधारणरूपेण इन्द्रियादेः प्रमाप्रसका
रणत्वे साक्षात्कारकारणतापि न स्यादित्यर्थः तत्र हेतुः यत्सामान्यदृष्टादिदर्शनादित्यंतः यत्सामान्यमित्याद्यप्रयोजकं सामा

न्यकारणतायाविशेषकारणतानुपपादकत्वादित्याशयेनशंकतेप्रमात्वप्रयोजकमिति यदिकार्य्यसामान्यकारणसामाग्र्ययो
र्निरूपाधिःसंबंधस्तदाविशेषयोरपिसकाचाएवेत्युक्तभावन्नेत इत्याशयेनपरिहरतिनिरूपाधित्वेति अत्रविपक्षेवाधकमा
ह अन्यथेति सामान्यावच्छेदेनयत्नकारणत्वंनयदिविशेषेणस्यात्तदाव्यक्तिकारणंनस्यादित्यर्थः इतिमिश्रव्या
ख्यानमयुक्तंप्रमासामान्यप्रयोजकस्यानुमितिप्रमायांव्यक्तिस्थानीयायांप्रयोजकत्वेपिअनुमितिप्रमात्वेन
प्रमाकरणत्वेनेंद्रियप्रयोज्यंअनुमितित्वस्यतदप्रयोज्यत्वात तथाचानुमितित्वप्रयोजकंलिंगमेवेतिशंकायाअपरि
हारात् अतएवव्यक्तेर्वकारणतापत्तिरित्यपिनतर्कः व्यक्तेरपिसामान्यधर्मावच्छिन्नकारणताश्रयत्वादेवान्यथा
कारणतायानिराश्रयतापत्तेःसामान्यधर्मावच्छिन्नस्यविशेषत्वनियमात्तदवच्छिन्नासामान्यधर्मावच्छिन्नाकारणतामि
थ्यैवस्यादिति। तस्मात्प्रमासामान्येमनःसंयोगादिःप्रत्यक्षादाविंद्रियलिंगादिः ननुसामान्याप्रयोजकस्यविशेषा
प्रयोजकत्वंप्रमाणाभावादितिशंकार्थःसामान्यप्रयोजकस्यैवधर्मविशेषावच्छिन्नस्यविशेषप्रयोजकत्वंस्यात्तनु
अक्लृप्तेंद्रियत्वलिंगत्वादिनिमनःसंयोगविशेषएवप्रसक्तानुमितित्वादौप्रयोजकःस्यान्नलिंद्रियलिंगादिकमिति

परिहारार्थः यथा प्रमात्वसामान्यमनःसंयोगसामान्ययोः संबंधो निरुपाधित्वान्मनःसंयोगविशेषप्रत्यक्षादिप्र
मा विशेषयोरपीत्यर्थः । सामान्यस्य प्रयोजकत्वे विशेषस्यापि प्रयोजकतयाः क्लृप्तत्वात् विशेषेपि तद्विशेषस्यैव प्रयो
जकता या लाघवेन कल्पयितुं युक्तत्वात् न तु इंद्रियत्वप्रत्यक्षत्वादिना इंद्रियत्वेन प्रयोजकता माः क्लृप्तक्लृप्तत्वादिति सिद्धां
तभंगापत्तेरतो न मनःसंयोगत्वेन प्रमाकरणत्वमपि त्विंद्रियाद्यन्यतरत्वेन तत्तत्तद्विशेषप्रत्यक्षादिकं प्रतींद्रियत्वादिनेति तत्र वसि
द्धांतः तत्र तथा अनुमितेरिंद्रियत्वेनेंद्रियाजन्याया अपि अन्यतरत्वेनेंद्रियजन्यत्वात् अनुमितिरिंद्रियकरणिका स्यात् परामर्शस्यतः अन्य
त्वे सतींद्रियजन्यानुमितिजनकस्येंद्रियव्यापारत्वादिति नन्वनुमितित्वे प्रयोजको मनःसंयोगविशेषः कः कश्च प्रत्यक्षत्वे
प्रयोजकं इति चेल्लिंगपरामर्शकालीनत्वं इंद्रियसन्निकर्षकालीनत्वं च एवमन्यत्रापि वाच्यं न चैवं तयोरेव कारणत्वमु
चितमावश्यकत्वादिति शंकाथा मा इति निरुपाधित्वाविशेषादिति यथा सामान्ये तस्य सामान्यरूपेणानन्यथासिद्धा
न्वयव्यतिरेकित्वं तथानुमित्यादिविशेषेपि मनोयोगस्य लिंगपरामर्शकालीनत्वादिना अनन्यथासिद्धान्वयव्यतिरे
कित्वमिति कारणताप्रमाणसिद्धेरित्यर्थः । यद्वा अंकुरादेः कारणत्वं तस्य वीजसामान्यस्यांकुरसामान्यप्रयोजकत्वे

यथा वीजविशेषस्यैवांकुरविशेषप्रयोजकत्वं तथा मनःसंयोगविशेषस्यैव प्रयोजकत्वं स्यान्नत्विंद्रियत्वादिना नतः फलित
माह तत इति प्रमाविशेषस्याद्यादेः करणत्वं वदता येन धर्मेण तस्य प्रमां प्रति नियतत्वमुच्यते तेनैव धर्मेणानुमितिरिंद्रियकरणिका प्रमायामपि
तस्यानियतत्वादनुमितिरिंद्रियकरणिका स्यादिति योऽनिष्टप्रसंगः स तदुपपन्न इत्यर्थः। अत्र शंकते इंद्रियस्य नियततोपपत्तावपि नानुमि
तिरिंद्रियकरणिका प्रमात्वरूपेण तस्य प्रयोजकत्वेऽप्यनुमितित्वरूपेणास्याप्रयोजकत्वादिति प्रमात्वेन तन्न प्रयोजकमिति
तदिंद्रियस्य नियततोपपादकं रूपमित्यर्थः। परिहारार्थस्तु निरुपाधिकत्वमिहानन्यथासिद्धान्वयव्यतिरेकित्वं यथा प्र
मात्वं प्रति निरुपाधिकमिंद्रियस्यान्वयव्यतिरेकित्वं तथानुमितित्वादि प्रत्यपि तयोरविनाभावात् एवं चानुमितिरिंद्रिय
करणिका स्यादित्युक्तदूषणपरिहाराय कोऽपि अधिको वाक्यार्थो नोक्त इति ननु सामान्यं सामान्यस्यैव प्रयोजकं स्यात्तन्न
तु तद्विशेषान्वयेत्ति त्वाद्यावित्याशंक्याह सामान्ये [illegible] त्वादिविपर्यये दंडमाह अन्यथेति तंतुसामान्यस्य पटसामान्यप्रयोजक
त्वेन पटविशेषकारणत्वं न स्यात्तंतुत्वाक्रांतस्य पटव्यक्तिप्रयोजकत्वाभावादित्यर्थः। ननु तंतुसामान्यमात्रं न पटव्यक्तिविशेषप्रयोजकं
सर्वव्यक्तीनामेकदा स्यादापत्तेरिति तां [illegible] तद्विशेषेण तंतुसंयोगोऽपि हेतुरिति चेत्तर्हीहापि लिंगपरामर्शोऽपि हेतुर्वस्तुतस्त्विंद्रिय

स्यापि नियततया कृप्तस्यापि त्यागङ्गनीन्द्रियकरणत्वमनुमितेर्दुर्वारमिति । ननु कारणानिरूपितमेव प्रमाणलक्षणं दूषणं तद्यास्तुद्
भासं कृते अव्यवस्थादिकुठारदोकरणे यन् करणत्वं तत्र यत्किंचिन्नलक्षणमस्तु । अयं भावः करणमात्रविचारो न प्रस्तुतः किंतु प्रमाणनि
र्वचनखंडनोपाय तयात्र प्रमाणमन्यथैव निर्वाच्यमित्यलमप्रस्तुतकरणविचारेणेति । तदेवाह प्रमाविवक्षितजातिविशेषेतिप्रमाया
विवक्षिता ये जातिविशेषाः प्रत्यक्षानुमितित्वादयस्तेषां यवस्थापकमित्यर्थः येषां जन्यतावच्छेदकाः प्रत्यक्षत्वादयः अनुभवत्वसा
क्षाद्व्याप्यधर्मावच्छिन्नकार्यतापतियोगिककारणतावच्छेदकाश्च यद्वृत्ति यावत् विवक्षितपदं चात्मत्वपत्वादिवारकं तथाऽव्या
प्तिवारकं अनुभवत्वसाक्षाद्व्याप्यं कारणतावच्छेदकानि लिंगिन्द्रियत्वज्ञानत्ववर्णज्ञानत्वधर्मज्ञानत्वानि तदाश्रयाः इन्द्रियलिंग
ज्ञानपदज्ञानसादृश्यज्ञानानि भिन्नव्यपदेशः प्रत्यक्षमनुमितिरित्यादिः न च प्रमातेति एकस्मिन्नपि प्रमेये एकस्यैव प्रमातुर्नानाप्र
माणदर्शनान्नथा च तयोंसाधारणत्वादिति हेतुः पूरणीयः भिन्नबुद्धिव्यपदेशभाज इति पाठे प्रत्यक्षमनुमितिरित्यादिविलक्षण
बुद्धिव्यपदेशः शब्दः प्रत्यक्षमित्यात्मकः तद्भाजस्तद्विषया इत्यर्थः । यथा तथमिति यथायोग्यमिति प्रत्यक्षं प्रत्यक्षव्यवहारेऽसाधा
रणमेव मनुमानमिति तथा च तादृशव्यवहारासाधारणे कारणं प्रमाणमित्यर्थः भवति हि इंद्रियजा प्रमा लिंगिकी प्रमा शाब्दी प्र

माऽउपमानिकीप्रमेति भेदव्यपदेश इति भावः भांडालेख्यमिवेति आलेख्यं रेखोपरेखादि सर्वभांडसाधारणं यथा न भांडविशेषणलक्षणं
तथा पुरुषाधीनादि विवक्षापि न विशेषिके इत्यर्थः ननु विवक्षितप्रमाजातीयत्वं साक्षात्कारित्वादिजातेव विवक्षणीयं तथा च न तत्र साधा
रणकारणत्वमेव लक्षणं तच्च न भांडालेख्यमिवेत्याशंक्या हार्थजलस्येति अर्थः कर्म तदपि साक्षात्कारे करणं स्यात्तस्यापि व्यपदे
शत्वादित्यर्थः। विद्यासागरस्तु भंडो भंडकस्तस्यालेख्यं देवदत्तस्य किमप संजनयिष्यतीति पृष्टस्य भंडकस्य पुत्रं न पुत्री मिति वाक्यं कुआ
दौलिखितं यथा न विषयविशेषनियतं निवेषस्योभयत्रापि योजयितुं शक्यत्वात्तथा विवक्षितपदमपि पुरुषेच्छाया अनियतत्वेन क
स्यचित्कतमः प्रमिता या विवक्षिता कस्यचित्पंचेति न च तु पृथग्जातीयस्येव नियमेन प्रत्याययितुं समर्थमित्यबुद्धिपूर्वमिव आलेख्य क
विशेषप्रतिपत्तौ प्रत्येकसमुदायविकल्पेन दूष्यं आलेख्यं लिपिविन्यासे वाक्यं वेति व्याचख्यौ तत्तु पाठांतरमेव साक्षात्कारित्वं प्रती
तियथा साक्षात्कारि ज्ञाने इंद्रियं करणं मितींद्रियजं प्रत्यक्षमिति व्यपदेशस्तथार्थोपि कारणमित्यर्थजं प्रत्यक्षमिति व्यपदेशः स्यं
भवादर्थोपि प्रमाणं स्यादित्यर्थः प्रत्यक्षे कर्मणो वशादेः कर्तृत्वं मतिव्याप्तिमाह आपन्नेति अनतिप्रसंगादिति कर्तुरपि प्रमाणत्वप्रसंग
इत्यर्थः पूर्वोक्तमिति दूषणमित्यर्थः आप्तप्रमाणशब्दस्य गोणत्वमुक्तमिति यावत्। विवक्षितेति प्रमित्यस्य समवायिकारणस्यात्म

संयोगस्य विशेषकर्मत्वोपाधीति विवक्षितजातिभेदौपाधिकतयेति मनस्त्वत्वानत्वविशिष्टौपाधिकतया संयोगस्यावर्त्तकं इंद्रिया
दिकं तु प्रत्यक्षत्वादिजातिविशिष्टप्रमितिसमवायिकारणस्य आत्ममनःसंयोगस्यावर्त्तकं इंद्रियादिसहितस्यैवात्ममनोयोग
स्य प्रत्यक्षादिकारणत्वात् प्रमितिकारणविशेषकत्वं द्रव्यादेः प्रतीत्यसमवायिपदं प्रमितीत्यस्य अनुपादेने रूपादिव्यावर्त्तकेपाक
जत्वेऽतिव्याप्तिः विवक्षितपदानुपादाने चाक्षुषत्वजात्यौपाधिकप्रमित्यसमवायिकारणविशेषत्वं चक्षुषएवेति भागासिद्ध्यापत्तेः
विवक्षितजातिभेदविशिष्टप्रमित्यसमवायिकारणविशेषफलत्वं प्रमाणत्वमित्यत्रापि विवक्षितपदार्थघटिततयैवास्यार्थः। ननु विव
क्षितजातिभेदपदेनानुभवत्वसाक्षात्त्वप्रज्ञातयो विवक्षिता इतिनोक्तदोष इति चेन्न तथापि प्रमितेरननुगमात् प्रमाणत्वलिंगस्या
न्यथा च प्रमाणादिषोडशपदार्था इति विभागानुपपत्तिः धर्मिप्रसप्रमाणविषयीकृतस्य शुक्तिरजतस्यापि प्रमेयत्वापत्तेः तदंशे प्रमा
णत्वं नास्तीति चेदितरांशेऽपि तत्स्यात् बाधाबाधाभ्यां विनिगमना प्रागेव दूषिता प्रमित्यसमवायिकारणव्यावर्त्तकं च नेंद्रियलिंगसहि
तत्वादिकं सहकारिणः कारणतानवच्छेदकत्वात् लिंगत्वेनैकमतिः। अथ प्रमाणत्वमखंडउपाधिरेव सत्यं न प्रमायामंशे पि
पदार्थविभाजकोपाधिश्चेति नव्यन्यायविद इति चेन्न स्यादप्येवं यदि तत्प्रमाणं किंचित्स्यात्प्रमाणाकारानुगतमतिश्चेत्तु

र्द्धि प्रमात्वं करणं चा''' खंडितोपाधिरित्येवस्यादन्यथा प्रमाणपदस्यासाधुतापत्तेरितिदिक्। उपसंहरतीतिप्रमाकरणानिरुक्ति
दूषणानि। विशेषप्रमाणलक्षणं खंडनद्वारेणापिप्रमाणसामान्यलक्षणं खंडनीयं निर्विशेषत्यसामान्यस्याभावादित्या
शयेनस्वभिमतसादिना प्रतिबंधव्यानीति प्रतिज्ञायदूषयति तत्याहीतिस्तेन सामान्यखंडनेनैवविशेषतोपिखंडितानास्र
नि: विभवंतिसामान्यानांविशेषव्रणोमभावात्तत्तेषांपृथक्खंडनं व्यर्थमितियद्दूषयिष्यंतितेषामाशयाज्ञानमेव किंच
निःसामान्याश्चपिविशेषाःसंभवंत्येवयथाबौद्धानांसामान्यमपलपतांमुख्यवृत्त्यादृयमिष्टतामितिनाशंक्यासं
भवदुक्तिकापीति। प्रथमंतोलक्षपादोक्तं लक्षणंदूषयतिप्रत्यक्षमितिइदंचयद्यपिसाक्षात्कारिप्रमायाःस्वलक्षणं
नप्रत्यक्षप्रमाणस्यतथापितत्ताद्रशंप्रत्यक्षंयततस्तत्प्रत्यक्षमितितियतंपदमिहाध्याहार्यमन्यथाप्रत्यक्षानुमानोपमा
नशब्दाःप्रमाणानीतिविशेषोद्देशेनासंगतापत्तेरितिनेतृसूत्रव्याख्यातृभिरिदंप्रत्यक्षप्रमाणलक्षणत्वेनकथितमिति
तन्नखंडनं साधुसंगच्छते अव्यपदेश्यपदंवैभाषिकखंडातिप्रावीरणाय अव्यभिचारिपदंप्रत्यक्षाभासवारणाय। तत्रसर्व
लक्षणानांनिष्प्रयोजकत्वंकथयितुंप्रयोजनंविकल्पयति सजातीयविजातीयेत्यादिनातथाचनिष्प्रयोजनाभिधा

यिनः खंउनिकैवश्वव्यवच्छनाउपेक्षाहवेतिप्रयोजनत्वंउनाशयः। सजातीयं प्रमाणत्वेनानुमानादिविजातीयं
प्रमेयादितितोव्यवच्छिन्नस्य बाध्यतात्रैस्यप्रकाशत्वर्थमित्यर्थः। यस्मादिति यस्मात्प्रत्यक्षत्वेन सजातीयादिदं व्यवच्छेद्यं
तस्माद्व्यवच्छेदावधित्वेदाःस्याव्यावृत्तत्वेवर्त्तमाणत्वेव्यवच्छेदकत्वं नोपपद्यते वैधर्म्यस्यैव व्यावर्त्तकत्वात्तु अव्यापक
त्वादितिप्रत्यक्षत्वाक्रान्तेतस्मिन्नसत्वादित्यर्थः। इदं लक्षणं सजातीयाद्व्यावर्त्तकमित्युक्ते यद्यपिलक्षणेन समान
जातीयमित्यापादितेतोभतिर्जायते तथापिलक्षणत्वानुपपत्त्यात तदतिरिक्तरूपेणसाजात्यमेववाक्यार्थइत्याशंक्या
ह विजातीयेति प्रमाणत्वादिनेत्यादिपदेन बुद्धिकरणत्वादेः प्रमेयावृत्तिधर्मस्यसंग्रहः। तथानुमानादिकमेव सजाती
यं विजातीयं तु प्रमेयादिकमित्यर्थः अयंभावः प्रत्यक्षसजातीयाव्यवच्छिन्नमित्युक्ते प्रत्यक्षपदं प्रथमतः प्रत्यक्षानुपस्थाप्य तज्जातीय
मेवोपस्थापयति तत्रबाधेसतितद्गतं धर्मान्तरं प्रमाणत्वादिकं यदुपस्थापयति तत्र बाधकाभावे येनरूपेणसजात्यमितिप्रत्यापयति
अव्याप्तलक्षणपदमिवद्विजातिमितिशब्दस्य स्वभावं किंच प्रत्यक्षानुमानोपशब्दाः प्रमाणानीति सूत्रेण प्रमाणसामान्यं विभक्तमतोपि प्र
माणत्वेन सजातीयस्यैवलाभः। इति। प्रत्यक्षमपि प्रमाणसजातीयमेवानुमानवदिति तदपि व्यवच्छेद्यं स्यात्तनन्यस्य समादपि स्वस्य

व्यवच्छेदो लक्षणफलं स्यादिति तर्हि लक्षणस्यापीतिशब्दस्य पदार्थप्रमाणताकांतं सजातीयं तत्र व्यवच्छिद्यते प्रत्ययदोपि तर्हि
सजातीयसत्वाद्व्यवच्छेद्यतास्यात्तत्रश्च तत्र लक्षणमस्ति वा आद्येऽतिव्याप्तिरन्त्येऽसंभव इत्यर्थः । लक्षणस्य यदिति प्रमाणतेन
सजातीयाल्लक्षणेन व्यवच्छिद्यत इत्युक्ते सजातीयदोषस्यापि काका व्यवच्छेद्यतास्यात्तत्रश्च तत्र लक्षणमस्ति न वा आद्येऽतिव्याप्तिरन्त्ये
थं लक्षणस्येति वुद्ध्यतेनेन पक्षालक्षणस्य भिन्नत्वेनोपस्थापनादनुमानादिकमेव लक्षणसजातीयं ननु लक्षणमिति संबंधस्याभि
न्नाधिष्ठानत्वादित्यर्थः । एवं सती लक्षणभिन्नव्यवच्छेदफलं लक्षणमित्येवोच्यतां नाम लक्ष्यभिन्न गतसजातीयवैजा
सकथनेनेत्याह एवं तर्हीति । ननु तथापि लक्षणनिष्ठस्यानुमानादेः प्रतियोगिकभेदस्य ज्ञानमेव प्रयोजनमित्याशंक्या
हृदयदेवेति परेभ्योऽनुमानादिभ्यः प्रत्यक्षस्य भेदं विना परेषां प्रत्यक्षाभिन्नत्वमनुपपन्नमित्यर्थः सिद्धमेवेतराभिन्नत्वमि
त्यर्थ इत्यपव्याख्यानं मैथिलानामर्थपदेन यद्यर्थापत्तिरुच्यते तदा लक्षणमपि न दोषकं संभवात्तुकिमित्युपेक्षणी
यः तस्माल्लक्षणान्यत्वेन लक्षणस्य ज्ञानं विना अलक्ष्येषु लक्षणान्यत्वं दानुमशक्यं स्वतोऽपि प्रसंगात् अन्यतश्चालक्षणान्य
त्वप्रतिपत्तावेवालक्ष्यस्यापि लक्षणान्यत्वप्रतिपत्तावलक्ष्यस्य ततोऽन्यत्वं लक्षणाभिधानात् प्रागेव सिद्धमिति व्यर्थं ल

द्दृणाभिधानमित्यर्थ इति विद्याभागरोक्तं व्याख्यानं साधु वस्तुनस्तु तद्दाणस्मादन्यत्वमपीति ग्राहकसामग्र्याः प्रति
योग्यात्मनः त्वसार्थधर्मिज्ञानस्य च सत्त्वात् ज्ञानात्मनामनुमित्यादिकारणानां प्रतियोगिनां त्वद्दाभेदाश्रयत्वेनोपस्थि
तेः धर्मेणाश्च त्वद्दपभेदप्रतियोगित्वेनोपस्से निर्विवद्दाविविच्चीलद्दाभिन्नव्यवच्छेदफलकत्वस्य समानासमानजा
तीयत्वसत्वलक्षणस्य वक्तुमिष्टात्तदधीनमभिधानवैचित्र्यमित्यर्थः। प्रतिप्रसंगादिति सर्वदा सर्वेषामेव लक्ष्या
णां सर्वानप्रतिव्यवच्छेदकत्वस्यादविशेषादित्यर्थः। अप्रत्यक्षविशेषत्वादिति इंद्रियार्थसन्निकर्षरूपमुख्यनैर्विशेष
णमप्रत्यक्षमित्यर्थः यद्यपि चोत्पत्तिरप्रत्यक्षान्ना व्यक्षणजन्मरूपत्वात् तथापि भट्टमतेन स्पक्रियारूपत्वात्प्रत्य
क्षत्वसंभव इति विशेषप्रत्यक्षत्वमेवोक्तं इंद्रियाणां चक्षुरादीनां स्वं स्वं कार्यं तेन कारणमनुमीयतां नत्वन्यथानुपपत्त्या
वा कारणमनुमीयतामतो नाप्रत्यक्षाविशेषणेनादोषाय विशिष्टज्ञानं प्रति विशेषणज्ञानस्यैव हेतुत्वादित्याशंक्याह
ताभ्यामपीति चाक्षुषादिकार्यस्य कारणं चक्षुरादि सिद्धमिति नत्वनुगतमिति न तच्च अनुगतकारणसिद्ध्या चक्षुरादि
प्रत्येकघटितत्वे व्याप्त्यप्रसिद्धिरित्यर्थः। अथ यथारूपोपलब्ध्यादिलिंगेनाननुगतेनैकारणं सिद्धमिप्रत्यक्षरूपका

र्घ्य लिंगेन प्रत्यक्षस्यानुगतकारणमिंद्रियं सिद्धतीत्याशंक्यनेकार्थ्यस्यैकजात्यादिति प्रत्यक्षतात्मकजातेसैक्या दितितथा यद्यपि प्रत्यक्ष
त्वेन न कार्यता तस्य प्रत्यक्षे विसत्वात्तथापि जन्यप्रत्यक्षत्व थ्यैतिभावः। अव्याप्तेवेति अव्याप्तिपदं मेकदेशाव्याप्तिसर्वाव्याप्त्योः।
संग्राहकमनोन न्यूनता। लक्षणस्यादुष्टत्वेपि न तन्त्रणेनुस्तवदोषमापादयन्नभजयहेतुभवत्वेवेत्याशयेनाह मेवमिति
लाघवे हेतुमाहावच्छानुच्छेयत्वेनेति कार्यगतेनैकरूपानवगतो कथितलक्षणस्यैवावगत्यभंतरेनावच्छानुच्छेयत्वेऽव
च्छेद्येपत्वमिति यावत्। अवच्छेद्येपत्वे हेतुः प्रथमभाविनयेति प्राथम्यं च तस्य कार्येकस्यावगमस्य लक्षणावे[illegible]ग
मं प्रतिहेतुत्वादिति भावः। इतरस्य गुरुत्वे हेतुमाहावच्छानुच्छेयत्वेनेति साधनांतराद्वायुकादेव साध्यसिद्धेर्नावच्छं तदपेदा
तिभावः विपरीतमेव किं न स्यादित्यत आह चरमभाविनयेति लक्षणस्य लद्युक्तस्य चरमभावित्वान्नैवं परित्यमिति भावः। प्रदीपे प्रदीपमिति
प्रदीपं प्रज्वाल्य प्रदीपे प्रदीपांतरमुपयनमानस्येत्यर्थः। प्रज्वलितप्रदीपेनैव तमोनाशस्य सिद्धेस्तमोनाशाय प्रदीपांतरे यत्नइववदृथा। ननु वि
घ्मोदृष्टांन स्तद्धद्वितीयो दीपोवत्नः कार्यानुपयुक्तत्वान्न निहलक्षणं दुष्टमिति म्याप्त्यादिरहितत्वादि त्याशंक्याहनहीतिनाहिदीपांतर
त्तमोनिरासक्षमं येन दुष्टं स्यात् कथं तर्हि साधने समीचीनेन फलमिति चेत्कोब्रूते न फलमिति नत्साध्यमानं दीपांतरेण तमोनाशयति

प्रथमवर्तनस्यापि सामर्थ्यसत्त्वादेव न हि तत्र कोऽपि दुष्टः कर्त्रैव तदा दुः दुष्टस्यार्थस्य संसिद्धो को विद्वान यत्नमाचरेदिति तथा च तत्र
कर्तृदोषादेव प्रदीपान्तरेनन मशोनाशाकं विद्यमानेपि न मस्यानीयमानत्वान्नतु स्वतन्त्रस्य सामर्थ्याभावरूपान्नष्टेति । ननु
न हि भवतु पुरुषदोषाल्लक्षणं तु स्वकार्यं साधयेदेव न हि निर्दोषमपि न साधनमिति शक्यं वक्तुमित्याशंक्याव्याप्त्याद्यात्मकस्य
लक्षणासाधारणदोषविधुरस्यापि लक्षणसाधनसामान्यदोषेन दुष्टत्वमाह सर्वेति एवंविधं प्राथमिकावस्थानुष्ठेयं संभवति
यस्मिन लघूपाये तन्नू संभवादेवं विधलघुपायत्वे ननु यस्य प्रत्यक्षलेनेतरभेदेनव्यतिरेकव्याप्तिग्रहो न जातस्तस्य लक्षणमिदं बोधक
मिति मिति चेन्न तथा सति तदधीनलक्षणज्ञानस्याप्यसिद्धेः साधनत्वस्यानन्यथासिद्धत्वांशस्तत्र नास्ति तन्नू संभवादेवं विधलघुपायस्त
त्वेइदमुक्तं भवति तादृशेल ध्यावुपाये संभवति गुरोरूपायत्वमेव नास्ति उपेयस्यान्यनैव सिद्धेः उपेयते साध्यमानेनेत्युपायः प्राथमि
कप्रदीपनिरस्ततमसि ज्वाल्यमानदीपान्तरस्य तमोनिरासं साधनत्वाभाववत्तूनं सर्वसाधारणदोषमुदाहरति स्वरूपासिद्धिरितिप्रस
ङ्गादिप्रमाणानां स्वरूपासिद्धिर्यथा श्रुतीद्वितीयपक्षे प्रत्यक्षस्यानुमानस्य च बुद्धो धर्माधर्मविरीसर्वज्ञत्वादिनिशब्दोपि यथा प्रमितलक्ष्यदाप्रमा
न ग्रंजयत्येव यथा सर्वमप्रमाणमित्यादि एवमन्यदप्युदाहार्यमनुचितं चैतन्नू यस्य स्वरूपं नास्ति स कथं प्रमाणं संभवेदिति । परानृष्टहेतुं कथय

निसाक्षादिद्विसाक्षात्कारित्वे प्रतीतिर्व्याप्तिरेकेन कथितप्रत्यक्षलक्षणस्य दुरधिगमत्वमित्यर्थः। अस्तु तर्हि साक्षात्कारित्वमेव लक्ष
णसिद्धिरित्याशंक्याह साक्षात्कारित्वे सिद्धे लक्षणसिद्धिः सिद्धे च लक्षणे साक्षात्कारित्वसिद्धिरिति परस्पराश्रय इत्यर्थः। नन्वर्थजत्वं अ
परोक्षव्यवहारप्रत्यक्षत्वे वा इंद्रियजत्वे लिंगं लिंगमस्त्विति न परस्पराश्रय इत्याशयेनाशंक्य दूषयति तथापीति साक्षात्कारित्वाविनाभूततयेति व्या
प्यव्यापकतया सुतरां व्याप्यत्वादिति भावः। सन्निहितप्रतिपत्तिकत्वादिति प्रथमोपस्थितत्वादित्यर्थः। न च साक्षात्त्वेन सह व्याप्तिग्रहोऽयस्य न जा
तः किंतु इंद्रियजत्वेन सह न च तेन तदनुपस्थितिरिति वाच्यं तुल्यसामग्रीकत्वादिति भावः। ननु लक्षणत्वं लक्ष्यव्यापिन एव दृष्टं न तु न तथा उपेक्षाज्ञाने
पिवृत्तेः न चाव्यापकत्वे लिंगत्वमपि तस्य न स्यादिति वाच्यं व्यापकभिन्नस्यापि पक्षैकदेशवर्त्तिनो धूमादेर्लिंगत्वादित्याशंक्य तेन न नदव
व्यमित्यादि। अव्यापकस्य लिंगत्वसंभवेपीह व्यापकस्यैव न द्वैध्यमन्यथा तस्य सार्वत्रिकत्वात् सर्वत्र लक्ष्येऽभावे केन लिंगेनेंद्रियजत्व
मनुमाय साक्षात्कारित्वमनुमेयमतः सर्वस्मिन् प्रत्यक्षे वर्तमानमर्थजत्वमेवेंद्रियजत्वलिंगं वाच्यमतस्तदेव लक्षणमस्तु
इत्याशयेन परिहरति यद्वा न तर्हि लिंगमिति अव्यापकत्वात् पक्षैकदेशवृत्तित्वादित्यर्थः। नन्विंद्रियजत्वे सर्वसाक्षात्कार
वृत्तित्वे सवलक्षणमज्ञानस्यापि व्यवच्छेदकत्वमव्याप्त्यादिदोषत्रयशून्यत्वस्यैव तत्र प्रयोजकत्वमन्यथा लक्षणस्याज्ञानदशायां तत्स्यालक्ष्या

भेदापत्तिरित्याशंक्यते यदा चेत्यादिना लक्षणमिति। यदिंद्रियजत्वं साक्षात्कारित्वव्यापकतयाऽवगतमपि लक्षणमव्यापकेनापि
लिंगेन न नद्दिकोऽपराधः कृतो येन तस्य लक्षणत्वं न भवेत् सर्वस्मिन् लक्षे साक्षात्कारित्वाव्यापकस्यैव लक्षणम्येसर्वपदार्थवृत्ति
त्वतदवृत्तित्वाभ्यां न विशेषः प्रत्यक्षभिन्नेप्येकदेशस्य साक्षात्कारित्वव्याप्येकरूपेणापि व्यावर्त्तनात् तस्मात् सजाती
यव्यावर्त्तकत्वमेव लक्षणतोपयोगि न तु सर्वजातीयव्यावर्त्तकत्वमित्यव्याप्तमपि द्विंशेणं भवेदिति भावः। अत एव क्रियावत्वमपि ल
द्रव्यलक्षणमाचक्षते इत्यभिप्राय निष्कर्षः। अर्थेंद्रियजत्वस्य साक्षात्कारित्वव्यापकतयाऽवगतस्यैव लक्षणत्वं न त अव्यत्रापरोक्षाव्यव
हारहेतुत्वमिंद्रियजत्वव्याप्यं नास्ति उपेक्षाज्ञानात्मा—शादिज्ञाने तत्रापि इदं इंद्रियजं चाक्षुषत्वान्मनोमात्रासाधारणकारणत्वमेव वा लिं
गमस्तु न त अव्याव्याप्तिशून्यमेव लक्षणमिति शेकार्थः। परिहरति तमेवास्त्विति तो लिंगविशेषो अस्त्विति आङ्पूर्वस्यास्तेर्लोट्तस्य
रूपेन तथा च नाभ्यां प्रमितेन साक्षात्कारित्वेनैव प्रत्यक्षाभेदसिद्धौ कारणमैत्रुगमादपि किंदियसत्वं तथात्तथा च लक्षणप्रतीत्योपयिकं तदि
त्याशयेनाह तथा लिंगद्वयमपि पक्षाव्यापकं लिंगद्वयमित्यर्थः व्यापकेनेतनेनेति तथा चालेलक्षणेत्यर्थः एतेनेदमुक्तं यत्र लक्षणव्यतिरे
केन लक्ष्यस्येतरव्यवच्छेदः प्रत्येतुमशक्यं तत्र लक्षणं वाच्यं चामितु इंद्रियजत्वानुमापकलिंगद्वयेनैव साक्षात्कारित्वमनुमाय प्रत्यक्ष
होपि गोतमसूत्रेंतस्य जऊ तमतायावेद्यमीतिभावः। अथ मुनिना प्रत्यक्षप्रमाणे विभाजकतया प्रत्यक्षलक्षणं कृतं विशेषत्रयं च साक्षात्कारित्वलिंगमापिन लक्षणमन

प्रमाणभेदोनुमीयतामितितथाचसंभवल्लघूपायस्यसाधनेगुरूपायत्वमेवनास्तीतितद्युत्पादनेमुनेरविकृतानांसूचयतीति यद्यपिचैव
मविचारदशायांनैयायिकबालकानामनुमानपरंपरोद्देस्यैवतथापिउपायत्वभ्रमादेवततश्चगुरुत्वानुपायत्वेकथंततस्तथाधीरित्यपास्तं
स्वरूपसन्नउपायस्यातंत्रत्वादितिनिषेधेज्ञातेनिषेधज्ञानमितिनिषेध्यमनुवदतिसद्वीति अथवा— तेतिसाक्षात्कारित्वेनेंद्रियजत्वानु
मानमितिकल्पनागौरवादित्यर्थः तथाचसंभवतिलघूपायेगुरूपायमुपदिशतःशिष्यवंचकत्वापत्तिरित्येकोदोषः।
नचायमुपायइतिअनुपायमुपदिशतःप्रतारणाभ्रांतत्वंवास्यादितिभावः। अतएवेतिलक्षणान्तरानादिदोषेणेत्यर्थः
कल्पनागौरवदोषश्चेतिप्रसङ्गावगतप्रत्यक्षत्वजातिपेक्षयाअनेकविशेषणविशिष्टस्यास्यलक्षणप्रत्यक्षत्वस्य
ल प्रवृत्तिनिमित्तत्वकल्पनेगौरवंचाधिकोदोषः सत्संप्रयोगेपुरुषस्येंद्रियाणांजन्मनत्प्रत्यक्षमितिसूत्रेजैमिनिनाऽनूदितं
लक्षणंपरिस्कृत्यदूषयतिएतेनेतिसंप्रयोगसंबंधस्तज्जन्यत्वमनुमानादेरपीतीन्द्रियसंप्रयोगजत्वेनचभासमानेंका
रसंप्रयोगजन्यत्वाभावेनैवतत्रनातिव्याप्तिरितिवाच्यंआत्मानुमितेरात्मापिसत्वातद्इंद्रियत्वनिरूपितसंबंधत्वेनकारण
का तामाश्रयजन्यत्वविवक्षायानदोषःतथाप्यपरोक्षभ्रमेतिव्याप्तिस्तस्यापिपुरोवर्तींद्रियसंबंधजन्यत्वादितिभासमानाकारेति

वध नाम प्रमितिं च यति प्रमाणं विशेषणत्वं तस्य मिति तिः ततः किमिता प्रमात प्रमाणत्व तत्त्वेत्यादि। प्रमाप्रमात्वं निरस्य विशेषणमाभासतो न्यूनत्वमित्यादित्यर्थः।२

यावत्स्वभाकारे विशेषणं बोध्यते न भासमाने न पुरोवर्त्तिनाकारेण यः संबंधस्तस्य त्वेपि रजताकारेण संबंधाभावान्न तज्ज्ञत्या। त्वमिति न दोषः
एतेन निष्प्रयोजनत्वदोषेन इंद्रियसंप्रयोगजन्यत्वस्य दुरवधारणत्वेन वेत्यर्थः। अतिव्याप्तिं अप्रतिक्षेपकं व्यवच्छेदकं ततोपि किमित्यत
आह प्रमाणलक्षणेन च यथार्थानुभवकरणत्वेन व्यभिचारिकरणव्यावृत्तिरुक्ता तथाव्यभिचार्यनुभवकरणं न प्रमाण
मिति तद्व्याप्यस्य प्रत्यक्षप्रमाकरणत्वस्याप्यभावस्तत्र मंतव्यस्ततः फलितालक्षणस्यातिव्याप्तिलक्ष्योंगगमनादित्याद्गु लक्ष
तथा च सतीति तस्यालक्ष्यत्वे सतीत्यर्थः। अलक्षणं लक्षणधर्मीति व्याप्त्याऽश्रुत्पसंत्वादेरित्यादि पदेन दुष्टत्वरूपवत्त्वपरिग्र
हः। अथाकारपदं विशेषाकारपरं न स्वरजतत्वादिकं न च तेन इंद्रियसंप्रयोगोस्ति तस्य विशेषेऽपुरोवर्त्तिन्यसत्वादि
त्याशयेन शंकतेऽथेति तथापीति यद्यपि विशेषविवक्षायामननुगमाद्व्याप्तिरस्त्येव तथापि तामुपेक्ष्य निव्याप्तिर्वनिरस्ता
नादि। रेणैव दूषयति अप्रसंग[illegible]ज्ञिरेदूष्टतातद्धीनता अप्रसंगतमिदं तथापीत्यर्थः। कियन्मात्रेति किंचिन्मात्रमित्यर्थः। आद्यइति
भासमाने नेदमाकारादिना संप्रयोगाद्व्यभिचार्यपि ज्ञायत इति भावः। आकारेण न तिव्याप्तितादवस्थ्यं किं व्याप्तिवारापत
तीत्याह निर्विकल्पेति तद्धि वस्तुमात्रावगाहितया भासमानयावदाकारसंप्रयोगजं ननु किंचिन्मात्रसंप्रयोगजमिति भावः

पूर्वमितिसंप्रयोगात्पूर्वमित्यर्थः। अत्र हेतुमाह कारणस्येति भानकारणमेव भानात्पूर्वं भवति न तु भानमपि भानस्य निर्हेतुक
त्वापत्तेरिति भावः पूर्वं भासमानत्वाभावेऽपि पश्चाद्भासमानत्वान्न तत्संप्रयोगात्प्रत्यक्षं किन्न स्यादित आह कारणस्य चेति पूर्व
भाविन एव कारणत्वादित्यर्थो वा ॥ लटइति भासमानेति लटः स्थाने शानचा विनिर्दिष्टेन गस्थाने विहितस्य शानचो हृपं
नदादेशत्वाद्वर्ततीति न्यायेन लटः इत्युक्तं लड्वर्तमाने विहितस्तदर्थो वर्तमानत्वं सतोऽप्युपलक्षणत्वाद्वर्तमानस्याविव
क्षात्संभवतीति भावः न चात्मनीति घटप्रत्यक्षं न स्वस्मिन्प्रत्यक्षमतो घटेऽपि प्रत्यक्षं न स्यात् तत्र प्रसक्तत्वे वा स्वस्मिन्नपि
प्रत्यक्षं स्यात् स्वस्मिन्प्रत्यक्षत्वाभाव एव कुत इत्यत आहात्मवृत्ति विषयत्वमन्तरेणापि प्रसक्तत्वमस्तु यथा प्रभाकराणा
मित्याशंक्याह प्रामाण्यस्य चेति अविषयेऽपि प्रसक्तत्वे घटोऽयमिति ज्ञानं पटेऽपि प्रत्यक्षं स्यात् यद्विषये तत्र प्रमात्वं स्यात्
प्रत्यक्षत्वं तु न तद्भावेऽपि भवेदित्याशंक्याह यत्र प्रामाण्यमिति सहीति तदिन्द्रियसन्निकर्षजन्यत्वे प्रयोजकं न तु भासमा
नेन्द्रियसंप्रयोगजत्वमात्रमित्याशयः न हि घटज्ञानमात्मनि प्रसक्तं स्यादित्यतिप्रसंगमाह तन्नु किमिति भासमानत्वस
हितेन तत्प्रयोजकं न केवलमिति शंकते कथमेवमिति स्मर्तव्यमिति तथा च भानस्य वर्तमानत्वाविवक्षायामतिप्रसंग

२०५

2O5

न च निर्विकल्पके न भासमानस्य संप्रयोगे ... निर्विकल्पकप्रत्यक्षे ...

इति भावः। आत्मनोऽप्रमेयत्वप्रसंगादिति द्विक। तत्रानिष्ठेनेधायिकारीनामित्याशयः। अवभासमानयावदाकारेंद्रिय
संप्रयोगजं स्वविषये प्रत्यक्षमित्यर्थः न चात्मा घटोऽयमिति ज्ञाने भासमानः न वा घटप्रत्यक्षे पटीयं घटप्रत्यक्षविषयत्व
स्यतत्राभावादित्याशयेन शंकते ऽन्नलक्षणकमिति। दोषदूति घटज्ञानेऽनात्मनि प्रत्यक्षं स्यादात्मनो ज्ञानमात्रविषय
त्वस्य सत्वादिति भावः ज्ञानव्यक्तिर्यदि ज्ञानत्वजात्याश्रयव्यक्तिपरा तद्दोषमादवस्यं अथ लक्ष्मीभूतव्यक्तिपरा तदावि
षयविशेषावच्छिन्नप्रत्यक्षत्वं लक्षणत्वप्रयोजिकादिति नात्मप्रत्यक्षातिव्याप्तिः किं त्वव्याप्तिस्यादित्याशयेन दूषयति नरेति
व्यक्त्यंतरस्येति अतिव्याप्तिस्थलस्येत्यर्थः व्यक्त्यंतरस्य लक्षणे नास्ति लक्ष्यव्यक्तिविशेषाणामसाधारणरूपविरहादित्याशये
न परिहरति न यदेकस्येति समुच्चेतव्यमिति समुच्चयस्यासाधारणरूपमपेक्षितत्वादिति भावः। यदपीति प्रत्यक्षत्वमित्यर्थः।
व्यक्त्यंतरव्यवच्छेदकं स्वपदं विशेषणं प्रतिक्षिपता भवतैवासाधारणीकृतमिति संबंधः प्रत्यक्षमात्रं लक्ष्यं परित्यज्य विषयाव
च्छिन्नप्रत्यक्षत्वं यालक्ष्यमुपात्तमनोऽसाधारण्यमिति भावः स्वत्वमनुगतमभ्युपत्यातिव्याप्तिरुक्ता संप्रति तदपि नास्ती
त्याह स्वत्वस्येति तद्विजातिरूपाधिर्वा आद्ये सामान्यादीनां जातिशून्यानामप्रत्यक्षतापत्तेः नाप्युपाधिस्तत्वे स्वत्वस्या

वृत्तौ तत्प्रत्यक्षाव्याप्तिः वृत्तौ च तत्तद्देवस्याप्यस्मिन्नुवर्त्तते चेत्तदात्माश्रयः अन्यक्षेत्रेऽहि तत्राप्यन्यदिसेवमनवस्थास्यात् नवास्त्वं त्वात्मेधर्मे मान
मस्तिकिं वान्नदितिशक्यते निर्वक्तुमित्यर्थः स्वरूपस्य सर्वनाम तया सर्वत्र प्रवृत्त्यानुपपत्त्यानुगतेपदार्थे रभास्येयं चेत्तदा घटज्ञानस्य
घटमात्रविषयस्य अव्याप्तिः न स्वविषये स्वस्मिन्नपि प्रत्यक्षतापत्तिरित्युक्तदोषान्न विमोकः घटस्येव घटज्ञानस्यापि स्वपदार्थत्वादि
तिभावः। ननु माभूदनुगतं स्वत्वं किमनद्रूपनन्त्याद्यान्यव्यक्तिविषयस्येति तथा च लक्षणान्यव्यक्तिविषयस्य तथात्वापत्तेरप्रत्यक्षता
पत्तेरित्यपि कुचिह्नाचष्टे ननु घटज्ञानस्य स्वविषयत्वे आपादकाभावः न हि यत् प्रत्यक्षं तत्सर्वत्रविषये प्रत्यक्षमिति क्वचिन्सिद्धं
अथ प्रत्यक्षं स्वविषयस्यैव प्रत्यक्षमित्यपि सिद्धमिति चेन्न स्वविषये प्रत्यक्षमित्यत्र कस्यापि विवादाभावे अन्यविषयत्वस्यानुभव
वाधितत्वेन एवार्थस्यापि सिद्धेः अथ स्वविषयविषयत्वं घटप्रत्यक्षस्य यथा तदिन्द्रियसन्निकर्षजत्वेन तथा ज्ञानविषयत्वमपि स्यात्तो
ऽस्य विनिगमकत्वे पटविषयतापि स्याद्दोषादित्युच्यते तन्न घटप्रत्यक्षस्य पटविषयत्वे मानाभावादनुभवविरोधाच्च अत एवेदं नत्वं
पटप्रत्यक्षस्य घटमात्रविषयत्वे मानाभावः घटेन्द्रियजन्यत्वं तथेति चेन्न तदेव कुत्रेति वक्तुमशक्यत्वात् स्वत्वेन घटप्रत्यक्षे तदभा
वप्रसंगाच्चेति भावात् वर्त्तमानत्वमित्यनन्तरं भासमानत्वस्योपलक्षणीभूतस्येत्यर्थः उक्तदोषापत्तिरिति इन्द्रियसंप्रयोगभास

मानसयोरेककालत्वादिंद्रियसंप्रयोगस्य भासमानकारणत्वानुपपत्तेरित्युक्तएवदोषइत्यर्थः। अविवक्षितार्थत्वेस्यादिति ग
भासमानेतिविशेषणेनभाषितं भाविष्यमाणंव्यवच्छिद्यते नत्वाशंक्यं नयोरपितत्कालीनकिंचिदपेक्षयाव
र्तमानत्वात् इत्यन्यज्ञानमन्यत्रापिप्रत्यक्षंस्यादितिव्याप्तिवारणस्यविशेषणत्वेवैयर्थ्यं चेत्यर्थः। इंद्रियसं
प्रयोगानंतरमितितिनचैवंसतिघटज्ञानमात्मनिप्रत्यक्षंस्यादित्यापादापितुशक्यते संप्रयोगानंतरमात्मनो
ऽनवभासनात् नापिघटेंद्रियसंप्रयोगानंतरंपटोऽवभासनवृत्तिघटप्रत्यक्षस्यपटप्रत्यक्षत्वापत्तिरितिभावः
नान्तिरं भासनमेवितिघटभानमित्यर्थः तथाच घटभानजनकेंद्रियसंयोगानंतर्यमित्यर्थः। घटभानजनकेंद्रियसंयोगेभानेप्रस
क्तमित्युक्तंभवतिनचनत्पदादिप्रत्यक्षाव्याप्तिराशयः अव्याप्तिमुपपादयत्येकभासनेतिभासयानपदस्थाने यस्येतिविशेषणं
प्रक्षिप्यलक्षणं शंकतेअथेतितेनतटोविवक्षितोविवक्षितार्थत्वविकल्पदोषोनास्तीतिभावः। तज्ज्ञानजातीयेति आत्मनोपि
ज्ञानत्वालिंगितव्यक्तिविषयत्वाद्घटज्ञानमात्मनिप्रमाणंस्यादित्यर्थः प्रतिज्ञानंव्यक्तिभेदेपियत्र घटत्ववाच्यत्वयोर्यत्र तत्व
योरनुवृत्तेर्नाव्यापकतेत्याशंक्याह नहीति। घटत्वतत्वयोरपियत्र घटत्ववाच्यत्वमोघृवं अन्यथातज्ज्ञानयोरप्रत्यक्षतापाता

घटज्ञाने घटे प्रमाणं स्यात्तत्रापि चेदव्यवच्छेदकं मेव नेत्यत आह पाठांतरमर्थं मेव स्यादिति भावः । विद्या स्वरूप व्यतिरिक्त इत्यर्थः १०

घटवृत्तयोः सर्वनामत्वया ज्ञानापातान्धौतियत्वादेः स्ववृत्त्या वात्माश्रयोऽयघट्टाद्यंतरवृत्त्यावनवस्थेति । तदंतरेणापि घटवृ
दिवाच्यत्वे ज्ञानादिव्यक्तीनामपि तथात्वोपपत्तौ यत्वहेयर्थ्यमित्यर्थः घटोऽयमिति ज्ञानमात्मानमाश्रयतया प्रकाश
यति आत्मानं प्रकाशाभिन्नतया घटं च कर्मतयेति प्रभाकरैरंगीकाराद् घटज्ञानमात्मनि प्रत्यक्षं स्यादिति नाति
प्रापादनमित्याशंक्याह अनश्वेति इंद्रियार्थसन्निकर्षजत्वविशेषणानूपटज्ञाने घटादौ प्रमाणं स्यादित्यनुयोज्यमित्यर्थः । अथे
ति नानुयन्ज्ञानं यस्मात्मव्यतिरिक्तस्येंद्रियेणसंयोगादुत्पद्यते तज्ज्ञानं तत्र प्रत्यक्षमिति विवक्षिते घटज्ञानस्यात्मविषयत्वानु
योगो यथा नैयायिकादीनां तथा त्रिपुटीप्रत्यक्षवादिनः प्रभाकरस्यापि । तथा च घटज्ञानमात्मनि प्रमाणं स्यादिति दोषो ने
ति व्याख्यानमयुक्तमात्मव्यतिरिक्त इति सप्तमीश्रुतेः किं त्वात्मव्यतिरिक्ते प्रमाणमित्येव योज्यं तच्छब्देन आत्मशब्देन स्वरूप
मुच्यते । घटादिस्वरूपमपि स्वरूपमुच्यते तद्व्यतिरिक्तत्वमात्मनोऽपीति नात्मप्रत्यक्षाव्याप्तिरित्याशंकनेन तच्छब्देनानु
गतरूपाभिधान इति स्वरूपमात्राभिधान इत्यर्थः । यथात्मा घटस्वरूपाद्व्यतिरिक्त इति नात्मप्रत्यक्षाव्याप्तिः पटोऽपि
न घटस्वरूपाद्व्यतिरिक्त इति पठित्वा यदिंद्रियसन्निकर्षादुत्पन्नं तदन्यव्यतिरिक्ते प्रत्यक्षं तदिति व्याख्यायमान्यशब्दः किं घटादि

विशेषं दक्ति किं वा भेदाग्रयं वस्तुमात्रमाद्ये आहाप्यविषयकस्येति नदस्य घटादिविषयकज्ञानस्य प्रत्यक्षमानस्यादन्यव्यतिरिक्तत्वा
त्रे त्मकविशेषणस्याभावात् द्वितीयपक्षे तु न शद्वेति अन्यशाद्वे नेत्यर्थः अन्यस्मिन्नपि अन्यव्यतिरिक्तत्वं किंचिदपेक्षायास्त्येवेति यद्य
पि घटादिज्ञानेनाव्याप्तिस्तथापि घटज्ञानस्य पटे प्रत्यक्षतयाप्रामाण्यं प्रसज्येतेति तदुपपादयति अवच्छेदकत्वाभावादिति अन्यव्य
तिरिक्ते विशेषणस्येति शेषः इति लिखितवान् । एतेनेति एतेनोक्तदोषो यं भावमानेत्यादिलक्षणे अनेन प्रकारेणोक्तदोषः प्राग्दूषिते
लक्षणे अयमतस्यार्थस्फुरयति तादृशस्यापीति विकल्पेति साधारण्येन्यप्रत्यक्षस्याप्यन्यत्र प्रमाण्यं असाधारण्ये प्रत्यक्षांतराव्याप्ति
रित्यर्थः । यत्नूपदत्तत्पदपूरणेदूषणांतरमाह अव्यभिचारीति । तस्मिन्नेकांशे पूर्णा वर्त्तिनो रजतत्ववैशिष्ट्याएवाप्रामाण्यं यद्यपि रज
तत्ववैशिष्ट्यमारोप्यं तत्र संस्कारोपस्थितवदिशिष्टं तु नारोप्यमसत्त्वाभ्युपगमापत्तेः तथापि भ्रमस्य व्यधिकरणप्रकारकत्वोपपत्तये तदव
श्यं वाच्यं न हि शुक्तिविशेष्यकज्ञानस्य रजतत्वप्रकारकत्वेनैव भ्रमः शुक्तिरजत इति संस्पृहालक्षणस्यापि तथापत्तेनापि शुक्तिविशे
षतांशे रजतत्वप्रकारकत्वात्साहि यदि शुक्तिनिष्ठवैशिष्ट्यप्रतियोगिप्रकारीभूतरजतत्वप्रकारत्वप्रकारकत्वं चेत्तदा पुनरपि असत्ख्यातिः
प्रकारीभूतरजतत्वे पूर्णावर्त्तिनिविशिष्टं वा तथापि मिथ्यापि मिथ्यादृस्ताशयात् अस्मिन्लक्षणे ईश्वरप्रत्यक्षाव्याप्तिस्तु न दोषः साक्षात्

पलभितरयवच्छेदधीव्यवहारयोरन्यतरः

कारिप्रभाकरणस्य लक्षणं तथा तद्धेतुकं साक्षात्कारस्यैव लक्षणत्वात्। तृतीयप्रत्यक्षलक्षणमाशंकते अथेति विभुमेयीति न च तत्र
नास्त्येव साक्षात्त्वमनुव्यवसीयमानत्वात् न्यायमते विशेषणीयमित्युक्त्वा प्रभाकरमते विशेषस्याभावादतिव्याप्तिर्नास्ती
त्याह भेदाग्रहेत्यादि न च गुरुमते गुणगतजात्यभावाल्लक्षणमेव नेदमिति वाच्यं जातेरभावेपि साक्षात्कारे मीत्याकारा
नुगतमते त्वादृशधर्मस्याप्युपेयत्वात् द्वितीयं कल्पमादौ दूषयति तत्र वक्तृवक्तव्याभावान्न तावच्चरमद्र इति लिंगादिभावेने
नेति आदिपदेनार्थापत्तेः पक्षधर्मताया अपरिग्रहः साक्षात्कारित्वाविनाभावादेरिति। नहि प्रत्यक्षवचनं तत्र साक्षात्का
रित्वं तत्र न धर्मधर्मियोर्विरोधात् कालिकी तु व्याप्तिः संभवन्त्यपि न साक्षात्कारित्वं त्वेन तदुपस्थापयति नित्यमात्रसाधारण्येन
न तात्तादृगुपस्थितिः फलसाधनतायां च एतेनादिपदग्राह्यार्थापत्तिरपि परास्ता विनापि साक्षात्कारित्वेन तद्वचनोपपत्तेः
प्रयोगस्य तज्ज्ञानमात्रसाध्यत्वेन तदन्तरेणाप्युपपत्तेः सर्वत्रेति वारमात्रे अन्यतोऽनुव्यवसायतः तेनानुमानभावेनेति तच्चज्ञाप्य
इति संबंधः। अनुमानपरार्थानुमानवाक्यस्य भावेन स्मारकतयेति यावत् अत्र न्यायाचार्यसम्मतिमाह अत एवेति यदाहुराचार्याः।
केवलव्यतिरेकि लक्षणं तु निर्व्यूढमिति तत्र केवलव्यतिरेकिपदमनुमानविशेषपरमित्यर्थः ननु लक्षणं भवतु अनुमानविशे

यः किमापानिवाक्यस्य इत्याशंक्याह तत्र एवेति यत्तु एवं लक्षणवाक्यं परार्थानुमानवाक्यस्य स्मारकमत एव तदुपपद्यते । अन्य
थालक्षणस्य न स्वार्थानुमानता स्वतः प्रकारांतरेणाव गतस्यैव लक्षणकथनमाद्यादि वानुमा[illegible]पकवाक्यस्मारकता नास्ति तदा कथं
तस्यानुमानत्वमित्याशयः श्रवणादीति श्रवणशब्दोत्र विषयपरः प्रमितिपदस्य श्रावणीति स्यानुतत् अत्र शब्दस्पर्शरूपरसगंधा
सुखप्रमितय इत्यर्थः तत्र अतत्र प्रमितिर्मात्रपक्षते भागासिद्धिः स्पादतो लाघवाद्वेकं पक्षतावच्छेदकमाह स्याश्रानुकारि
प्रमितयो रेति । स्मारकत्वमिति एकसंबंधिदर्शनादपरसंबंधिस्मृतेरैचित्या द्यास्यादिविषयकशब्दश्रवणेवादिना
पूर्वानुभूतव्यतिरेकव्याप्त्यादिपदार्थः स्मर्यत इति भावः विषयभेद इति प्रत्यक्षत्वलक्षणो व्यवहारस्य विषयः प्रत्यक्षशब्दा
भिधेयत्वं वा त्वमात्रं वा विशेष इत्यर्थः । आद्य इति तथा च साध्यप्रतिज्ञाव्याप्यग्रहः अंत्ये सिद्धसाधनानुदूषणं निष्प्रयोजनमित्याह यथा
पात्यादिना प्रकृतानुपयोग इति तथा चार्थांतरनिग्रहस्थानमित्यर्थः विकल्पितपदेति किं विषयभेदो विशेष उत शब्दभेद इति विक
ल्पितपक्षानुप्रवेश इत्यर्थः । ततश्चत[illegible]दुष्टत्वादेव नास्ति निस्तार इति भावः एतेन विकल्पितपक्षेप्रवेशेपि निस्ताराभावात् कथ
मेवमुच्यत इत्यपास्तं किंकृतोसौ विशेष इति मम प्रश्ना निस्तार इत्यर्थः अथवा विकल्पितपक्षानुप्रवेशमंतरेणेव यो निस्तारः स नास्तीत्यर्थः

विकल्पितपक्षविशेषणतद्दोषस्यावश्यकत्वादिति भावः। ऽक्रदोषं प्रागुक्तलक्षणद्वयेपि बोध्यमित्याह एतेनेति न केवलं प्राक्त
नयोरेव परं तु पृथिवीगंधवत्वादित्यादौ गंधवत्वादिरूपेणैलक्षणेपीत्याशयेनाह सर्वस्येति अत्र विद्यासागरः लक्षणेन ल
क्ष्यस्वीकारो निरणकार्यः निराकरणप्रकारं गृह्णाति तथाहीति लक्षणेनोजायमानो नु प्रमामात्रान्न तु लक्ष्यस्वीकारः
उत पृथिव्यादिविशिष्टलक्ष्यप्रमातः प्रथमेनेति नेनेपृथिव्यादयोऽर्थाः प्रमामात्रानुस्वीकारोचिता न भवंति कुतोऽप्राप
न्नेरतिप्रसंगादित्यर्थः। ज्ञानमात्रस्य सर्वार्थसाधारणतया बाधकज्ञानेन सर्वार्थस्वीकारप्रसंगात् अर्थापत्तेरितिपाठे
अर्थस्यातिप्रसंगलक्षणस्यापत्तेरित्यर्थः द्वितीयं दूषयति तद्विषय इति पृथिवीत्वविशिष्टज्ञानस्य पृथिव्याः साधकत्वे
पृथिवीसिद्धिरित्यात्माश्रयं दोषं कश्चिदपि न चिकित्सितुं शक्नोतीत्यर्थः तद्धीत्वं नाम ज्ञानस्यैव कश्चिद्धर्मोऽतो द्वैविध्य
ज्ञानेऽतभ्भावनिबंधनो नात्माश्रय इत्याशंकते अथेति तथा सति तन्नद्धीकरणतया विशेषसिद्धिरिति स्वसिद्धांतत्यागः
ज्ञानस्य ज्ञेयाभेदमंतरेण तद्धीत्वं धर्मयोगात् सहोपलंभनियमाद् भेदो नीलतद्धियोरिति परैरभ्युपगतोपगमः स्याभ्युप
गतहानिरिति दोषद्वयाशेत इति साकारवादाय विष्टरआसने स्पृष्टमेव दातुं स्यात् साकारवादः पूजितः स्यात् ज्ञानस्य प्र

प्रकाशमात्रस्वाभाव्यात्तद्वीत्वं विशेषोन स्वाभाविकः किंत्वर्थसंबंधोपाधिकः स्फटिकलौहित्यमिवेति ज्ञानगतविशेषजनक
तयाऽर्थसिद्धिरित्याशंक्याहार्थादिति अनुमितित्वागमत्वादयो धर्मा यथा अर्थाद्विषयादुत्थानशीला न भवंति किंतु लिंगा
दिकारणविशेषात्तथा तद्धीत्वमपि ज्ञानधर्मत्वाविशेषादित्यर्थासिद्धापत्तिरित्याहार्थानर्थसंकटमापत्तेनुस्वाभा
वमापत्तेनु न सिद्धेदिति यावत् तद्धीत्वस्य ज्ञानधर्मत्वेवाह्यासिद्धिरुक्ता अधुना तत्तु सिद्धावनवस्थावास्यादिति स
र्वेलक्ष्यासिद्धिपरतया व्याचष्टे तत्रयुक्तं तथा सति प्रमामात्रादित्यत्र लक्षणाधीनप्रमामात्रादित्यध्याहारा
पत्तेः अथ तथाहीत्यादिना तन्निरसनप्रकारस्यैव विवरणानुपपत्त्यैव व्याख्येयमिति प्रमापदं तादृशविशेषला
क्षणिकमिति चेन्न प्रत्यक्षलक्षणस्य घातिव्याप्तिरुक्ता घटे प्रत्यक्षलक्षणं पटप्रत्यक्षेपीति पटप्रत्यक्षं यथा पटे प्र
मा तथा घटप्रत्यक्षमपि पटेप्रमा स्यादिति तत्रैवाधिकं किंचिदुक्तमपमारंभः तत्र घटप्रत्यक्षे पटस्यैव साधकं
न पटस्येत्यनुभवबलात्तु कल्प्यते न च तत्र प्रमाणस्य घटज्ञानस्य पटासाधकत्वे लोकविरोधः लोकेपि पटज्ञान
स्यैव पटसाधकतोपगमात् पटप्रत्यक्षापटज्ञानतापि तस्यास्तीति चेन्न न नु प्रमायास्तत्तु साधकत्वात्तु घटज्ञानं

पटे प्रत्यक्षत्वलक्षणाक्रांतयाप्रत्यक्षमपि न प्रमाविषयवाधात्प्रमात्वलक्षणाक्रांतत्वाच्चेति नचेदं प्रत्युच्यं किं घटे प्रत्यक्षं
न प्रमेत्युच्यते अथ पटे न प्रमेति आद्ये घटमपि न साधयेत् अंत्ये पटप्रमात्वाभावेपि नत्साधकत्वस्य कोऽंशो नास्ति
भवति हि घटज्ञाने पटप्रत्यक्षं प्रमाणं च घटे अथ पटप्रत्यक्षं पटप्रमात्मकमेव न तत्साधकमित्युच्यते तत्रेदं खंडनं
नार्थापत्त्या घटप्रत्यक्षात्प्रमात्मकादपि पटात्मकोपि धर्मी पटत्वेन न व्यवतिष्ठते अतोयमभिप्रायो भवतः पटप्रमा
पटव्यवहारहेतुः पटप्रमाविषय एव पटः पटत्वं पटप्रमाविषयत्वव्याप्यं न तत्र दोषमाह न हि यः पटत्वविशिष्टप्रमायां
सत्यामेव पटत्वं निष्ठति न तत्र च पटत्वे निष्ठत्येव पटत्वं तिष्ठतीत्यसत्यापत्तियोगे एवं प्रदिष्टेन महौषधेनाचिकित्सिते
आत्माश्रयरोगचिकित्सा न शक्या कर्तुं नहि पटत्वं कुत्र तिष्ठतीति जिज्ञासा सा पटत्वं यत्र तिष्ठतीति पर्य्यवसिता तत्पटप्रमातन्नि
र्णयान्निवर्त्तते तस्यैव जिज्ञास्यत्वात् नहि रोगनिवर्त्तकं किमिति जिज्ञासा रोगनिवर्त्तकत्वं यत्रेति ज्ञानान्निवर्त्तते यत्तु पटप्रमातो न पट ८
सिद्धिः किंतु पटप्रमैव पटसिद्धिरिति तथापि विशेषाभावत्स्ता घटसिद्धिरेव न स्यादित्यत्र तात्पर्य्यमिश्रोक्तं नेतेऽर्थापत्तादयः घटज्ञानात्
पटत्वेन व्यवहर्तुमयं पट एव न पटादन्य इति व्यवहर्तुं शक्या किंतु पटप्रमात एवेति तात्पर्य्यानवबोधनिबंधनेयमाशंका ॥

२१०
210

यद्वापावर्तो लक्षणानां दूषणमेव प्रसक्तलक्षणदूषणावसरे कथयत्येवमेति तत्र सर्वाणि लक्षणानि स्वरूपासिद्धानी
ण निवक्तुं सर्वपदार्थसाधकं निराकरोतिनान्यापत्तेरिति अन्यएवेति पटत्वादन्य एव विशेषः पटत्वं तदेव विषयगतं स
ह्यावर्तकं पटस्याबाधितं पटव्यवहारहेतुश्च तथा च घटज्ञानान्न पटव्यवहारः न वा आत्माश्रयइति शंका पटत्व
निरपेक्षमेव पटधीत्वं ज्ञानगतो धर्मः पटव्यवस्थाहेतुस्तदा पटोपि पटधीर्वेति ज्ञानमेव पटइति स्यात्तदतिरिक्ततासिन दे
पटत्वस्य प्रमाणाभावादित्यपसिद्धांतइत्याह दन्तइति तथा च बाह्यापलापप्रसंगः अथ ज्ञानवत्त्विकादाचित्कं तद्धीत्वान्यथा
नुपपत्त्या बाह्यापि स्वीकार्य इत्युच्यते तन्त्रानुमितित्वादिबुद्धिनाप्यर्थमुपपत्तेः अनर्थज्ञानं अथो हि बाह्यस्य सद्भिर्न ज्ञानं न दा
त्समेव स्यान्नु ज्ञानाकारकादाचित्कत्वमपि स्वभावादेवोपपद्यतामसत्ते नैव वेत्याशयः किं तद्वियं विनेति काकुर्नेत्यर्थः
प्राप्यत्वेन तद्वियं तद्धीत्वविषयं विना प्रमाणं विना अर्थानंगीकारादितिहृदयं सोपानधावने वटुकदादिशिष्टमार्गधावने
नांतः अवसानाभावः तस्मादनवस्थास्यान्नु साधाप्रामाणिकीति भावः यद्युक्तदोषेण बाह्योर्थः सद्धीश्च न सिद्धे तदा
तयोः प्रसिद्ध्योः अयं घटो नेन जलमाहरणीयमिदं च तज्ज्ञानमिति तर्कलोकजीविकानामविसंवादिनागतयोः
त

कागनिरितिप्रवृत्तिकिमतत्वंनासद्विषयत्वं उतसद्विषयत्वं नचशशशृंगगगनतुल्यज्ञानयोः यतः समस्तोलोकः पंडितादिश्चंडालपर्यंतसम

२स स्तानिचशास्त्राणि तर्कतंत्रादीनितेषामेकमस्मभिप्रायंवादिमाश्रित्यतौरतिशयेनवर्त्तमानतयेति । सर्वेषांलोकानांशास्त्राणां

चसंप्रतिपत्तिमात्रंविचारतस्तुउपपादनमशक्यमित्याहउपपादयितुमितिसम्मतैः प्रकारैर्नसद्विषयत्वंनाप्यसद्विषयम

पित्वनिर्वचनीयाज्ञानविलासविषयत्वमेवगगनिरितियुक्त्यनुसारिण्यावाचामित्याहउपपादयितुमशक्ययोक्त

योरसत्वमेवतूपनिषदामाहाद्वैतसत्यतावादिनीसाशयः । उतशब्दभेदइतिविकल्पार्थस्पष्टीकर्त्तुमनुवदतिप्रसादादिशब्दा

भिधेयादृतितथाचप्रत्यक्षशब्दप्रकारकोव्यवहारस्त्राकाशंप्रत्यक्षंशब्दसमवायित्याकारकोभावर्त्तितः यचप्याधुनिकेप्रसवी

सेसंसृतकेपुत्रस्त्रवेष्वेनदर्शितथाप्यादिपदग्राह्यमपरोक्षशब्दाभिधेयत्वंनास्त्येकस्यनामद्वयासंभवात् एकादशेहनिपितानाम

मकुर्यादित्येकत्वस्यविधेयविशेषत्वेनाविवक्षितत्वात् नाम्नापुत्रंसंस्कुर्यादितिहितदर्थः नाम्नोनिष्प्रयोजकत्वेनकर्म

तानुपपत्तेः यदिचसंस्कृतनामपुत्रस्यकर्माधिकारसंपादकमितितन्निष्प्रयोजनतातथापितत्प्राप्तोद्देश्यविधानाद

ध्यर्थ्यपुत्रापत्तेः इतिवदुद्देश्यविशेषणमप्येकत्वंविवक्षितं नत्वथापियेनापरोक्षप्रसंसेत्येवनामकृतंतद्दायदोषः ।

त

प्रत्यक्षशब्दमात्रपर्यवसिताभिधायकत्वस्य साध्यार्थत्वात् आदिपदं ते वं सति साध्यांतरसूचनाय । न च शब्दप्रयोग
मात्रादिति विशेषणांतरस्यास्य प्रयोगो हेतुरित्यर्थः । अतिप्रसंगप्रदर्शनेनाप्रयोजकत्वमाह एवं न हीति अविशेषा
दिति शशविषाणादिशब्दानां प्रत्यक्षशब्दे न सहेत्यर्थः । अर्थार्थवत्तया प्रसिद्धत्वे सति द्विषयत्वे च सत्यन्यत्राप्रयोगादि
ति विषयितो हेतुरिति शंकते अर्थेति तथा च यथा चाक्षुषादिशब्दा एवंभूता अपि न यावत् साक्षात्कारिप्रमितिवाच
कास्तथा प्रत्यक्षादिशब्दा अपि संत्विति भावः । ननु साक्षात्कारित्वेव प्रत्यक्षशब्दप्रयोगात् साक्षात्कारिणि प्रत्यक्ष
शब्दवाच्यत्वं साध्यत इति साक्षात्कारित्वे सत्यपीत्यादिशंकाग्रंथार्थ इति विद्यासागरस्तदसत् चाक्षुषादिशब्देष्वपि भावात्
साक्षात्कारित्वं न चाक्षुषादिशब्दप्रवृत्तिनिमित्तं तस्मिन् सत्यपि श्रावणज्ञाने चाक्षुषत्वशब्दाप्रयोगादिति तु युज्यते परं तु प्रत्यक्ष
शब्दाभिधेयत्वसाधने प्रयोजकस्तर्कस्तथापि नोक्त इत्यर्थांतरतेति चेत् न प्रत्यक्षशब्दाभिधेयत्वे विशिष्टे हि तावुक्ते चाक्षुषत्वशब्दा
दीनां साक्षात्कारित्वप्रवृत्तिनिमित्तत्वाभावे च साधिते ऽविशेषप्रसंगपराहतिरूपदोषाभावे सति तत्स्यैव साधकत्वात् एवं च साक्षा
त्कारिप्रमितयः प्रत्यक्षशब्दाभिधेयाः प्रत्यक्षांतरधर्मवाचकावाच्यत्वे सति सदर्थवाचकवाच्यत्वे सत्यभिधेयत्वादित्यर्थः । साक्षात्का
रित्वादित्येव यातु शशशृंगानर्थकशब्दवाच्यतापादनेनाप्रयोजकत्वाशंका सा नास्ति निरर्थकासदर्थकाभिधेयत्वस्य पक्षे वाधा चाक्षुषा

दिशब्दाभिधेयतापि न संभवति तस्य न्यूनवृत्तित्वादिति प्रतिसंधानवतो व्यतिरेकव्याप्तिप्रतिसंधानादनुमानमिति पर्य्यवसितेदू
षणमाह एवं तर्हीति यत्र साक्षात्कारित्वमस्ति तत्र सर्वत्रेति नेन चाक्षुषादिशब्दतुल्यता व्याप्तिः। सचेति यथा वृद्धव्यवहा
रेण गवा दिशब्दस्यान्वयव्यतिरेकाभ्यां शक्तिं जानाति तथा प्रत्यक्षशब्दस्याप्यवधृतवानेव स्मामग्रीसत्तादिति भावः विधिव्यव
हारस्साध्यकपक्षोक्तं दोषं निषेधव्यवहारसाध्यपक्षेप्यतिदि[illegible]शत्येतनेति अनुमित्यादिव्यवच्छिन्नतयाव्यवहर्त्तव्या इति व्यवहा
रस्य किं विषयतो विशेषणत्वं तु शब्दभेद इत्यादिना च यव्यतिरेकासिद्धत्वपर्य्यन्तेन नदोषेनेत्सर्पः। अस्मार्य्यत इति शिष्यश्चाचार्य्येन
निषेधः। यद्यप्ययमयसिद्धांतस्तस्य केवलव्यतिरेकिरूपता यानैयाधिकैः स्वीकृतत्वात्तथापि यदि काश्चिदेकदेशी भूयोपि ब्रूयात्तदापि
प दूषणमिति। अवगतसमयस्येति समयः शब्दार्थयोः संबंधः अनवगतसमयतानुतस्य निराकृतैवेतः असंबंधिदर्शनसमुद्बुद्धसंस्कारादेव संब
धांतरस्मृत्युपपत्तेर्लक्षणवाक्यं यथार्थप्रत्यक्षपदभेदं ब्रूहीति भावः यदि च त्वयक्तलक्षणः प्राह शब्दादेरस्मरणलक्षणेनस्मार्य्यत इति यद्य
पि लक्षणेन स्मारणीयमिति न वेदोस्ति मंत्रैर्नैवमंत्रार्थस्मरणेऽध्ययनविधिरिव तथापि कथकसंप्रदायाचारप्रमाणकोयमर्थ इति ब्रूवी
षि तदपि न युक्तं निर्मूलकत्वात् संप्रदायस्यानवस्थापातदोषाद्याप्रामाणिकएवायमाचार इत्याह नदेत्याद्युपर्य्यवसानादित्यंतेन अ्र

पर्य्यवसान[illegible]मनवस्थानं चात एव लक्षणपदलक्ष्ययोर्वाच्यवाचकभाव एव लक्षणवाक्येन स्मार्य्यत इति वाच्यं तर्हि ल
क्षणवाक्यार्थगतपदार्थस्मरणार्थमपि लक्षणमभिधाधिकविरमभ्युत्साशयात् आप्तोपदेशतया तल्लक्षणवाक्यस्य बोधकत्व
प्रकारं कथयति यत्त्वपेत्यादि यद्यपि लक्षणवाक्यस्यैवंप्रकारबोधजनकता स्वरसतस्तथापि लक्षणयाऽस्तीति भावः शास्त्र
मंत्रायुर्वेदवत्तत्प्रामाण्यमाप्तप्रामाण्यादित्यादौ सर्वमेव शास्त्रं आप्तन्यायप्रतिपादकमिति भवतां सिद्धांतव्याकोपः प्रतिज्ञादि
पंचावयववाक्यव्युत्पादनमपि चासंबंधमेव स्यादित्यपि बोध्यमिति। अस्यापीश्वरवाच्यवाचकभावव्युत्पादनस्येत्यर्थः। नामानुशासनं
अभिधाने लिंगानुशासनं त्वपत्नीवादि। यावतोऽपरिज्ञाने पराजयो जायते कथायां तावदेवास्मिन् शास्त्रे प्रतिपाद्यते नान्यदनु
पयोगादित्याशंक्याह तत्स्थानेपीति अपशब्दादेरपि कथने निग्रहः। अथवास्त्विति एकस्य नानोपायनाया लोके बहुल
मुपलब्धेः शास्त्रं न साध्यमपि नामव्युत्पादनमस्मिन् शास्त्रे नानैव दोषाभेत्याशयः तथापीति तथा च बहुविधपके नानदीयान्याविषय
कस्य वैयर्थ्यमिति भावः वादिविप्रतिपत्त्यासंदिग्धो यः शब्दस्य स एवेह व्युत्पाद्यत इत्यपि न स्याद्व्युत्पादनादित्याह तथाप्यनुपपत्ति न
रितिवादिनांमिति [illegible] वाशब्दादीनि आदिपदेन निपातमात्रमुपसर्गानां द्योतकत्वाच्चकारादेनिसंदेहोस्ति न चाद्यपादे नाद्य निर्णयं कृ

तः वैयाकरणैः विदिभेदिछिदेः फुरजितिकुवचः प्रत्ययः कर्मकर्त्रर्थे विहितस्तदपरेण न क्षमते कर्मकर्त्रोर्द्वयोर्विरोधात्

आदिपदेन भिन्नवादिपरिग्रहः तथा भावपरिग्रहः सर्वकृत्समानार्थस्तदर्थस्तदर्थे विप्रतिपत्तिः स्वरूपसत्त्वं भाव इत्येके

अपरस्तु सत्तासामान्यं प्रमाणसंबंधं वस्तुयोगपत्तावेति अर्थक्रियाकारित्वमित्यपरे अधिकरणे सप्तमी वेनितादर्थे विप्रतिपत्ति

माहृ पतनेति आदिपदेन कारकविशेषः संयोगित्वं वा ननु धावनार्थानां तत्त्वज्ञानं निःश्रेयसहेतुत्वमयुक्तं लक्षणेनः परीक्षणेन अशा

स्त्रैः श्रुत्यादरणीयादित्यानायमुपालंभ इति चेन्न तादृशस्यात्मनः तत्त्वस्यैवाप्रसादनान्न हि वेदांतप्रतिपाद्यस्यात्मनः स्वरूपं गुणवत्त्वं भवति

न च मोक्षो दुःखाभावः स न पुरुषार्थस्तथा सति भोजनादावपि नांतरीयकदुःखेन प्रवर्तेत किं पुनस्तपस्यादौ तस्मात्त्रिः सुखं दुःखं

द्वेष्यं तदभावः पुरुषार्थत्वं तत्र मोक्षोपि न्यायशास्त्रे निरूपितो न पुरुषार्थः केवलदुःखाभावात्मकत्वात् न वा केवलं दुःखध्वंस

मुद्दिश्य दुःखसाधनतत्त्वज्ञानादौ तदुपाये प्रवृत्तिः संभवति तथा सति दाहजदुःखध्वंसमुद्दिश्य दाहे शिरश्छेदनजदुःखध्वंसमुद्दि

श्य शिरश्छेदनेपि प्रवर्तेत तस्मादानंदात्मक आत्मैव पुरुषार्थः स च वेदांतिभिरेव ब्रह्ममीमांसायां निरूपितः न च तस्य नित्यस्य

कथं पुरुषार्थत्वमिति वाच्यमानंदत्वेनैव पुरुषार्थत्वात् न चेच्छाविषयत्वेनैव पुरुषार्थता न च नित्ये इच्छासंभवति सिद्धत्वादिति

वाच्यं तद्रूपतः सिद्धस्यापि तत्वेनाज्ञाने साक्षात्कृतज्ञानेच्छोपपत्तेः नहि तत्वज्ञानात् प्राङ्मोक्षे साध्यतज्ज्ञानं नास्ति विशे कृ
षदर्शनस्यैव भ्रमविरोधित्वात् नेच न तत्वज्ञानोत्तरं कश्चिदपि मोक्षाय यतते · यतमोयतं त्रिचेन्न तदा तत्वज्ञानिनः शरी
राद्यध्यासवत्वादिति स्थितिरोभवविद्यास्तेनोवाक्यपास्त्विति दिक् । कुत्राशयवानाह तदास्मामेकत्र विस्तराभिनिवेशदृनि
श्कत्र प्रत्यक्षलक्षणमात्र इत्यर्थः चतुर्थलक्षणं प्रत्यक्षलक्षणमाशंकते सविशेषस्य । अनुमानादिव्याप्तिरिति
सत्यप्यनुमानादेः सामान्यभानेन तदाश्रये रूपादिविशेषसत्वादिति भावः । शेष विशेषस्य विशेषहीनस्य भानं
न विशेषविशिष्टभानमनस्तत्र प्रत्यक्षलक्षणं नास्तीति तदप्रत्यक्षं तन्न अतद्विशिष्टे पूर्वविशेषे यज्ज्ञानं तदपि प्रत्य
क्षं न स्यादप्रत्यक्षविशेषणस्य विशिष्टस्य प्रत्यक्षत्वापात इत्याह सविशेषस्येति तथाचासंभवः प्रत्यक्षलक्षणस्येति
व भावः । यदीति अन्तस्यामति स्पष्टामुपेक्षाख्यामुद्धारणा समर्थप्रति किं दूषणं तराभिधानेनेत्याशयेनाह । ताहशस्यैव अ
न विशेषसहितस्य व्यापकस्यैव व्याप्तिग्रहात् व्याप्तिभाने स्फुरणात् अनुमायामपि अन्तविशेषसहितस्यैव भानमित्यर्थः ।
अथेति विशेषाणामनंतगतत्वात्त्रानुमितित्वावत् स्वव्यापकतावच्छेदकस्यैकस्याभावात् व्यापकतावच्छेदकानवच्छिन्नस्यैव तत्र भा

नियमाविषयत्वं किंतु व्यापक[illegible]गतसामान्यस्यैवेत्यर्थः। नर्हीति तर्हि तावतां विशेषाणामनुगतप्रतीतिव्यवहारो न स्या
नामेकरूपाभावादित्यर्थः। तत्पयाख्यानं सत्यपि तेषु विशेषत्वरूपेऽनुगते धर्मे तेन रूपेण व्यापकताया अग्रहान्न तथा
भानं तादृशरूपेण व्यापकताया अग्रहेऽपि नतु प्रकारकानुमाने वह्निमानित्यनुमितेः सत्वद्रव्यत्वतेजसः। शुक्लभास्वर
त्वादिप्रकारकत्वापि स्यात्। अत एव विशेषवत्तो दृष्टांतदृष्टस्याप्यननुगमाद् प्रकाशश्चेन्न हि अग्निमान यमिति व्याप
कविशेषानुगतपक्षप्रतीतिवदस्यार्थिनश्च तत्र व्यवहारो न स्यादिति विद्यासागरव्याख्यानमप्यपास्तमग्न्याकारा
नुगतप्रतीतेः स्वीकारादेव न हि यावंतो विशेषा व्यापके गृहीतास्तत्प्रकारिकेयं प्रतीतिरग्निमानिति। अत्र ब्रूमः
किं तावत् स्वविशेषेषु सामान्यमेकं नास्ति अथवा विद्यमानमपि न प्रतीतिमाद्ये न तदनुगतप्रतीत्यनुगतप्रतीतेरपलापे ११ तेरन्
कथं तेषामसंतानमनुगतानामनुगतप्रसक्तलक्षणघटकत्वं द्वितीयेऽपि कथमप्रतीयमानस्य लक्षणानुप्रवेशः अप्रवेशे वा अस
नाननुगमः। प्रसक्तलक्षणस्य दुर्ज्ञेयता चास्य देहैः स्यात् अथ प्रतीतमेव व्यापकतावच्छेदकतया न गृहीतं यत्र धूमस्तत्राग्निरि
त्यनुगतस्यैव धूमव्यापकत्वेन भानात् अननुगतरूपेण व्यभिचारान्वेति चेन्न तद्धूमतद्वह्न्योरव्यभिचाराग्रासः अग्निवस्यानु

गमेपि वह्नेरननुगमान्नाप्योपि अथ व्यक्तिर्जातिरननुगमिका नानाव्यक्तीनामेकाकारप्रतीतिविषयत्वमेवानुगमकत्वं अस्ते
वं तथापि व्यापिकाः कथं व्यक्तयो व्यभिचारात् अग्नित्वेन रूपेण न व्यभिचारिण्यः वाक्यार्थः धूमसमानाधिकरणात्यंताभा
वप्रतियोगितानवच्छेदकं मग्नित्वमिति चेन्न तः किमात्मातमग्रे यथाहि तन्न व्यक्तिमन्निष्ठात्यंताभावप्रतियोगितानव
च्छेदकाग्नित्वकत्वेन तासां व्यक्तीनां व्यापकत्वं तथा तन्न द्विशेषाणामपि व्यापकत्वं दुर्वारमित्याशयेनाहान्यथा व्य
क्तेरिति यथाहि अग्नित्वं व्यक्तीनामत्यंतानामननुगतानामनुगमकं तथा विशेषाणामपि यद्विचानुमाने सामान्यमेव वि
षयो भाषमानत्वान्न तु विशेषास्तथा अप्रतीतेरित्युच्यते तेन दाव्यक्तेरपि सामान्याश्रयस्यानुमानेन स्यान्न तत्र वि
शेषे अनुगमाभावः सामान्ये सिद्धसाध्यतेति चार्वाकदोषादनुमानोच्छेदो दुर्वारः अथ परंपरया पक्षवृत्तिसामा
न्यमनुमितिरसिद्धं विषयइति नानुमानोच्छेदो व्यक्तिविशेषस्तु सामान्येनाक्षेपादेव सिद्ध्यति सामान्यस्यतां विनानु
पपन्नेरित्याशंक्याह यथा हीति सामान्येन व्यक्त्याक्षेपव द्व्यक्तिभिरपि विशेषा आक्षिप्य वक्तेत्यर्थः तथा च लिंगा
देव पक्षधर्मता सहायाद्व्यक्तिरिव तद्गतविशेषोपि सिध्येदिति भावः अनएव पक्षधर्मतया नानंतविशेषसिद्धिरिति

शंकिष्यते समानस्येत्यस्यानुपपत्तिरिति शेषः व्यक्तेरित्यनुमितौ भासमानायावद्वह्निव्यक्तेरित्यर्थः तदाप्रतीतापर्यवसानादिति अनु
मितायावद्वह्निव्यक्तिः सातावदनेन विशेषमंतरेण न पर्यवस्यतीति तदनंतरभाविन्यर्थबलायाते ज्ञानांतरे प्रत्यक्षतास्यादित्यर्थः
तत्रैवासंभवं दर्शयितुं दोषांतरमाह अप्रतिपद्यमानेति एतेनानुपलंभबाध उक्तः एकाकिते [illegible]नं तनायावाध उचितः अन्यले
लाघवमुक्तं श्रेयसि तरा अतिशयेन श्रेयसी उक्तयुक्तित्रयेणेति भावः तावतापीति तथाच प्रमाणं वस्तुदृष्टानि कल्प्यानि सुवर्णस्य
पीतिम्नायस्य नायं विषय इति भावः साक्षात्वं विषयगतं चेत्कल्प्यं तदादोषमाह ज्ञानएवेति साक्षात्वविषयकानुमितावतिव्याप्तेरेवेत्यर्थः
अत एवेति तत्कल्पनावीजस्य साक्षात्वव्यवहारानुपपत्तेरनिर्वचनीयसाक्षात्त्वेनापि चरितार्थत्वादन्यस्य प्रमाणस्याभावादेवेत्यर्थ
इति विद्यासागरः वस्तुतस्तु साक्षात्वधर्मकल्पनायां लाघवमुक्तं न त्वयं दिज्ञानगतेनैवोपपद्यते तदा कल्पनात् विषये कल्पनात् एवं ज्ञा
नगतजातेरेव व्यवहारोपपत्तेर्विषये तस्यानुपलंभबाधितत्वाच्चेत्यर्थः । अस्तु तर्हि ज्ञानगतमेव साक्षात्वमित्याशंक्याह विसरश्चेति
ननु अनेन विशेषकल्पने गौरवं तदास्याघदि कूप्रविशेषेणोपपद्येत तथा चानुक्तोपालंभोयमित्याशयेन कूप्रविशेषं विकल्प्य
यति विशेषश्चयदीति । निर्विकल्पकाव्याप्तिरिति वस्तुस्वरूपमात्रं हि नो भेदाविषत्वान् नचैवं सविकल्पेपि भेदाभानादसंभव

एवञ्चकुसुमचितं भूरितिवाच्यं अतद्व्यावृत्तेस्तत्रभानात् अव्यवच्छिन्नभानं नाविवक्षितं अपितुव्यवच्छिन्नभाने अपृथग्वास्तरू
पभेदएवव्यवच्छिन्नरीतिशंकनेयदिचेतिसोपिनिर्विकल्पकविषयोपितथाव्यवच्छिन्नत्वाश्रयेंसोपिनिर्विकल्पकात्मकप्रका
शोपितथाकोर्थं व्यावृत्तप्रकाशइतिवार्थः अनुमाद्यतिव्याप्तिमुपेक्ष्यैवाहतंदेतिदूरेदूरस्थेस्था एवादौयद्वदूर्ध्वतादिसा
मान्यज्ञानेतस्यप्रत्यक्षतातस्यादित्यर्थः संशयादीति आदिपदंभ्रमपरं यदिधर्मिमात्रंवस्तुमात्रंस्वाविशेषतदाध
न र्मिदर्शनमेवविशेषदर्शनमितिभ्रमसंशयौस्यातामित्यर्थः अथवानादृशादर्शनविशेषदर्शनंनसंशयादिविरोधिकिंनु
कोटिविरोधिज्ञानमेवतथानद्वैहतद्भासनइतिचेन्नर्हिकथंजगद्वैलक्षण्यप्रकाशोयं ननुसकलव्यवच्छिन्नप्रकाशत्वं
नलक्षणमतोनैषदोषः किंतुव्यवच्छिन्नप्रकाशत्वंतच्चप्रमातुर्व्यवच्छेदस्यविषयत्वेनाप्युपपन्नमितिशंकाग्रंथार्थः
नचानुपस्थितस्यप्रमातुर्भेदः कथंभासतांभानेवाजगतोपिक्षभासतामितिवाच्यंप्रतियोगिप्रकारकभेदज्ञानएव
तदुपस्थितिःकारणंविनापितथासामान्यप्रत्यासत्त्याभेदोस्तीतिशब्दादिनातज्ज्ञानात् जगद्वैलक्षण्यभानंतुसंशयाद्य
नुपपत्त्यैवपरास्तमितिदिक् ।पंचमंसाक्षात्कारलक्षणंशंकतेइंद्रियेतिअनुभवत्वमितिस्पष्टसाक्षात्त्वमितिशेषः साक्षात्

कारित्वधीकरणत्वस्येति शरीरसंयुक्तं साक्षात्प्रतीतिसाधनमतीन्द्रियमिति तन्निरुक्तेरिति दूषणमुद्धरन्ति परिष्कृत्य दूषयि
तुं तन्नेति नैयायिकमते अज्ञातत्वे सति प्रमाकरणत्वमात्रमज्ञाततत्त्वविशेषणेनैव लिंगशब्दादिवारणात् लिंगज्ञानादेव
करत्वात् भट्टमते ऽनुपलब्धेर्वारणाय भावत्वेनापि विशेषणीमिति एवं परिष्कृत्य दूषयति विना कार्यगतविशेषमिति
कार्यभूतायाः प्रमाया लक्षणविशेषणत्वात्तस्या ज्ञाने लक्षणसिद्धे ज्ञाने तदेव लक्षणमस्तु अलं तदधीनसिद्धिकेनाने
नेति भावः। बाधः लक्षणस्याभावप्रमासाधीयानिति लिंगादिज्ञानकरणकत्वपक्षे तथा[illegible] निर्वचनासंभवादन्योन्या
श्रयोपि साधुरेव तथापि अयं अतिशयेन साधुः सर्वमतसाधारणत्वादित्याशयः। षष्ठं लक्षणं दूषणातिदेशेन निरस्य
ति एतेनेति ज्ञानमात्रेणाहितविषयताज्ञातताप्रकटतास्पष्टतापरपर्याया यानुसा विलक्षणप्रमाणसिद्धा तस्याः कारण
ना त्वमेव साक्षात्त्वेन हि सापरोक्षज्ञानं संभवतीति भावः एकरूप्यमिति कारणीभूतज्ञानगतमेकधर्ममित्यर्थः साक्षात्कृ
तताधायकं किं ज्ञानमिति नाद्यापि निरूपितं ज्ञानगतं जनकतावच्छेदकमविकारणतागृहासंभवः यदि च कारणताव म्म
च्छेदकं शक्यते निरूपयितुं तदा तदेव प्रमाया लक्षणमस्तु न तु तन्निष्ठं जनकत्वं गुर्विति भावः। तत्सिद्धिः कारणगते

करूप्यसिद्धिरित्यर्थः। कारणांतरवैलक्षण्यमिति ज्ञानादिभिन्नं यत्कारणमिंद्रियमित्यर्थः। तथा चेंद्रियादेव सन्निकर्षविशिष्टा
नुमानात्कारणकारणत्वेनाभिमतानुमानादावनुक्तनताजातयनां ननु तत्रान्येन नस्यैकरूप्यस्याद्याप्यनिरूपतो मूणानन्वानुग
तादेस्तत्वननुगतत्वादेवेति भावः। षष्ठलक्षणमाशंक्य निशेधति नापि मेयजनितत्वं अतिप्रसंगादिति अनुमित्यादावि
तिशेषः सर्वज्ञानानामात्मनामेयेनजननादिति भावः। प्रत्यक्षज्ञानस्य प्रमेयं घटादिनजन्यत्वं लक्षणं स्वपदार्थाननु
गमादित्याह स्वमेयजनत्वेचेति आत्मप्रत्यक्षे आत्माभवति मेयस्तज्जन्यत्वं च सर्वज्ञानानामित्याह पूर्ववेति आत्मानुमिति
स्मृत्यानिव्याप्तिः पूर्वोदोषः एवं व्याख्याने आत्माश्रयप्रसंगः प्रत्यक्षत्वेन तदप्रवेशे यज्ज्ञाने यन्मेयं तज्जन्यत्वमिति व्याख्येयं
विद्यासागरस्तु मेयजनितमात्रं स्वमेयजनितत्वं वा आद्ये घटज्ञानस्य पटप्रसंगद्वृत्त्या हानिप्रसंगादिति अंत्ये स्वार्थव्यावृत्तेति
इदं लक्षणं नाप्रतीतं लक्ष्यसाधकमिति प्रसंगात् प्रतीतमपि न स्वतः प्रतीतं जडत्वात् अन्यतः प्रतीतं चेत्तर्हि तदेव लक्षण
मस्तु व्यवहितप्रतीतिकत्वादित्याह पूर्ववेति व्याचष्टे ननु युक्तं एतेषां दोषाणां प्रागुक्तत्वात्। पूर्वदोषो नानिर्वाच्यत्वं [illegible]ल्ये ववक्तु ९७
मुचितत्वादिति। ज्ञानत्वे सति विषयप्रमितूसानुपपत्तिप्रतिवंधकत्वं साक्षात्त्वमिति। सप्तमं लक्षणमाशंकते अथयेनेति

अनुमानाद्यनंतरमपिप्रत्यक्षोत्पत्तिप्रमित्साभवतियदनंतरमात्मप्रत्यक्षंप्रत्यक्षेनुक्षतिप्रमित्साया अदर्शनात्तस्यप्रतिबंधकत्व
मित्यभिमानः। दूरमसंभवेनदूषयति तद्विजातीयानव — —तेः तन्तूनसजातीयभिन्नत्वं हि तद्विजातीयत्वं तत्त्वसजातीयास्म
कप्रतीयोगिनिरूपननिरूप्यं तथाचलक्षणात्मसाजात्यावगतोपरं पराश्रयोन्यतोवगतो नदेवलक्षणमास्तीति भावः।
शत्रुसंपादनुमितत्वावतिव्याप्तिमाहादिसंपद्यनुमादिविषयइति क्वचिदनुमानादिविषयायामिति पाठः स च विषय
शब्दस्य पुंलिंगत्वादनुपपन्नः प्रमादिक एवेति यद्वा अनुमानेविषयोऽतिव्याप्तिस्थलत्वेन यस्यास्तस्याअविसंवादीत्यर्थ
इतिमैथिलाः अन्यास्तु विषयपदं विषयतापरं त्वेकयोर्निवचनेकवचनदूत्सत्रद्वितैकयोरिति च तथाचानुमानादिविषयतायस्यामिति वि
बहुव्रीहिणासाधुरित्याहानुमानादिविषयिकरोतीत्यनुमानादिविषयासंपत्तु विषयएव हि ज्ञानस्य विषयितां संपादयन विषयिक
रोतीत्युच्यते यद्वा विषयाइति विषयिमयत इत्यवधानोत्थं ततश्चानुमानादिविषयिमयते यस्याः संपत्शत्रुसंपत्संबंधादेवानु त्पदः
मानादिविषयंप्राप्नोतीत्यर्थः। इति तु नत्वं प्रत्यक्षाद्यतिनुमानिदृरिच्छाविरहादित्यर्थः ननुशत्रुसंपदोऽतिघृत्वादेवनतूत्पत्तेरिच्छानोत्पद्यते
नत्वनुमितिस्तत्प्रतिबंधकाइति चेन्नप्रत्यक्षानंतरमनुमित्सानजायतइतिप्रत्यक्षेणतत्प्रतिबंधकं तदेवत्वसिद्धमिति तत्रोपपन्नवकाशीयं

दूषणमुद्भावयति प्रत्यक्षावगतेपीत्यादिना अत्र विशेषदर्शनात् कथं प्रत्यक्षावगते संदेह इत्यस्वरसः केचित्तु नेन सूचितं तदस्य दूर
स्थवृक्षे दूरत्वदोषात् सादृश्यदर्शिनो वृक्षाशोकत्ववृक्षसंदेह इति बाधकाभावात् ननु पदे अशोकसादृश्यसूचनायत तस्मात् केचिदिति
बौद्धनिकमुख्योद्भुत्युक्तास्वाभतमुदाहरणांतरमेवेदं प्रत्यक्षाव्याप्तिप्रदर्शनाय । तत्र मंलक्षणमाशंकते अज्ञायमानेत्यादि ।
स्मृतावति व्याप्तिवारणाय अनुभवपदं मनःसंयोगः सर्वेषु ज्ञानेषु ज्ञायमान एव हेतुरित्यनुमानादावतिव्याप्तिरित्यसाधारणपदं
मतभेदेन लक्षणांतरमाह कारणेति । अज्ञायमानसाधारणभावकारणकानुभवत्वमित्यर्थः तथा च भट्टमते नेदं लक्षणमिति यद्यपि अ
नुमितावपि बाधाभावविधया अनुपलब्धिः कारणं तथापि नासाधारण्यं मसंसर्गाग्रहस्य विशिष्टधीमात्रे हेतुत्वात् अबाधितत्वज्ञानमेव परोक्ष
ज्ञानमिति पक्षमाश्रित्य एवेदं । दीर्घादित्यादिपदेन सादृश्यपरिग्रहः । प्रभृतिरिति सादृश्यप्रतियोगिनः परिग्रहाय न विधित्वथेति समान
दोषभाजोरेकत्र दूषणोद्धारे अन्यत्रापि तुल्यतयोद्धारो भवतीति एकत्र एव कथनं तद्दोषाय अतीतादि इति आदिपदेन अनागतस्य परि
ग्रहणं गूढाभिसंधिः अव्याप्तिं परिजिहीर्षुराह पात न तोऽनुमाने तिव्याप्तिमाह । धूमं दृष्टवान् यः स धूमदर्शी तद्दर्शनस्यातीतत्वं दृष्टस्यातीतत्व ६प्प
विवक्षया कथयति धूमदृष्टवान् इति ज्ञानविशेषणतायेति ज्ञानमात्रं न हेतुं किंतु लिंगज्ञानमिति ज्ञेयस्य लिंगस्यापि हेतुनेति अभिसंधि

पुष्णाटयतितुल्यमितितथाचदीर्घादिष्वन्यस्तावाप्तिरितिभावः यद्यप्यसतोहेतुत्वानसंभवतितथापिज्ञानावच्छेदकत्वमेवतस्यहे
तुत्वमिहविवक्षितमितिभावः यद्वा जातिव्यक्त्यभेदवादिमतेनेदं। ननुवाधज्ञायमानस्यकारणत्वेपिप्रत्यक्षस्येंद्रियकरणक
तयाऽज्ञायमानकरणकत्वमस्त्येवेति चेन्न ज्ञायमानमेव कारणं यस्येत्येववाक्यार्थात् ऽन्यथानुमानेपि अदृष्टविशेषा
देककारणस्य ज्ञायमानस्यैवतत्वेनातिव्याप्तिः अथलिंगंकरणं ज्ञानंतद्व्यापारइतिनाज्ञायमानकरणत्वमत्याशंक्याह अथे
ति अवधिज्ञानस्यव्यापाराभावान्नकरणत्वमित्याशयात्रतिव्याप्तेर्वपरिहरति अनुमितेति अनुमितौभाविलिंगंयस्य
भाविलिंगिनस्तदनुमितभाविलिंगकं यद्भाविलिंगिनस्तस्यानुमितेत्यर्थः। यदापुरोवातादिविशिष्टलिंगेनविशिष्टमेघोदय
मनुमापयतेनभविष्यंतीवृष्टिरनुमीयतेतदाऽसतोमेघोदयस्याकारणत्वात्तज्ज्ञानमज्ञायमेवकरणंप्रभाकरःशंकतेलिंगज्ञानेनावदि
तितावदेवकार्येलिंगज्ञानंस्वरूपेणैवकरणंज्ञायमानतयाप्रमाणाभावादितिपाठः सुगमएव क्वचित्तु उक्तप्रत्ययानांतथात्वे
प्रमाणत्वाभावादितिपाठः सएवविद्यासागरसंमतः तस्य च उक्तप्रत्ययानामनुमितभाविलिंगप्रत्ययानांज्ञायमानतयाकरणको
टौप्रवेशेप्रमाणत्वाभावादित्यर्थः। लिंगविषयकज्ञानत्वेनकरणत्वस्यावश्यकत्वेनज्ञायमानत्वस्यगुरुत्वान्निष्प्रमाणकमव

च्छेदकत्वकल्पनमिति भावः। ननु कारणताया अनतिरिक्तवृत्तित्वमेवावच्छेदकत्वं ननु लघुत्वसहितगुरुत्वादीत्याशंक्याव्या-
प्याद् दूषयति घटादीति विधाविति अज्ञायमाने नियमेन कारणं यस्येति कारणविधावित्यर्थः। कारणत्वे नैव नियमस्य लब्ध-
त्वादिति भावः। नियमेनेति ज्ञानं कारणं यत्र नियमेन नेत्यर्थः। असिद्धेरिति ज्ञानकारणत्वस्य कदाचिद्ध्रियमानत्वेन ज्ञानक-
रणत्वं यत्र नियमेन नास्तीत्युक्तावसंभवापत्तेरित्यर्थः। ज्ञानकरणजन्यत्वे यस्य नियमेन तद्भिन्नत्वमित्याशंक्याविधौ नैवे ने
वं करणतांशप्रवेशादेव नियमलाभेन तद्वैयर्थ्यमित्याशंक्याह करणत्वप्रविष्टस्य वक्ष्यमाणानुवादोऽयं पक्षीकरणार्थ इत्याशय इति
विद्यासागरः। ज्ञायमानत्वं करणस्य विशेषणं तत्रोपलक्षणमिति नियमेनेत्युपादानाल्लभ्यमिति भावः इत्यपरे। अस्मिन्प-
क्षे ज्ञायमानकरणकमित्यभिधानादेव विशेषणलाभेन तद्वैयर्थ्यमित्याह तथापीति प्रथमपक्षे विशेषणस्यास्पष्टस्पष्टीक-
रणतायाः क्वचिन्नप्रयोजनत्वाद्यौकल्प्यनाद्वैयर्थ्यमित्याह तथापीत्यादि ज्ञायमानकरणकत्वं अनुमीयमानवह्न्युर्जन्य-
ज्ञाने प्रसक्तेऽप्यतिप्रसक्तमिति तद्वारणार्थमयमनुवाद इत्याशयेनाहान्यथेति। अवर्जनीयसन्निधिमादाय यद्यतिप्रस-
क्तिस्तदान्यथासिद्धमन्यदपि कारणं स्यादिति सुतरामतिप्रसक्तिरित्याह तथाप्यतिप्रसक्तेरीश्वरज्ञानमादाय प्रसक्तेत्यतिप्रस-

न्निरसपद्याख्यानमग्रिमफक्किकाविरोधात्। ननुन्यथासिद्धमपिकारणमित्यत आह रसादिसाक्षात्कारे इति अन्यथासिद्धेन ज्ञानेन
ज्ञायमानकरणकत्वं प्रत्यक्षस्य न त्वेवमनुमानस्येति अज्ञायमानकरणकानुभवत्वं अनुमानगामीत्याह अन्यथेति लिंगज्ञा
नमपि स्वप्रकाशतया स्वविषये न्यथासिद्धमेवेत्यनुमानेप्यज्ञायमानकरणकत्वमतिप्रसक्तमेवेत्याह तन्मते त्वादिति शे
२ कमिश्रास्तु ज्ञानान्यथासिद्धस्यावच्छेदकत्वे पि कारणत्वानंगीकारादन्यथासिद्धमन्यदप्यनुक्तौ लंभापानात् विधौ नियमवि
शेषणाभावे अज्ञातकरणकानुभवत्वं भावि लिंगज्ञानकरणकानुमितावतिप्रसक्तमित्युक्ते कश्चिल्लिंगं ज्ञायमानं करणं कु
चिल्लिंगज्ञानमिति कल्पनायां प्रमाणाभावात् सर्वत्र लिंगज्ञानमेव करणं न त्वज्ञायमानमेवेत्याह तथाप्यतिशङ्कोरेवाव
स्य र्त्तमानं लिंगं न कुतो करणमित्याशंक्याह द यस्य मेवे ज्ञानावच्छेदकत्वेन तस्यान्यथासिद्धत्वं दृष्टांतेनातिव्यनक्ति नहीति वैधर्म्यं
शंकते अन्यथासिद्धिरिति रूपं रसव्यापकमिति रससाक्षात्कारे रसेनावश्यकक्लृप्तेन जनयितव्यरूपं नियतपूर्ववर्त्यपि न
हेतुः अवश्यं क्लृप्तलघुपूर्ववर्त्तिसहभावित्वादिति भावः। लिंगस्यापि ज्ञानकर्मत्वेनानुमितिकारणीभूतज्ञानेन सहभावित
यान्यथासिद्धत्वमित्याह तुल्यमिति नियमं निषेधविशेषणमिति पक्षे दूषणांतरमाह किंचेति ज्ञायमाणकरणकत्वं यस्मि

न्ननुभवे नास्तीति निषेधवतानद्भुतमेकजातीयं निषेधाधिकरणगततया ज्ञानत्वं निषेधज्ञानस्याधिकरणज्ञानजन्यत्वादत्रविपदे
दंडमाहान्यथेति व्यक्तिर्न निषेधस्य धर्मिणं व्यापकत्वादतएकोपाधिकोडीकृतं रूपं वाच्यं नतः फलितमाह कार्यत्वेति नियमस्या
न्वयव्यतिरेकावसेयस्य जात्युपाधिविषयत्वान्न दनभिधानेन निस्तारस्तज्ज्ञानेन च तदेव लक्षणमस्तु लाघवादिति निय
मपरित्यागेन नू पूर्वं तस्याः प्रत्यक्षव्यक्तेः पूर्वं प्रतीतानां चक्षुरादीनां तत्र करणत्वाभावेऽदुष्टत्ववधारण एकव्यक्तेरेव निषेधाधि
करणतया व्यक्त्यंतराणां निषेधानधिकरणत्वादतोऽव्याप्तिपरिहाराय जात्युपाधौ लक्षणमभिधानीयमिति निगमयति
ओ। ननु इति तज्जातीये अनुभवत्वं तीये तज्जातीयव्यभिचारप्रतिसंधाने ज्ञानकरणजातीयस्य व्यभिचारप्रतिसंधानस्यापव्याप्त्यानं अस्मि
न्ननुभव इत्यनुवादेव्यक्तेरेव निषेधाधिकरणताप्रतीतिस्तस्याश्चाननुगतात्वाल्लक्षणत्वेकुतो जात्यपेक्षा अतएव व्याख्येयं मूलेयत्र
परं लक्षणतावच्छेदकावच्छिन्नपरमेव एकरूपं यावतां लक्षणं संग्राहकं अन्यथा किमादायेत्यत्र किंधर्मावच्छेदेनेत्यर्थः नहि
तन्ननू प्रत्यक्षव्यक्त्यवच्छेदेन नियमनिरूपणं यावतीषु प्रत्यक्षव्यक्तिषु स्मादृशामसर्वज्ञानां ज्ञानासंभवतिनन निस्तार इति नच

४ संधाने एतदुक्तं भवति ज्ञानकरणजातीयाजन्योऽनुभवजातीयः स्मारणानुकारी अनुभवत्वेऽसति ज्ञानकरणजन्यत्वात्यंताभावाधिकरण २१९
त्वं साक्षात्त्वमिति यावत्प्रघट्टकव्याख्यानं विद्यासागर ४

तरसपि निरूपितमिति ततश्चलक्षणं दुर्ज्ञेयमिति तथा यद्धर्मावच्छेदेन निषेधनियम इति नियपदं च व्यर्थं न च तन्नूसागे व्यक्तिवि
शेषस्य लक्षणतायामनेकार्थतार्थां च प्रत्यक्षापदस्य स्वीकारेपि निस्तारः तत्पूर्वप्रतीतानां पदार्थानां तत्र कारणत्वं दुरवधारण
मिति तथा च ज्ञायमानकारणत्वं स्यादित्सव्याप्तिः अस्तिहि तेषां तद्व्यक्तौ नियमः पूर्वभाविता च न चान्यथासिद्धिः यं च सु तिष्ठतु
वा मध्ये एकस्या अप्यभावात् एतद्व्यक्तेः सामग्र्याः क्वापि कूपत्वाभावे नावश्यं कूपपूर्ववर्त्तिनद्व्यक्तेस्तस्या अपि च क्कुमशकादिति ।
तस्मान्निषेधनियमाप्रवेशेपि ज्ञायमानकरणत्वाभावो यद्दवच्छेदेन प्राप्तः स च न व्यक्तित्वं उक्तदोषापत्तेरित्यनुगतधर्मो वाच्यो यदव
च्छेदेन ज्ञायमानव्यक्तीनां व्यभिचारान्न कारणतानास्तीत्याशयेनोपसंहरति कार्यजातीयप्रतिज्ञायमानपूर्ववर्त्तिजातीयस्य व्यभिचार इ
त्यर्थः । अपूर्वं लक्षणमाशंकते अथेति कुटिलिकार्थः वक्रगत्सापर्यवसितोर्थः प्रकाशत्वमिति प्रकाशत्वेसतिप्रमात्वमित्यर्थः स्वविलोचने
तिमदीयं चक्षुः साधिष्ठानमिंद्रियत्वादन्येंद्रियवदित्येवमनुमाने निव्याप्तमित्यर्थः । इंद्रियाधिष्ठानत्वादेवेंद्रियसन्निकृष्टत्वमित्यर्थः परकी
यगोलके प्रत्यक्षमस्त्येवेति स्वपदं परेंद्रियसन्निकृष्टव्यावृत्यानुमानेप्यतिव्याप्तिर्यदि च प्रमातृसन्निकृष्टत्वं विवक्षितं तथापि नोद्धारस्तस्या
पि प्रमातृत्वात् अथ लक्षणीभूतप्रमाश्रयपरं प्रमातृपरं तदापि सदोषस्तदवस्थ अनुमातुरपि कत्वादाद्वित्वान्तथात्वात्... थं न तत्कालीनत्वमपि

प्रमायाविशेषणं तथासतिलक्षीभूतप्रमाऽव्यवहितप्राक्कालेंद्रियसन्निकृष्टार्थप्रमात्वमितिपर्य्यवसितं लक्षणं नचलक्षीभूता
प्रमाऽप्याप्तिनिरूपितेतिदिक् । नवमंलक्षणमाशंकतेज्ञानाजन्यमितिसविकल्पकविशेषेतिअभावसमवाययाः प्रत्यक्षेस
र्थः । सविकल्पकसामान्येनाव्याप्तिः निर्विकल्पकजन्यस्यतस्यतद्विकल्पकाजन्यत्वात् ज्ञानपदस्यसविकल्पत्वादितिभावः नपर
दृशमंशंकमानएवदूषयतिएतेनेतिलिंगादिज्ञानजन्यज्ञानविषयांतरविषयकमतोनतज्जन्येऽतिव्याप्तिः नवानिर्विकल्प
कजन्येसविकल्पकेव्याप्तिस्तस्यसविकल्पकविषयविषयकनिर्विकल्पकजन्यत्वेनविशिष्टाभावत्वादितिभावः ज्ञायमान
लिंगादिकरणत्वपक्षेपिज्ञानस्यापिकरणत्वं विनिगमनाविरहादितिनातिव्याप्तिः । एतेनेत्यस्यसविकल्पकाव्यापकत्वे
नेत्यर्थः उक्तमेवहेतुंस्पष्टयतिसविकल्पकस्येतिनिर्विकल्पकार्थाद्वस्तुमात्रादधिकमितरेभ्योव्यावृत्तिरूपंतद्विषयत्वादि
त्यर्थः । व्यावृत्तिविशिष्टस्यविशेष्यरूपत्वान्नाधिक्यमित्याशंक्याह तदधिकज्ञानजन्यत्वादितिभेदप्रतियोगिज्ञानजन्य
त्वादित्यर्थः इत्थंव्याख्यानेविद्यासागरस्यसविकल्पकैकावच्छेदस्यवैशिष्ट्यरूपस्यस्वरूपेणभानात्तत्रचभेदप्रतियोगिनोज्ञाना
नपेक्षणात् एतेनविषयांतरेयज्ज्ञानाजन्यज्ञानत्वंतदेवप्रत्यक्षत्वंलिंगादिज्ञानेनविषयांतरेऽनुमित्यादिकंजन्यतेति

विकल्पेनतुस्वविषयएवेत्यभिमानः निर्विकल्पकविषयादधिकस्यवैशिष्ट्यस्यापिअन्तर्भावात्निरूपस्यसविकल्पकेविष
यत्वादव्याप्तिरितिमिश्राःस्तद्दूषणान्नादृशलक्षणस्यासाधुत्वात्अन्यबूमः जन्यज्ञानविषयाद्यवच्छेदाद्यद्विषयान्तरविषयकंयज्ज्ञानंनिर्वि
कल्पकंतज्जन्यत्वादव्याप्तिःतामेवस्फोरयतिसविकल्पकस्यनिर्विकल्पकविषयादधिकोव्यवच्छेदोयतोविषयोऽतएवानोधिकस्यनिर्विकल्पका
द्भिन्नस्यतस्यज्ञानजन्यत्वात्निर्विकल्पकजन्यत्वात्तुविषयभेदेनैवज्ञानभेदेसतितस्यैवलक्षणस्य[illegible]पेक्षायांनिर्विकल्पकसिद्धिरितिभावः क्वचित्त
नुतदवधिज्ञानजन्यत्वादितिपाठस्तदाऽवधिज्ञानंनजन्येदीर्घप्रत्यक्षे ह्रस्वादिव्यवच्छेदोऽधिकोपिभा[illegible]सतद्भूतार्थः तथाचदीर्घादिप्रत्यक्षे
ह्रस्वश्चव्यवच्छेदमवगाहमानेऽव्याप्तिस्तस्यावधिज्ञानेनभिन्नविषयेनजननादित्यर्थः मिश्रलक्षणेनायमितिपाठः विषयान्तर
ज्ञानाजन्यत्वमितिलक्षणस्यसविकल्पकाव्याप्तिपरिजिहीर्षुराह स्वविषयेति निर्विकल्पकंतुसविकल्पक[illegible]विषयान्तर्गतार्थक
मितिनचजन्यत्वेपिसविकल्पस्याव्याप्तिः निर्विकल्पकाव्याप्तिवारणायतन्त्रान्तर्गर्भिता । यत्तुतेऽलौकिकप्रत्यासत्तिर्नास्ति
तन्मतआह अप्रतियोगिनेति । स्वपदेज्ञानमात्राभिधानेऽनुमित्यादिव्याप्तिः । तद्विशेषाभिधानेचाव्याप्तिरितिदूषयन्तितन्त्रेति ।
दारीकृतत्वादिति यथाहिक्षारभूमौकिमप्यंकुरंनजायतेतथाभूमिस्थानीयेलक्षणवाक्येलक्षणज्ञानांकुरस्यउत्पत्तिविरोधि

:२१
२२१

त्वपुरमित्यर्थः अथवा ढ्वाशीकृतो दुर्भगीकृत उपेक्षास्पदीकृतः यथा हि लोके पत्यात्यक्ता स्त्री द्वारितेत्युच्यते अपेत्यर्थः असंभवं चाहका
र्यघटकाविति कार्यकारणभावतदभावयोरन्वयव्यतिरेकभावतदभावनिश्चयावधार्यत्वात् तयोश्चानुगतरूपविषयत्वेनग्र
क्रावसंभवादित्यर्थः तज्जातीयइति तज्जातीयज्ञानव्यक्तिमात्रे तज्जातीयव्यक्तिमात्रस्य यो व्यभिचारस्तस्य च ज्ञानं तदेवका
रणत्वग्रहरियमुच्यते तदा लक्षणज्ञानान्तु प्रागनुगतरूपावगमं अंतरेण तज्जातीयत्वमेव दुरवधारणमिति कार्यैकरूप्ययत
नीयमिति तदेवलक्षणमस्तु अव्यवस्थापकत्वात् लाभित्तिरेण इति पूर्वदोषापत्तिः वस्तुतस्तु नादृशैकरूपप्रमाणाभावइति कार्यं
रचयति शास्त्रग्रहेऽपि पात इति एतेन हानाकरणकं ज्ञानं प्रत्यक्षमिति विपिंगेशस्य निर्वचनं परास्तं बाधात् हि नितृतीयादिप्र
त्यक्षे चाव्याप्तेः तत्रापि प्रथमज्ञानस्य द्वितीयज्ञानव्यापारकस्य करणत्वात् सर्वस्यैव ज्ञानस्येश्वरज्ञानकरणकत्वेनासंभवाच्च
इति दिक् । एकदेवलक्षणमाशंकते स्वकाले त्यादि स्वस्य ज्ञानस्य यः कालस्तदवच्छिन्नार्थप्रमात्वमित्यर्थः ।

स्याप्रकारकत्वादुपस्थितस्यधूलीपटलस्यव्याप्यत्वादिनिकेषांचिदिदंधनीयामनिव्याप्तिवारणंनदपाश्पत्तिभूतादीतितथाचनादृशानुमायामति
व्याप्तिरित्याशयः।कुटलिंगकानुमितिप्रमायामनिव्याप्तिरपिनोद्धृतेवेत्याहतथापिचेतिप्रमात्वंडनग्रंथेइतिउक्तत्वादित्यस्यादिः।वनुर्द
शंप्रत्यक्षत्वलक्षणंशंकते अनुपहितेति अनुमितित्वुपक्षोपहेतसाध्यविषयेतितनत्रातिव्याप्तिरित्याशयः।विशिष्टप्रत्यक्षंविशिष्टविषयंनच
तत्रान्यनुपाधिभूतेभासतइतितसंदुपेक्षविशिष्टविशिष्टेत्युक्तंयद्यपिविशेष्यप्रत्यक्षाव्यापनादित्येववक्तुमुचितंतथापिविशेष्यपदस्य
धर्मिमात्रपरत्वेनाव्याप्तिःसंभवतिनिर्विकल्पकस्यतथात्वादेवनिविशिष्टपदोपादानं।करणानुपहितत्वमितिअनुमितौतुलिंगात्मकक
रणोपहितोविषयोननुप्रत्यक्षेइंद्रियात्मककरणोपहितमितिनिर्भरः।परेतिदंडीपुरुषइत्यत्राव्याप्तिःदंडस्यचक्षुःकरणत्वात्अथकरणपदं
ज्ञानकरणपरंतदापिधारावाहिज्ञानकरणत्वादेंमौउस्यसदोषत्वदवस्थः।किंचपरकीयानुमितिकारणीभूतलिंगवतःपदतस्यप्रत्यक्षेऽतिव्या
५३ प्तिरित्यर्थः।पंचदशांशंकतेव्याप्तीतिव्याप्तिसादृश्यसंगत्युपहितत्वानांव्यतिरेकोसंतीत्यर्थः।व्याप्त्यादिप्रत्यक्षेतिव्याप्त्याघंकस्यचित्
सदृशःसंकेतविषयश्चेतिव्याप्त्यादिविशिष्टप्रत्यक्षाव्यापनादित्यर्थः।सर्वप्रत्यक्षाव्यापनाच्चासंभवमप्याहासिद्धेत्वाचेतियत्रैवव्याप्त्यादिसमुच्च
यासंभवस्तत्रैवतद्व्यतिरेकसमुच्चयोनचप्रत्यक्षेव्याप्त्यादिमतितरत्वीत्याससिद्धिरित्यर्थःयदिचविषयतासंबंधेनव्यतिरेकसमुच्चयोविवक्षितस्त

याचप्रत्यक्षेयद्यपिकस्यचिद्व्याप्त्यंशादृश्यंसमभिधेयंतथापिनतद्विषयकमतौनदोषस्तदानुमित्यादावनिव्याप्तिरित्याहपर्वतइतिफलितादुमाद्रूतिशब्दाम
तिव्याप्तिःकथमित्याशंक्याहशब्देनस्वाप्रतिपादनादितियद्यपिसंगत्यप्रतिपादनादित्येववक्तुमुचितंतथापिअस्माच्छब्दादयमर्थोबोद्धव्यइतीश्वरेच्छा
शक्तिःशंगत्यपरपर्यायाअतःशब्देनस्वाप्रतिपादनेनहेतिनसंगतिप्रतिपादनंदूरएवेत्याशयःमिश्रास्तुअनुमित्यादावपिव्याप्त्याद्युप
धानमसिद्धमित्यर्थःइत्याहुः।ननुशंलक्षणमाशंकतेअथाव्यवहितधीत्वमितिअव्यवहितस्यधीव्यवहितधीःयदीनिंद्रियविशे
षस्यमूर्त्तस्यअनंतराज्ञानकरणेन्द्रिययोर्मध्येऽवस्थितिर्व्यवधीरित्यर्थइतिविद्यासागरस्तन्नतदामनसोपिव्यवधायकतापत्तिस्तद
पिहिमूर्त्तमेवअथमूर्त्तपदंकठिनपरंतदातन्तुकालनिर्मितमित्यादीनामव्यवधायकत्वापत्तिःतस्माद्विशेषपदेनइंद्रियसंयोगविरो
धीबोध्यःआत्मज्ञानंप्रत्यक्षमेवननश्चतत्रसाक्षात्त्वोपादनेइष्टापत्तिरित्यप्रत्यक्षत्वेनविभवोविशेषितात्तद्धीरेववानेनात्मविष
यानुमितिशाब्दोरव्याप्तिव्याप्त्यापादनसंभवान्ननूनता।ज्ञापकज्ञानपूर्वसत्वेतिज्ञापकानिअनुमादीनांजनकानिलिंगादीनि
तेषांकार्यकारणानामनुमितिलिंगादीनांज्ञानस्ययाकार्यतःप्राक्कालेसत्ताऽवस्थितिःसाव्यवधानेप्रसक्तेतिंद्रियाणांज्ञान
जननेज्ञानप्राक्कालेस्विस्वरूपसत्तामेवजनकत्वान्नपूर्वपदमवश्यापेक्षतासूचनार्थत्वेनावनाज्ञानाजन्यत्वेज्ञानत्वेसाक्षात्वमित्युक्तमितिमिश्रेस

क्तं तत्रपदार्थो । नवावाक्यार्थः । पुनरुक्तं स्य अत एव ज्ञानाजन्यज्ञानत्वं साक्षात्त्वमित्यपि पूर्वमेव परास्तं तथापि तत्रैव दोषांतरं दित्सया व्यवधान
शब्दार्थविकल्पविशेषतया पुनरुद्भावनमिति विद्यासागरोक्तं हेयं कार्य्यकारणयोरंतराले वस्त्वपेक्षणीयस्य ज्ञानस्य सत्त्वाद्व्यवधानं तादृश
व्यवहितेतयोर्योर्ज्ञानमभवति सोऽव्यवहित इत्यत्र ज्ञानाजन्यत्वस्य प्रवेशाभावात् कार्य्यकारणे अपि ज्ञापकज्ञाप्यत्वरूपेण प्रवेशिते इति तत्रापि
प्रवेशसंभावनेति । विशिष्टवैशिष्ट्यं व्यवधानमिति यद्यपि ज्ञाप्यज्ञापकयोर्वह्निधूमयोरिमौ व्यवहितौ वह्निर्धूमस्य व्यवहित इति प्रत्य
योनास्ति तथापीह लक्षणघटकतया तथा विवक्षितमिति यदि ब्रूते तदापि दूषयति स्वरूपस्थितिर्वस्तुगतिरित्यर्थः धूमविशिष्टवह्निवैशि
ष्ट्यमिति यदि वस्तुगतिस्तदा धूमस्य वह्निकारणत्वापत्तिरित्यव्याप्त्यानंपूर्वभाविनामात्रेण कारणत्वस्यापादनाशंकेस्त्यान्यथासिद्धसाधार
णत्वात् स्वरूपपदं चलाक्षणिकं स्यात् तस्मात् स्वतन्त्ररूपेण ननु ज्ञाप्यमानत्वरूपेण तथात्वे प्रथमभावित्वे कार्य्यकारणत्वविरोधः धूमस्य वह्निका
र्य्यत्वत्तस्यापादुत्तरभावनियतत्वात् कार्य्यत्वस्येत्यर्थः । तथाच वह्निधूमव्यवहितत्वस्योक्तस्याभावात्तदनुमितावतिव्याप्तिरिति भावः । धूमवै
शिष्ट्यज्ञाने पर्वतादौ पक्षे चेत्तदा धूमविशिष्टतया ज्ञाते पक्षे यद्वह्निज्ञानं तद्व्यवधानमिति विवक्षायां वह्निज्ञानमेव तस्यात् धूमविशिष्टतया
ज्ञाने धूमस्य वृत्तावात्माश्रयापत्ते धूमस्यावृत्तौ पक्षधर्मताज्ञानाभावादनुमित्यनुदयात् अथ धूमविशिष्टस्य वह्नेर्धर्मिणि वैशिष्ट्यमित्येवं वि

यंविशिष्टवैशिष्ट्यमेवव्यवधानंतदाव्याप्तिरन्यदाव्याप्तिरित्यपव्याख्यानंवैशिष्ट्यस्यसाध्यविशेषणत्वइतिमूलविरोधात्तस्माद्धूमवैशिष्ट्यस्य
वह्निविशेषणत्वमेवव्यवधानंतथाचव्याप्तिरन्यदाव्याप्तिस्तत्रधूमवैशिष्ट्यस्यधूमसामानाधिकरण्यत्वेनोविषयत्वेनव्यवहित
विषयतापत्तेरित्यर्थः।यत्तुतत्रसाक्षात्त्वंनस्याद्धूमवैशिष्ट्यप्रतीतिरूपव्यवधानादितिविद्यासागरव्याख्यानेतदसत्तथास
त्यनुमित्यतिव्याप्तितादवस्थ्यात्नहिवह्नौधूमसामानाधिकरण्यप्रतीतिरूपानुमितेर्वाप्रतीत्यनंतरमनुमित्यव्यवहितप्राक्का
लेतथाविधमस्तीतियदितुविशिष्टवैशिष्ट्यमित्युपक्रमान्नवैशिष्ट्यमात्रंव्यवधानंतदामिश्रोक्तमेवग्राह्यंसाध्यविशेषण
त्वइतितुनविशिष्टवैशिष्ट्यपक्षात्पदांतरंकिंतुविशिष्टपदस्यवैशिष्ट्याश्रयपरस्याश्रयोनधर्मीकिंतुसाध्यमित्येतत्परमित्य
वधेयंअव्यवहितपदंपरेंद्रियसन्निकृष्टपरंलक्षणवाक्येनतदाप्रागुक्तदोषमेवेतिअसन्निकृष्टत्वव्यवधानत्वेननाशंकिते
६ ।प्रत्यक्षलक्षणंशंकतेसाक्षात्त्वंजातिभेदइतिइंद्रियजन्यतावच्छेदकोऽथवाज्ञानाकरणकज्ञानमात्रवृत्तिरित्यर्थः।केचि
दितितत्रापिज्ञातृज्ञानांशेसाक्षात्त्वंतस्याअपिस्वप्रकाशत्वादितिभावः।तथात्वानभ्युपगमादितिसाक्षात्त्वजातिवादिनानैया
यिकेनज्ञानाकरणकज्ञानत्वव्यंगसाक्षात्त्वस्यज्ञानकरणिकायांस्मृतावभावनिर्णायेनेतिभावः।तथापिभट्टमतेस्वप्नस्यस्मृति

त्वात् ज्ञानलक्षणप्रत्यासत्त्यैकीकारेण साक्षात्त्वासंभवाद्भवतां नु तत्रापरोक्षत्वाभ्युपगमादनुभवत्वपरिहारेण वर्त्तमानस्य सा
क्षात्त्वस्य संकीर्णस्यादेवेत्याशंक्याह संततित्वासिद्धेः। अनुभवकारणवाधान्न स्मृतिर्नैव सादोषादेव विपर्ययस्वरूपाशिरश्छेदस्मृ
तौ कदाचिन्नस्थीयत्वमपि विषयीकरोतीति हृषभट्टमतं न तु तत्र साक्षात्त्वमस्ति इन्द्रियसन्निकृष्टविषयत्वात् रात्रौ स्वप्ने जगन्नाथो मया
नीलाचले साक्षात्कृत इति कथमनुव्यवसाय इत्याशंक्याह स्वाक्षात्कारोपादिति साक्षात्त्वं तत्र नास्त्येवेति त्वानुभवत्वपरिहारः
यदि च नारोपस्मरणादृष्टोऽदृष्टइत्यनुभवाच्चादुपलस्पर्शनत्वे अपि स्यात्तां भावनावलजन्यं चेति आलोकादिधर्मे अधिष्ठानं
यस्य प्रियाद्याश्रयधर्मरूपस्य चक्षुःसंयुक्तालोकादिधर्मिणि आकामुकस्य कामादिदोषात् स्वभुमुना साक्षात्कारादयो धर्मा आरो
प्यन्त इत्त एव स्मृतित्वं किंतु साक्षात्त्वमेव कान्तहिंगतिर्मिमीलितनयनस्य दैवनाध्यायतो ध्येयसाक्षात्कारे एवं तत्रापि साक्षात्
कारकारणवाधा साक्षात्त्वारोप एव अनुभवकारणाभावे जायमाने तस्मिन्ननुभवत्ववत्तद्व्याप्यं साक्षात्त्वमपि नास्ति परे तु म
नो निरोधदोषवशेन मनसा जन्यमानत्वात्साक्षात्कारपि स्वप्नवद्भ्रम एवेत्यर्थः। अनुभवसांकर्यस्याभावेपि परोक्षत्वेन सांकर्यान्न साक्षात्त्वं
जानिरित्याह इदं तु स्यादिति तत्र परमाणुबुद्धिविषयेऽनुव्यवसायेपरोक्षत्वसाक्षात्त्वसांकर्यमुक्त्वा अनुमानविशेषे पि प्रत्यक्षार्थधर्मिकायां

चेत्यादिना सांकर्य्यं वदतीति विद्यासागरः। वस्तुतः साक्षात्त्वजातेर्मानं न प्रत्यक्षमेत्याह इदं तु स्यादिति नद्भावेनानुमानशब्दावपीत्यप्र
स्व। माणकं साक्षात्त्वं कथं लक्षणं भवेत्प्रमाणाभावात् सत्त्वं न जातिरित्युक्तापरोक्षत्वसांकर्य्यात्त्वत्वस्य न जातित्वमिति निवक्षतीति
अन्यथोदाहरणभेदेन सांकर्य्यदर्शनमनुपयुक्तमेव स्यादिति ध्यनुक्तं स्वपरिमाणन्यूनतरपरिमाणारब्धे कार्य्यद्रव्यत्वात्
पटवट। अनुव्यवस्यमानायामित्यत्रानुव्यवसीयमानायामिति युक्तं पाठ इत्युक्तं तथा सति व्यवसायत्वाभावापत्ते र्व्यवस्यमानायामिति अनुव्यवस्य
त्वामिति वा युक्तः पाठः बुद्धाविति विषयसप्तमी अनुव्यवसायात्मिकायां परमाणुबुद्धाविति वार्थः स्पष्टानोः गणे पठितस्यरूपमिदमिद
मिति मिश्राः पटवदित्यनुमानजा परमाणुबुद्धिरनुव्यवसीयते कुतो परमाणवइति निर्विषयाया बुद्धेरनुव्यवसाया गोचरत्वात्तथा च बुद्धि
स्विव परमाणुनाम्नापि मानस्यापरोक्षविषयत्वं न चैवमनुभवोस्ति परमाणुनामयोगिगम्यत्वापातादित्याशयेन परमाण्वादित्ततश्च पर बुद्धाविति पाठे
माण्वाद्यंशे अनुव्यवसायस्य परोक्षत्वं ज्ञानांशे च प्रत्यक्षत्वमिति सांकर्य्यमिति सांकर्य्यपरं व्याख्यानं भमनुयोगव्यक्तिर्जातिर्जा
तेः प्रत्यक्षत्वनियमात् ज्ञानत्ववत् स्वांशे साक्षात्त्ववच्च परमाणुसाक्षात्कारोयमित्यपि भासेत न चैव भास्ति तस्मात् योग्यानुप
लब्ध्या जात्यभावः प्रमीयते ननु परमाण्वाद्यंशेपि व्यवसायात्मकप्रत्यक्षसा [illegible] मिश्रीसत्तात्तज्ज्ञाने प्रत्यक्षमेव लौकिकसन्निकर्षजत्वस्यैव

तद्व्यंजकस्य तदंशेऽभावान्न प्रत्यक्षविषयतेति चेन्न ज्ञानस्य प्रत्यासत्तित्वेऽनुमानादिप्रमाणोच्छेदापत्तेर्नेत्यप्रत्यासत्तिरित्या
ह । अन्यथेति लिंगबुद्धिर्न प्रत्यासत्तिः स्वविषयकबुद्धेरेव तथात्वोपगमात् तथाप्यन्यविषयकस्यापि तथात्वस्यादिति
खंडनिकाभिप्रायेः यस्मिन् लिंगज्ञाने चरमपरामर्शरूपे वह्निरपि व्याप्यत्वावच्छेदकतया भासते तद्रूपरमिदं अग्न्यादिपदेन
योग्यतावशाद् द्वयोरपि तादृशयोरेव परिग्रहः किं च न तस्य ज्ञानमित्येव प्रत्यासत्तिः किं तु सिद्धसाक्षात्कारित्वे प्रत्यासत्तित्वं तदभावे सति
न च परमाणुप्रतीतत्वं शेषसाक्षात्त्वं सिद्धं । न च लौकिकसन्निकर्षजत्वे साक्षात्त्वव्यंजकं भ्रमे रजतांशे साक्षात्त्वस्य विनापि तेन प्रत्ययात् । प्रत्यभि
ज्ञायामपि परोक्षत्वसांकर्यम् अन्मते योग्यानुपलब्धेर्वा एवं प्रत्यभिज्ञायामिति तेन विप्रतिपन्नानुभयान्नार्थसिद्धिरित्युपसंहरति तस्मादिति
दूषणांतरमाह किं चेति कस्यांचित् प्रतीतौ विति अभावप्रतीतौ भट्टनैयायिकानां बाह्यज्ञाने च बाह्यानां साक्षाद्भासा साक्षात्त्वे वा दोनस्यादि
त्यर्थः । साकल्ये नार्थग्रहणं स्फुटावभासः साक्षात्त्वजाने रनवरयवत्वादस्ति चेदवभासस्तर्हि स्फुट एव स इत्याह निरंश इति । को स्फुटाभा
स इति वक्तव्ये अस्फुटात् परो यो वभासः स स्फुटाभास इति कः अस्फुटस्याप्रसिद्धिरित्याह स्फुटादन्योऽवभासः स्फुट इति न शक्यते वक्तु
मित्यर्थः एवं चेदस्फुटत्वं निरस्यते तदा निरंशे वस्तुनि कुचिदपि स्फुटाभासो न स्यान्न था च ज्ञानत्वादावपि संवादः स्यादिति भावः अथ तत्ता

कल्पेनार्थग्रहणं नस्फुटाभासः किंतु ज्ञानत्वानुभवत्वप्रमात्वादयो भूयांसो ऽपरोक्षत्वेनैकार्थसमवायिनो ये धर्मास्तैः सहग्रहणमेव स्फु
टोपलंभ इति संकेते यदीति शंक्यः स्फुटोपलंभ इत्यर्थः। ज्ञानादित्ववदिति आदिपदेन गुणत्वसत्वयोरपि परिग्रहः स्वसाक्षात्वेपीत्यन्वयः
साक्षात्वेस्फुटमवभासमानेपि मानसत्वादेव परोक्षेण भवितव्यमिति मानसत्वे निमित्तोयं विवाद इत्याशंक्याह दर्शनकृतो हीति न
३८ मानसत्वाय द्वामात्रं अर्थशून्यवाक्यं परपदेन शुद्ध इत्येववाक्यं तस्मान्न यतो दर्शनकृतो हि ते कथं अंतरमाहुरित आह किंतु
तत्वाभिमानादेव असिद्धिरिस्वत्वधुक्तया सर्वेषामतमेव तत्वमित्यभिमानं। विरुद्धं कथमेकत्र तत्वस्यादित्याशंक्याह अभि
मानादिति अभिमानान्मतमेव सम्यग परस्य तु नेत्याकाशत्वेनु वाह्यं किमपि नत्वमस्तीति भावः। प्रत्यक्षार्थधर्मिकायामि
तिपर्वतेनोयं वह्निमानित्येवमाकारायामित्यर्थः इयमनुमापरोक्षेति तवापिसम्मतं परं तु पर्वतांशेपि सानुमितिरेव पर्वतेन
चक्षुःसंयोगस्तु विद्यमानोपि न प्रत्यक्षायालमनुमितिसामग्र्या इह दृष्यावलवत्वादिति नवमतं तन्तु न युक्तं वलवत्वं हि प्रति
वंधकत्वं तत्र फलाभावनिर्णये शक्यनिर्णयं न चेह प्रत्यक्षाभावः शक्यो निर्णेतुं न च तथापि संशय इति वाच्यं उभयसामग्र्याः
समाजादेव विलक्षणकार्योत्पत्तिसंभवे ऽनुमितिविशेषसामग्र्यभावस्य प्रत्यक्षकारणत्वकल्पनायां गौरवात्। एवं तर्हि साक्षा

त्वानुमितित्वयोः सांकर्यान्न जातित्वं स्यादिति चेन्ननु किमयं मन्त्रपाठः पर्वतो वह्निमानिति धियं प्रतिबध्नाति पर्वतत्वान्नं वा नन्त्साक्षात्का
प रत्वाश्राद्यद्वयं तवाप्यस्मन्मते तृतीयप्रतिबंधस्तु अयमिति प्रतिभासविरुद्धः न हीदं तापरोक्षमात्रस्य विषयः किं च तादृशज्ञानोत्तरमयमित्यभि
लापोऽपि न स्यादिदमाऽपरोक्षबुद्धिस्थवाचित्वादिति । ननु भावभूतयोः धर्मयोः परस्परव्यभिचारिणोरेक एवेस्थानमेव सांकर्यं न त्व
परोक्षत्वस्य जातित्वे विरुद्धादित्याशंक्याह केवलं साक्षात्वाभाववृत्ति साक्षात्वाभाव एव परोक्षत्वमित्यर्थः । परोक्षत्वेन निश्चिते साक्षात्वाश्रय
त्वेन जातिशांकर्यमपाच्य साक्षात्वेन निश्चिता यां परोक्षत्वजात्या सांकर्यमाह सर्वत्रेत्यमन्यमानस्य चेति दृष्टलिंगादेवेति दृष्टं लिंगादि
येन श्रादिपदेनागमादयो गृह्यंते । अयंभावः ईश्वरस्य हि व्याप्यज्ञानं परामर्शात्मकमपरोक्षरूपं सर्वदास्त्येव ततश्च ततो वह्न्याद्यनुमि
व तिरपि जायेतेऽपरामर्शस्य तत्र रमकारणत्वाभ्युपगमात् न चेश्वरज्ञानं शरीरमनःसंयोगादिसापेक्षमीश्वरज्ञानत्वादेव॰ तथा च त
दीयेव ह्न्य परोक्षे वह्न्यनुमित्यात्मके परोक्षत्वमस्तीति तत्र सोक्षात्वस्य सांकर्यं यद्वा तदीयवह्न्यपरोक्षं वह्न्यनुमितित्वाश्रयः
वह्न्यनुमितिकारणत्वेनाभ्यत्र क्लृप्तेन परामर्शेन समानाधिकरणत्वात् न च परामर्शसमानाधिकरणत्वं वह्न्यनुमितित्वे प्रयोजकं
ननु गङ्गेप्रत्यक्षस्य वह्न्यनुमितित्वेन तथा च वह्न्यसमु परोक्षं वह्न्यनुमितिश्चेति ज्ञानद्वयमेवास्त्विति न सांकर्यमिति वाच्यं एकस्मि॰

युगपदेकजातीयविशेषगुणद्वयसमवायविरोधान्न चानुमितिप्रत्यक्षयोर्भिन्नजातीयत्वादेवाविरोध इति वाच्यं तथापि ज्ञानत्वव्याप्य
जात्या सजातीय[illegible]त्वसत्वात् पूर्वव्याप्तोने लिंगादिधीजन्यत्वमित्यनेनापि विशेषानुपपत्तिरिति लिंगादिधीजन्यत्वमिति न तु परामर्शादिसामा
नाधिकरण्यं तथा सत्येकस्या एव विषयः प्रमाचतुष्टयरूपतापत्तौ सर्वतांत्रिकसंप्रदायविरोधापत्तेः न च सन्याप्ययदादुः श्रीभट्टचरणाः
सिद्धानुगममात्रं हि कार्यं तु परिक्षकैरिति। ननु तथापि योगिज्ञाने परामर्शजन्यत्वमपि स्यात् न च पक्षताजन्यत्वमपि प्रयोजकं
न च पक्षतास्ति योगिप्रत्यक्षस्य सर्वविषयस्य सत्वादिति वाच्यं पक्षतायाः कारणतया यादृपथिसिद्ध्यभानेंत्वादिति चेदत्र ब्रूमः
योगिप्रत्यक्षे परामर्शस्य कारणत्वे मानाभावः यदि परमनुमितिरपि स्यात् कारणसत्वादित्युच्यते तदा न क्षतिस्तावतापि सांकर्या
भावात् न च गुणत्वव्याप्यजात्या सजातीयमेकत्रात्मनि न युगपद्गुणद्वयमिति व्याप्तेर्योगिज्ञानमेकमेव नानाजातीयमिति सां
कर्यापत्तिरिति वाच्यं तावतापि खांडनिकस्येष्टसिद्धेः। इंद्रियसन्निकर्षादिजन्यत्वमादिपदेनेंद्रियत्वेनेंद्रियजन्यत्वं विषयत्वे
नार्थजन्यत्वं च परिगृहीतं। तथा च मास्तु तत्र सांकर्यं पूर्वोक्तं तु वर्ण्णनेन तथा न वापसिद्धांतः ईश्वरस्य सर्वविषयप्रत्यक्षाभावे
वेदप्रामाण्यानुपपत्तिश्चेति यदि च जन्यज्ञानवृत्तिप्रत्यक्षत्वे इंद्रियजन्यत्वं प्रयोजकमित्युच्यते तदा जन्यत्वानुमित्यादौ परामर्श

दिजन्यत्वं प्रयोजकं ननु निसानुमित्यादौ तथापि द्रष्टव्यस्य तथानुमितौ किं प्रमाणमिति चेत् परामर्शनियतज्ञानत्वमेव न वनौ त्रि
कसंप्रदायोल्लंघनं तस्य त्वयापि कृतत्वात् नहि मनःसंयोगाजन्यत्व ज्ञानकरणाजन्यत्वं वा ज्ञानत्वमिंद्रियाजन्यत्वं वा प्रत्यक्षत्वं केनापि
तांत्रिकेन स्वीकृतमिति मूकीभव इति। न केवलं सांकर्यभावात् न सक्षात्वं जातिः किंतु जातिस्वभावनिरूपणेनापि तस्य जातित्वा
नदिति भावो निर्वैरूप्यात इत्याशयवानाह व्यंजकोपाधिनियमाच्चेति व्यंजकमित्यर्थः। उक्तप्रकाराणामिति सविशेषणप्रकाशत्वादीनां
कथितानां बाधात् निरासादित्यर्थः किमिति दृष्टेऽर्थे मया दृष्टं [illegible] तु तकेन चित् कथितमिति संशयः कदाचिज्जायते व्यंजकाग्रहणनिबंधनः
सतस्यानुव्यवसायनिरिक्तस्य साक्षात्त्वव्यंजकस्यानंगीकारे तदुपपादयति प्रागेति प्रागभूतापूर्वोत्पन्ना बुद्धिर्यदा स्मर्यते न तदा तद्विषयकस्य स्मृतिज्ञान
स्य मनःसंयुक्तात्मनि समवायात् स्मृतिरूपेव प्रत्यासत्तिस्तस्या बुद्धेर्मनसा सहत्वमनेन तया प्रत्यासत्त्या पूर्वोपलब्धायां बुद्धौ प्रत्यक्षी
क्रियमाणायां साक्षात्त्वाग्रहात् व्यंजकाभावविनाकथं स्यादिति व्यंजकं स्वीक्रियते तदा न दग्रहात् तत्संशयः संभवति असति तु व्यंजकस्वी
कारे तदग्रहे किं साक्षात्कारदशायां तद्ग्रहणं इति साक्षात्त्वमपि निश्चिनुयादिति संशयानुपपत्तिरित्यर्थः। ननु साक्षात्त्वं न ज्ञानधर्म इति
कृत्सांकर्यं किंतु मेयधर्मस्तद्विषयकतया ज्ञानस्य साक्षात्त्वव्यपदेश इत्याशंक्याह अर्थधर्म इति। साक्षात्त्वं ज्ञानवृत्तिपदार्थांतर

मिति । अष्टादशं लक्षणं शंकते पदार्था इति । कृत्वेति अनिर्णीतान्यत्वादित्याशयः यद्वा क्वचिद्गृहीते हिंसादावव्याप्त्या
दिग्रहः न तु गृहीते तत्राप्यनुमानेन ग्रहे तत्राप्यनुयोगवृत्तिदुरंतपरंपरा अनवस्थानपरंपरैव स्यादित्यर्थः । सप्तमपदार्था नियम
साधनानीति । सप्तमपदार्था नियमगोचराणि प्रमाणानि परिशेषानुमानानि तथा हिंसादावत्वस्य न द्रव्यादित्रिकेऽन्तर्भावः
गुणवृत्तित्वात् नापि सामान्यादित्रिके सामान्ये दोषस्योक्तत्वात् न विशेषे आत्मगुणेऽपि वृत्तेर्नापि समवाये संबंधिशून्यत्वात्
नाप्यभावे प्रतियोग्यनिरूप्यत्वात् न च पदार्थसाधकानीतोऽपराणि संतीत्यपदार्थ एव सः स्यात् पदार्थत्वस्य सप्तविभाजकोपाधि
व्याप्यत्वादिति नन्वेवं वै[illegible]शेषिकमतं अस्माकं नैयायिकानां नानायन्नियम इति चेन्न स्यादेवं यदि प्रमाणं तत्र किंचित्स्यात् निर्वचनं स्या
यदि चाद्वैतश्रुतिविरोधो न स्यादिति । ऊनविंशं लक्षणं शंकते लिंगादिजत्वाभावेति समुदायपदं लिंगादिजत्वान्योन्याभावमादाया
नुमादावतिव्याप्तिवारणाय । परोक्षसंशयादाविति परमाणुर्जगत्कारणं प्रधानं वेति परोक्षसंशयः प्रधानमेव कारणमिति परोक्षभ्रांतिः
सभाने तिस्मृतिरेतास्वतिव्याप्तिरित्यर्थः अपरोक्षेत्युपपत्तिमाशंक्य परोक्षपदमिति क्रमेण विद्यासागरशंकरमिश्रयोरुपव्याख्या
नं संशयस्य साक्षात्वेऽतु त्वं न भावस्यात् नहि परोक्षे लिंगादिजन्यत्वाभावात् अयद्वापरोक्षे इष्टापत्तिरिति तदसत् परोक्षेऽपीष्टापत्तेः

तस्मान्न परोक्षदृ इति न विषयविशेषणं संशयस्यादिः संशयादिरिति संशयकारणत्वेनावश्यं स्वीकार्यायां स्मृतौ न तस्याभानस्य प्रत्यक्ष
रूपासंस्कारात्वप्रत्यासत्तिजन्यत्वात्तया तथात्वानंगीकारादतः परोक्षेत्यस्मरणेत्यतिव्याप्तिरित्यर्थः ग्रंथग्रंथिरिह क्वचित्क्वचिदपि न्यासप्रय
त्नान्मायेत्येवं वक्ष्यमाणत्वात् स्मरणे परोक्षदृत्यनुक्तिः विषयपदं स्रक्चंदनादिपदं परोक्षरूपो यो विषयो तिव्याप्तेरिति वार्थः एवमतिव्याप्तिं परिहर
तोऽतिव्याप्तिमाह न प्रत्यक्षप्रमाया प्रतेरिति प्रमाऽप्रमासाधारणस्यैव साक्षात्त्वस्य लक्षणत्वमिति प्रागोदितत्वात् तस्यालक्षणत्वे परोक्षापरोक्ष
भिन्नज्ञानापत्तिरिति भावः अव्याप्त्यतिव्याप्तिशून्यमपरं लक्षणं शंकते अनुमानादीति अनुमानादीनि च तानि व्यवच्छेद्यानि चेति
कर्मधारय इति विद्यासागरमिश्रा वस्तुतस्तु अनुमानादीनि व्यवच्छेद्यानि प्रसक्तानि विलक्षणतया व्यवस्थाप्यानि येः साधारण
कारणैः परामर्शादिभिरित्यर्थः अन्यथा व्यवच्छेद्यपदस्य पूर्वनिपातापत्तिर्वैयर्थ्यं च व्यवच्छेद्यासाधारणकारणाजन्यत्वाधीरिति
तु वाक्यार्थः अनुमानादिपदं तु स्वरूपकथनमात्रं यद्वा व्यवच्छेद्यत्वं प्रत्यक्षेपीत्यसंभववारणाय अनुमानादिपदं विशेषणमेव ॥ इदं च ल
क्षणमीश्वरप्रत्यक्षस्याप्यक्षीत्यवधेयं ॥ एवं तर्हीति अनुमानाद्यप्यशक्यनिर्वचनं प्रकारांतरेणेति तदपि प्रत्यक्षादिकारणाजन्यत्वेन निर्व
च्यमित्यन्योन्याश्रय इति मिश्रस्यापव्याख्यानं वैपरीत्यमेव कुतो न स्यादिति मूलविरोधात् तेन हि किं किमधीननिरूपणमिति निश्चे

तुमशक्य[illegible]मित्यत्र शब्दस्य निश्चयत्वमेव लक्षणस्योक्तमिति प्रतिभाति तस्मादनिश्चयत्वं लक्षणस्येत्येव ग्रंथार्थः यद्यपि निरुक्तं लक्षणं न धीधर्मत्व १५
रूपं किंतु साधारणकारणाजन्यधीत्वमित्येवमिति वैलक्षण्यान्न वैपरीत्यापादानं संभवति इह हि प्रत्यक्षं च तानि तानि चापराणि उप
मितिशाब्दीस्मरणादीनि तेभ्यो व्यतिरिक्ताधीरनुमानं तथा प्रत्यक्षानुमानशाब्दीस्मरणभिन्नोपमानमित्येव किं न स्यादित्युक्त
मिति प्रतीयते तथापि प्रत्यक्षापदमिह इंद्रियपरं तथा चेंद्रियानुसादृश्यानुपदानुसंस्काराजन्यो व्यतिरिक्तस्तत्तदीयभिन्नाधी
रित्येवार्थः प्रत्यक्षतन्त्रपरेभ्यो व्यतिरिक्तो यस्यादित्यधीविशेषणं व्यर्थं तस्तु जनकत्वमिति न समासानुपपत्तिः प्रत्यक्षासिद्धौ न
व्यतिरिक्तानुमानादिसिद्धिस्तन्नसिद्धौ च न सा तत्र प्रत्यक्षासिद्धिरित्यन्योन्याश्रयोपि दोषो लक्षणे बोध्यः दोषांतरमाह तेषु
व्यवच्छेद्येष्विति एकं द्वयं त्रयं चापि परित्यज्येत्यर्थः इंद्रियाजन्यत्वेनानुगतेनानुमादिषु लिंगसादृश्याजन्यत्वेन प्रत्यक्ष
शब्दयोः शब्दसादृश्यसंस्काराजन्यत्वेन प्रत्यक्षानुमयोर्लिंगसादृश्याजन्यत्वेन प्रत्यक्षस्मरणयोरनुगतबुद्धिव्यपदेशौ स्यातां
लिंगाद्यजन्यत्वेन घटप्रत्यक्षादौ प्रत्यक्षबुद्धिव्यवहारवदिति प्रघट्टकार्थः। ननु निमित्तं नैमित्तिकानुसारि न तु नैमित्तिकं
निमित्तानुसारि घटादौ व्यभिचारदर्शनादिति संकेतेव्यवहारे सतीति यत्र नैमित्तिकं दृष्ट्वा निमित्तं कल्प्यते तत्रास्त्वेवं नत्व

न्यत्रान्यथादर्शनमात्रशरण्यो विचाराभावप्रसंगादिति परिहरति अन्यापन्निरति प्रसक्तिस्तस्यादुर्विमुखेंय न भवति अतिप्रसंगापादकं
व यन्न भवति तदेकल्प्यमित्यर्थः। ननु तन्नैवैकत्वं जनितत्वमनुगतत्वात्तथा व्यवहारं जनयेदेवेति चेत्तत्त्वयेन रूपेण भावात्मना
नुगतं तेन रूपेण जनयेत् ननु विधिरूपेण साक्षात्प्रत्ययव्यवहारौ नु विधिरूपो प्रतियोगिधियं विनापि जायमानो कथं जन
येदित्याशयेनान्येनापीति रूपेणेत्स्तुषज्यते अन्येन विधिरूपेणापीत्यर्थः नाशावसान प्रत्ययव्यवहारयोः प्रतियोगिधीनिर
पेक्षयोरभावविषयत्ववदिहापि स्यादित्याशंक्याह तथात्वेइति विधिमुखेनापि साक्षात्प्रत्ययव्यवहारबाधकत्वादित्यर्थः
परिदृष्टव्यक्तिविशेषान्यत्वेनेति परिदृष्टा ये व्यक्तिविशेषाः खरतुरगमहिषादयस्तदन्यत्वमेव गोत्वमस्तित्याशयः यद्वता
न्नेषामनुगतरूपस्याजात्यात्मनोऽपलापेन तानुभशक्यत्वेपि कतिपयानः स्वज्ञानत्वादिति भावः तेनागोऽपोहो गवाज्ञाने
ऽगोरज्ञानादशक्यग्रहइत्यपास्तमागात्वेनाज्ञानेपि तत्तद्विशेषरूपेणज्ञानानु अथपरिदृष्टया किंचिद्विशेषेभ्योऽन्यत्वं गवी
वघटेप्यस्ति घटोपि दृष्टविशेषस्तन् कथं तदन्यत्वं तत्रेति चेत्तुल्यमिदं गोरपि परिदृष्टविशेष एवेति कथं तदभावस्तत्रेति चेन्नास्ति गवि
गोरितिबुद्धिसा खराद्यन्यत्वे विषयीकरोति तत्र यावन्तु खराद्यन्यत्वं तानुभशक्यमिति परिदृष्टेति वदति परिदृष्टानां च यावतामन्यत्वविव

श्रितमतो घटो न गोपरिदृष्टविशेषश्च यद्यपि सत्तथापि तन्नेदन्त्वेनावाधितं तदन्यपरिदृष्टभेदोऽवाधितो विषयद्वैतस्फुरत्सर्थः तस्मा
द्यथा नत्राज्ञातत्वरादेरपि गोप्रत्ययादतिरिक्तसिद्धिस्तथाज्ञातलिंगादेरपि साक्षात्प्रत्ययादनतिरिक्तसिद्धिरित्याशयः । यस्माद्द्विविधमुक्त
प्रत्ययोन्यव्यावृत्त्या न शक्यः कर्तुं साहित्र्यभावमववहारस्येव हेतुस्तस्मादित्युत्तरश्लोकापेक्षितेन पूरयनि विधिजः भावजः प्रत्य
प्रत्येयोन्यः व्यावृत्तिगोचरात् प्रत्ययादन्यः हेतुभावात् व्यभिचारकेति न विद्यते व्यतिरेकेण समर्थनायस्य सत्तथान्यव्यक्तिविषयत्वे
न नशक्यते समर्थयितुमुपपादयितुमित्यर्थः । किमन्यापोहवादिना इति नतत्सिद्धश्चागोरपोह्येत गोनिषेधात्मकश्च सः नत्रागोरे
व वक्तव्यो न न्यायः प्रतिषिध्यते । गव्यसिद्धेऽप्यगो नास्ति तदभावेन तु गोः कुतः इत्येवं पादेः कथित इतरेतराश्रयस्तदापि स्यादिति भावः ॥
एकविंशं लक्षणमाह शब्देत्यादि प्रागुक्तपर[illegible]स्पराश्रयः प्रत्येकमिलितविकल्पदोषाज्ञानं व्यतिरेकप्रत्ययस्य विधित्वाभिमानो वाल्लुक्का
कारणं प्रान्तं तथापि चेन्निर्लज्जः कोऽपि विलक्षणवक्तीत्यर्थः प्रत्येकमिति शब्दजप्रतीतिव्यतिरिक्तप्रमितित्वं अनुमानजप्रतीतिव्यतिरि
क्तप्रमितित्वमित्येवं न चात्र प्रतीतिपरं व्यर्थं शब्दजप्रतीतित्वेन साहूलजातेरेवमन्यत्राप्यनुमितित्वोपमितित्वयोरेव विवक्षात्वात्
व्यभिचारादिति अतिव्याप्तेरित्यर्थः । मिलितानां निषेध इति यद्यप्येव[illegible]ल्लितं लक्षणं न स्यादिति मिलितपक्षानुप

२३१

231

पत्तिः तथापि शक्तत्वादित्रिकं साक्षात्त्वं परंपरया वेति विकल्पनीयमिति भावः। न हि प्रत्येकमिति प्रत्येकं स्वप्रतियोगिकाभ
मिलितप्रतियोगिकभेदभावात् अन्यथा प्रत्येकं मिलितात्मकं स्यादित्यर्थः। मिलितास्त्वनुमित्यादिष्विति न हि मिलिता अनुमि
त्यादयः प्रत्येकात्मकाः अपि तु प्रत्येकरूपा अनुमितित्वादेः प्रत्येकविश्रान्तत्वेन मिलितास्वभावेन प्रत्येकं तत्तद्धर्मावच्छिन्नप्रति
योगिताकस्यादित्यर्थः। मिलितास्त्वनुमित्यो भाव एवं मिलितेष्वेवेति मिलितास्वनिव्याप्तिरित्यर्थः। एकत्वे सति अभावसमुदायवती
प्रमेति विवक्षणात्ऽनवकाशयात्मिमिति। अत्रापि समुदायस्यैकत्वादेकाश्रितत्वानपाय इत्याशयेन दूषयति समुदायिभेदेपीति समु
दायिनामनुमितिज्ञानशब्दज्ञानादीनां नानात्वेपीत्यर्थः। ननु समुदायो नैकत्वाश्रयः अद्रव्यत्वादिति चेत् प्रसक्षमपि नैकगुणत्वादित्यसं
भवि प्रत्यक्षलक्षणं स्यात् त्वत्यादिसंख्यावैधुर्यात्तत्रैकत्वोपचार इति चेत्तुल्यं समुदायेपीत्याह एकोपचारेति। समुदायः समुदायत्वविशिष्ट
इत्येकोर्थः। स च समुदायत्वविशिष्टो न भवत्यात्माश्रयापत्तेरिति तद्भिन्नत्वसत्वादतिव्याप्तितादवस्थ्यमित्याह न समुदाय
त्वविशिष्ट एवेति सम्प्रभ्यं नमिदं। ज्ञानस्यैव मिति एवमुक्तविशेषणवत्त्वमित्यर्थः। न च समुदाये ज्ञानत्वमस्तीति भावः।
विशिष्टस्यापी समुदायत्वविशिष्टेप्यनुमित्यादौ ज्ञानत्वसत्वादित्यर्थः। यद्यपि ज्ञानत्वविशिष्टो न समुदायः किंतु समुदा

यीतत्र चसमुदायत्वं नास्तिनवाऽभाववत्रयंतथाचकथमतिव्याप्तिसंभावनातथापिसमुदायसमुदायिनोर्भेदाभेदाभ्युपगमाद्दयंदोषः।
यथालौकिकधर्मावच्छिन्नावृक्षावनमित्युच्यतेतथानुमित्यादयःएकधर्मावच्छिन्नाएवसमुदायशब्दभाजः।सचधर्मएकोऽधिकोवा
एकाश्रितत्वयशो——समूहालंबनबुद्धिर्वेतिभावः।एकाश्रयाणामितिलक्षणगतमेकपदंविकल्पयति एकेतिचेति।व्यक्त्यात्मनोऽभेदसं
तिघटपृत्थयोभेदाश्रयवृत्त्यभावसमुदायस्यलक्षणत्वेघटपृत्त्वदोऽतिव्याप्तिरित्यर्थः।धर्मिणालक्ष्यस्येत्यर्थः आश्रयभेदोपलक्षणेत्व
इतिउपलक्षणस्योपलक्ष्यवहिर्भूतत्वात्तत्तापलक्ष्यभावत्रयमेवलक्षणंस्यात् तथाचानुमित्यादावपीत्युक्तदोषापत्तिरित्यर्थः एक
जातीयाश्रयाणामभावानांलक्षणत्वमितिपक्षेदूषणमाह यथाजात्याप्रत्य——नैकजात्यंव्यक्तीनांतदेवलक्षणमस्त्वित्याह
द्वितीयेत्विति।ननुतदेवेत्यनुधावनेकतोमदुक्तस्यापिलक्षणत्वसंभवादित्याशंक्याहावश्यंतयाद्युतिश्रवश्यंभाविनेत्यर्थः।
धयुपाधिर्यःकश्चनतदाहपरोक्षेतिप्रत्यक्षत्वातंनिष्ठस्योपाधित्वेतदेवलक्षणस्यात्त्वचतदस्तीतिभावः।परोक्षप्रमितित्वस्य
तिपरोक्षप्रमितित्वमनुमित्यादिव्यक्तिष्वस्तिअस्तिचाभावत्रयेमिलितानाद्वित्यर्थः नचमिलितास्वनप्रतित्वं।ज्ञानत्ववन्
त्वेनूसत्वादितिभावः।वैशेषिकपक्षद्रुसस्यगुणनयेतितन्मतेगुणेगुणाभावादित्यर्थः तथाचासंभवइतिभावः मीमांसक

मनेत्वाहभावेदेनि । तथात्वादित्ति एकत्वादित्यर्थः समुदायोपेक्षयाचसमुदायिनिपौर्णमास्यांपौर्णमास्यायजेतेत्यादावेकव
चप्रयोगोदृष्टः सेनावलमितिचहस्त्यश्वादौवृन्दे चेति । तत्रैवेतिनदिनरात्रवृत्तित्वसत्तिनवृत्तित्वमित्यर्थः अथ द्व्यादेः संख्याया
वृत्तिसंबंधः समवाय एव स चान्यत्राप्यस्त्येवेत्यसंभव इतिचेन्नाधावतायाद्वित्वविशिष्टसमवायस्यवातथात्वात् नह्येको
द्वौत्रयोवाद्वावितिकदाचित्प्रत्ययः एकोहिद्वित्वाश्रयइतिप्रतीतेद्वित्वसमवायित्वमात्रंविषयइतिनदोषः एतेन पर्याप्तिः स्वरूपसंबं
धविशेषः स्वचनाधिकइतिप्रलापः । वस्तुतस्तुद्वावितिद्विधानिःप्रकारप्रतीतिविषयत्वमेववृत्तिशब्देनविवक्षितं तत्तुनैकस्यव्यक्तेरिति
द्विमात्रंवृत्तिर्व्यावृत्तिविशेषोवानत्रयः एकोवाकिंतुकिंतुद्वावितिप्रसंगतेद्वित्वस्यवैशिष्ट्यमितितुनतत्वं । फलितमाहनइतियथेद्वित्वंव
र्त्ततेनयोर्द्वयोरप्येकत्वसंख्यावत्वात् एकश्यांव्यक्तौद्वित्वादेरपिपरिसमाप्तिरितिद्वित्वादिपरिसमाप्त्यभावलक्षणैकशब्दार्थाभावा
देकाश्रयाणामभावानामभावेनलक्षणासंभवेविशेषाभावइत्यर्थः एकव्यक्तिगतेनि एकत्वंहि नानातथाचएकमेकत्वमेकव्य
क्तावेवव्यस्तंनरत्वेकत्वांतरमेवातएकत्वसंख्याव्यक्तिमत्यामेवद्वित्वस्यनसमाप्तिर्व्यक्त्यंतरेपितस्याद्वित्वव्यक्तेर्वर्त्तमानत्वादिति
नलक्षणासंभवइत्याशयः । एकत्वस्यप्रतिव्यक्तिभेदस्यादेवनेमनोरथसिद्धिः सएवतुनास्ति अबाधितैककारानुगतप्रतीतेः सत्त्वा

वन्नस्याप्येकत्वादित्याशयेनाह सत्ताव्यक्तेर्पीति एवं भावप्रसंगात् प्रतिव्यक्तिभेदप्रसंगात् दोषांतरमाह अननुगतत्वप्रसंगाद्वे
ति । तथा च व्यक्तिस्वरूपमेव सत्तास्या तन्नातिरिक्ताप्रमाणाभावादिति भावः एकत्वस्य प्रतिव्यक्तिभेदे च दोषांतरमाह अन
नुगतत्वापत्तेरिति तथा चैको घटः एकः पट इत्यनुगतप्रतीतिव्यवहारो निर्विषयौ स्याता मिति तु विद्यासागरस्याप व्या
ख्यानं नानेकत्वे स्तु एकजातेः सत्वेन तदुभयोपपत्तेः तथा सति उक्तग्रंथेन एकत्वाननुगमदोषस्यापि परिहृतत्वमुचितत्वात्
दृष्टापत्तिरेव तत्र परिहार इति चेत्त प्रतीतिव्यवहारयोर्निर्विषयत्वापत्तिदोषस्य सत्वात् एकत्वे हेतुमाह जातिरूपेति धर्मिग्रा
हकमानसिद्धं तस्या एकत्वमिति भावः । परिहसति नूनमिति विप्रलब्धोसि वंचितोसीत्यर्थः ननु युक्त्या तयापन्नोयमर्थः यानि कानि
चिदक्षराणीति । सत्ताजातिरेकत्वे गुणवृत्तित्वे युक्तिकान्यक्षराणि ननु वाक्यानि अयोग्यपदार्थ कत्वात् प्रलपति अनर्थकं वचः त्वदुक्ता
यसि वैशेषिका दिति बहुवचनेन तेषां वाक्येषु परस्परसंवादगृहीतवानसि त्वं त्वेकः एकवचनोक्त्या ऽन्येन केनापि त्वत्तुल्यबुद्धिना न संश
गतोसीति भावः तथा च सत्वेव एकत्वमपि जातिरेवेत्याक्षेपार्थः द्वयोर्जातित्वे शंकर्य्यं बाधकमित्याशंकते सत्तानैकत्वयोरिति सत्ता
यां सत्तापरिहारे नैकत्वमस्तीति न सत्ता व्यापिका एकत्व परिहारेणाप्येकत्वे सत्ताया वृत्तेर्नैकत्वं व्यापकमिति तयोर्द्वे शांकर्य्यं

स्यादित्यर्थः। पाण्यादितित्तर्हि उभयोरपि गुणत्वमस्तु न तु सत्ताजातिरेकत्वं गुण इति सत्ताया जातित्वेपि एकत्वेन शांकर्य्यं बाधकं न तस्य
गुणानिर्ण्णया तु सत्ताजातिरेकत्वं गुण इति वैशेषिकप्रसिद्धेः प्रमाभूतस्यैतल्लोकप्रसिद्धेश्चाभावात् परापरभावानुपपन्नेस्तुल्यत्वान्न्या
यसाम्यामित्यर्थः। वस्तुतस्तु सत्वैकत्वे जाती अनुगतप्रत्ययविषयत्वे सति बाधकाभावात् परापरभावापन्ने च समानाधिकरणजा
तित्वात् द्रव्यत्वपृथिवीत्ववदित्यनुमानमेव परापरध्वौव्यमित्याह जातिपरापरेति अत्रानुपलब्धिविशेषं शंकते कूतथेति अनु
पलब्धिमात्रं न बाधकं किंतु योग्यतासहितं न चानुमेयितदस्तीति सदृष्टांतं परिहरति शैलेऽनलानुमायामिशैलेऽनलः
कितस्मिमात्रदेशवर्त्तेते हस्तपरिमितिदेशे वा इति निश्चयाभावेपि यथाऽनुमानदुष्टातथेयमपि परापरभावनियमानिश्चितन्नू
नस्थूलस्य इदं नूनना स्थलमिति निश्चयेपि न दुष्टा इत्यर्थः इदंतु परमतमनुसृत्योक्तं मस्माकंतु न शांकर्य्यं दोष इत्येव
नत्वेन चैवमेकत्वस्य जातित्वेऽसमवायिकारणाभावाद्वित्वानुत्पत्तिप्रसंग इति वाच्यं तथा गुण एवासमवायिकारणमिति
ननियमः कर्मणापि तथात्वदर्शनान्नथा गुणकर्मणोरेवत्वापि न जातेरपि तथात्वदर्शनादिति जातिरप्येकत्वं तथा स्यात्
न चैवं नित्यद्रव्याणामेकत्वेनासमवायिकारणेन द्वित्वाद्युत्पादः सार्वदिकः स्यादिति वाच्यं अपेक्षाबुद्धिरूपकारण

४ इदं तु परस्याप्रतिभासंपादनायोक्तं वस्तुत एकत्वाधिकरणे सत्तासामानसत्ताधिकरणमिति सत्ताया नूनवृत्तित्वेनागराहरणे सन्नैव
न च जातो जातिर्वृत्तिरपि ४

स्याप्यपेक्षणात् किंच यस्मिन् कार्ये ऽसमवायिकारणस्यान्वयव्यतिरेकौ तत्रैव तत्कारणमिति समवायिकारणाभावेऽपि द्वित्वादिकं जायत
इत्येवं नत्वमिति मासीदिति माभूदित्यतः। एकत्वविशेषणानंगीकारेणैव प्रत्यक्षलक्षणमाह द्वित्वादीति आदिपदेन त्रित्वस्य परिग्रहः।
अनुमित्यादिद्वये ऽभावत्रयवृत्तिव्याप्तेर्वारणाय द्वित्वपदं अनुमित्यादित्रये ऽतिव्याप्ति वारणाय आदिपदं अन्यापेक्षेति तथा चानुमित्यादिनिष्ठा
त्रित्वव्याप्तिस्तत्रैव समाप्तेति भावः। कस्याश्चिदिति एकस्या अपि व्याप्तिरन्यनिष्ठायास्तत्राभावे त्रित्वपरि समाप्तिसत्त्वादिवेत्यर्थः
अव्यापकतामेवमुत्पादयति प्रत्यक्षत्वस्य चेति तथा च शरीरपरित्यागेन रोगपरिहारवदयमतिव्याप्तिपरिहारः प्रत्यक्षलक्ष
णस्यासंभवतीत्याशयः। वैशेषिकमतमनुसृत्येतेन वैशेषिकमतमुपेक्षाम। ननु मित्यादयस्त्रय इति प्रतीतेस्तत्र त्रित्वं समाप्य
त एवेत्याशंक्याह त्रित्वपरिच्छित्तेस्त्रित्वांतरं भवदपीति यद्यपि भवति तथापि न तत्र स माप्यते आश्रयांतरमादायैव वर्त
मानत्वात् तच्चाप्रथमत्रित्ववच्छिन्नेऽनुमित्यादित्रयेऽतिव्याप्तिरेवेत्यर्थः। अन्यथा सिद्धिप्रतीतवलात् प्रत्यक्षप्रमितिषु
गुणेष्वपि त्रित्वमभ्युपेयमित्यर्थः प्रतीतिमेवाह अत्र यथेति इदमुपलक्षणमनुमित्यादिष्वपि त्रित्वाभ्युपगमस्यातिव्याप्तिपरि
हारायत्तयाकृतत्वात्। ननु चानुमित्यादिषु परिसमाप्तमेव प्रथमत्रित्वमिति कुतोऽतिव्याप्तिरित्यत आह यत्र चेति धर्मिमात्रेनातिव्याप्ति

रुक्ता किंतु त्रित्वावच्छिन्ने नत्र च त्रित्वमपरिमितमात्रमेव स्वविशिष्टे स्ववृत्त्यभावात् । उपसंहरति तस्मादिति यस्मादनवच्छिन्ने अनुमित्या
दावतिव्याप्तिर्नोच्यते किंतु विच्छिन्ने एव तत्तस्मादित्यर्थः ॥ वक्तुमशक्यत्वमिति इतरद्वयाभावस्य सत्त्वेपि त्वाभावासत्त्वा
दित्यर्थः । नहीति अभावत्रयस्यापि प्रमात्वापत्तेरिति भावः । तेषां धर्मिनामिति दंडी पुरुष इत्यत्र पुरुषत्वं दंडे अ
वर्तमानमपि विशेषणाश्रयदेवदत्तादेः पुरुषत्वमिवेति भावः । लक्षणस्वरूपमाह नद्यत्रास्ति उक्ताभावत्रयवत्
प्रमितित्वं प्रत्यक्षादिमित्यर्थः । एवमतिव्याप्तिपरिहारेप्यसंभवः स्यादिति नेति भिन्नभिन्नधर्मी न त्वेको धर्मः तथा चाभा
वत्रयप्रमिति द्वयोर्वैयधिकरण्यां लक्षणस्यासंभव इत्यर्थः । अवश्यमिति प्रमात्वस्य कादाचित्कत्वानुपपत्तेरूपाऽर्था
पत्तिः सूचिता । प्रमितिः सर्वस्यादिति शुक्तिरजतज्ञानस्यापि प्रमा स्यान्न घटादिर्वा प्रमा स्यादित्यर्थः विपक्षे दंडमाह
नवा काचिदपीति अनियामकपदोक्तमर्थमन्यत्राप्यनुसंधातुं श्लोके नीलवद्भ्रांतिः सर्वेति अन्यानपेक्षया नियमस्वी
क्रियमाने सर्वत्र सत्ता असत्ता वा स्यादिति संबंधः नियामकाभावे काचित्कत्वाभावः कुत इत्याकांक्षायामाह निय
मकाद्धीति अंकुरत्वादीनां बीजोद्भवादिनियामकादेव काचित्कत्वमित्यर्थः तन्नियामकं यथार्थानुभवत्वादिकमु

च्यं ते चेत्तदापि प्रभाव्यक्तीनां विशेषणानुपलक्षणं वा तदेवाभावत्रयस्यापीति तदेवाभावत्रयस्याप्यापात्रय विशेष
णत्वयायामकमित्यर्थः धर्मविशिष्टभेदेपि यथा दंडदंडलयोरैवदत्तरूपविशेष्यस्यैक्यादैक्याधिकरण्यं तथा नियामक
धर्मविशिष्टस्य भेदेपि प्रसक्तधर्मिण एकत्वादैक्याधिकरण्यमिति शंकते धर्मिण एकत्वादिति उपलक्षितवृत्तिप्रमाल
स्य चित्त्वावच्छिन्नावृत्तित्वया नातिव्याप्तिरिति शंकते तथापीति उपलक्षितव्यक्तिस्वरूपस्यैवावच्छेदाद्वैक्यमिति परि
हरति नोक्तमत्रेति यद्यपि यस्य तद्विशेषणं तदेवोपलक्षितं तथापि विशिष्टरूपेण नोपलक्षितम तो विशिष्टोपलक्षि
तयोरैक्यानुपपत्तिस्तथा त्वे विशेषणे नाप्यभेदप्रसंगादुपलक्षितस्येति शंकते तथापीति । स्वरूपेणोपलक्षितस्य विशिष्ट
भेदेपि न भवतीत्यन्यथा तत्स्वरूपस्य भेदप्रसंगात् तदभिप्रायेण परिहरति नोपलक्षीति उपलक्षितं मा भूदित्यर्थः यथोपलक्षण
तायां वैशिष्ट्यात्रावच्छेदकं तथा तदभावोपि नावच्छेदक इति निगर्वः । अन्यथेति प्रमितित्वस्याभावत्रयस्य च भिन्नभिन्नाव
च्छेदे नैव वृत्तावित्यर्थः । प्रकृतेपीति प्रसक्तेपीत्यर्थः । तथा चासंभवस्यादिति भावः । संतउद्वेगच्छंतो येपल्लवाः किशलयानि
तेषां पतनं स्फोटनमेव तत्क्रीडते नेत्यर्थः पल्लवपतनं विलसितेनेति केचित्पठंति तत्रायमर्थः तत्र संतो मायंतो ये पल्लवाः

पद्विविशेषास्तत्पीपतनेयत्नामाकारेणगमनविशेषस्तद्वक्रीडतेनेतिलक्षणस्यानुपयुक्तत्वेभट्टसम्मतिमप्याहएतदेवेति। लक्षणस्यानुपयु
क्तत्वं परामृश्य विचार्यमिदं। तत्रत्यं प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलंभनत्वादिति सूत्रे प्रत्यक्षमित्यंतं
केचित्तु प्रत्यक्षलक्षणपरतया व्याख्यातं तद्दूषितं भट्टाचार्यैर्धर्मं प्रति प्रत्यक्षस्य निमित्तत्वं प्रमाणत्वं नास्तीति वक्तव्ये प्रत्यक्षलक्षणाभि
धानं केनांशेनोपयुज्यते चोदनैव धर्मे प्रमाणं प्रमाणमेव चोदनेति प्रतिज्ञाते ऽ शब्दे प्रत्यक्षलक्षणाभिधानं कुत्रोपयुज्यत इत्येतत्
परमेव वार्त्तिकं कथमेवत्तु चाने एतदेवेत्याशंक्याह त्याभिप्रायेणोक्तमपि तदिति यद्यपि प्रत्यक्षलक्षणस्यैव देशना लक्षणे धर्म इत्येतत्
सूत्रप्रतिपाद्यर्थेनुपयोग उक्तो न लक्षणमात्रस्य नैवोपयोगस्तामान्याभावस्तथापि लक्षणस्याभिधानं त्वेतिसामान्यशब्दप्रयोगान्नसा
मान्यपरत्वापरित्यागेनैव विशेषो योज्य मिति भावः। यद्यपि प्रत्यक्षखंडनेनैवानुमानादेरपि खंडनं भवति तस्य वाप्त्यादिप्रत्यक्षानुप
जीवित्वात्तथापि विशेषतस्तत्खंडनेन तत्प्रामाण्याशंका मंदमतेर्न निवर्त्तत इत्यतः किं वानुमानादिप्रामाण्यान्यथानुपपत्त्यैव प्र
त्यक्षप्रामाण्यमस्तीत्याशंका निराकरणाय तत्प्रामाण्यनिराकरणं प्रस्तौति वस्तुतो द्वपादस्य क्रमेण यानि सूत्राणि प्रत्यक्षादिलक्ष
णपराणि तेषामादिसूत्रं तद्दूषयित्वा द्वितीयसूत्रं दूषणाय प्रस्तावोयं। अनुमानशब्दो हि भावव्युत्पन्नः करणव्युत्पन्नश्च तत्र यदि करण

मभिप्रेत्य प्रश्नः करणत्वं उ ने नैव तत्फलमपि एवं डितं भवतीत्याशयेन तत्र करणं शृंखि णि साध्यायेन तद्योतकस्य न्याय वार्त्तिक
कृतो मतमुपन्यस्यति लिंगपरामर्श इति सौषुप्तिकसुखपरामर्शवारणाय लिंगस्येति विद्यासागरस्तन्न नैयायिकैस्तदनंगीकारात् तद्या
वर्त्तनानौचित्यात् परामर्शशब्दस्य ज्ञानमात्रवाचितया अव्यवधानेन करणानतिरिक्तेपदस्थानादावतिव्याप्तेर्वारणाय तु । पक्षधर्मत्वं व्यापक
स्यापि अस्तीत्यत आह पक्षस्येति विद्यासागरस्तन्न तथापि तदनुद्धारात् स्वस्यापि स्वव्याप्यत्वात् व्यापकन्यूनवृत्तित्वेनापि विशेषणीयत्वाभ
तिचेन्न सम अव्याप्तपरामर्शाद्व्यापकतापत्तेः पक्षतावच्छेदकवारणाय व्याप्तस्येति नु नत्वं । पक्षधर्मत्वं संदिग्धासाध्यधर्मा पक्षस्तद्धर्मत्वं
तत्रेति दूरत्वदशायां संदिग्धवह्नेः सन्निकर्षदशायां प्रत्यक्षेणो निश्चये धूमोयं वह्निव्याप्य इति निश्चये ऽतिव्याप्तिरित्यर्थः लिंगपरामर्श
स्तन्नानुमितिस्वरूपयोग्यमेव अनुमित्यनुत्पादश्चासिद्धसाधनादिति चेन्न लिंगपरामर्शस्य चरमकारणत्वादिति मिश्रास्तन्न तथापि च
मकारणत्वात्तेः सर्वेत्तरभाविनः भूतकारणानपेक्षित्वमेव हि चरमत्वमिति चेन्नास्ति उद्धसाधनं हि पक्षतां विहन्ति सा च संदेहघटिता
स्येव तन्नु यमित्यापन्नेरनुमितिकरणं स्यादित्यर्थः । अथ न निश्चयेन संशयस्य नाशात् तन्नत्स्योपलक्षणत्वं यत्र वर्त्तमानस्तत्रोपलक्षणं
भवत्येवेत्याशयेनाह तस्य वर्त्तमानस्येति उपलक्षणत्वमिति शेषः तथा च वर्त्तमानसंदेहोपलक्षितधर्मित्वं पक्षत्वं लिंगत्वमित्यर्थः

अत एवेति वक्ष्यमाणं निर्दिष्टमेव कथयति अवर्त्तमानस्येति कुहणात्तत्रस्य वर्त्तमानेनानुपलक्षणादर्शनादिति भा
वः । ननु भवतु वर्त्तमानस्यानुपलक्षणत्वं लक्षणं घटकस्तु संदेहो वर्त्तमान एवोपलक्षणं न भिं चेदत्रैवं तथापि वि
शेषणत्वपक्षे वर्त्तमानो धाजगरमुखपतितस्य तस्य नष्ट इति निस्तारो नास्तीति । धर्मिनाशवदिति यथा हि धर्मिविशेष्यका
प्रवृत्ति धर्मिनाशेनोत्पद्यते तथानुमित्यंशे संशयस्य नाशे पक्षस्य नाशे दंडनाशे वदवश्यं भावित्वमनुमितिवह्नेस्तत्र प्रवृत्तिर्निरस्या दंडनाश
दन्यत्र तत्तानादन्यत्र प्रवृत्ताववति प्रसंगात् समानविषयत्वेनैव तत्त्वानप्रवृत्तौ कार्यकारणभावादिति भावः । ननु विशिष्टस्य पक्षत्वेपि
तत्त्वं मा भूत् मा विशेष्यमात्रे साध्यासिद्धिस्तस्य चावस्थानादनुमितवह्निस्तत्र प्रवर्त्तेनेन चान्यथ मीदन्यत्र साध्यासिद्धावतिप्रसंगो विशिष्टध
र्मिस्य विशेष्यसाधकस्य त्वनियमस्याभ्युपगमादित्याशंकते पक्षधर्मादिनिर्दृष्टशामितिपक्षाधिकरणकं साधनं तद्देशधर्मिमात्राधिक
रणकं साध्यमित्यात्मकं विशेष्यं विशिष्टेप्यस्तीति विशिष्टवृत्तेर्विशेष्येपि सत्वानुसाध्यस्य साधनसामानाधिकरण्यं नादृशवेयधि
करण्येपि न सत्वमभिष्टमेवेति एवकारेण विशिष्टमादाय सामानाधिकरण्यस्य व्याधित्तत्वेन नानिष्टमिति निरूपयंति अयमाशयः नह्यनुमि
तिकाले संशयोस्तितस्य साधननिश्चयेन नाशात् न च साधननिश्चयकालेपि कथं संशय इति वाच्यं तत्प्राक्कालोत्पन्नस्य संभवात् यद्य
प्येवमपि कथं संशयविशिष्टसाधनस्य वृत्तिः संशये तस्य वृत्त्यसंभवात्तथापि संशयस्य कालोपाधितया साधनाधिकरणताजन्यमात्र

स्यकालोपाधित्वादित्याशयः पूर्वोक्तमिति साध्यविषयत्वसामान्येव्याप्तिवलायाने तत्र साध्यविशेषासिद्धिरपि सामान्यप्रतीत्यपर्यवसाना
देवेति सामान्यविशेषसिद्धयनुपयोगीनी पक्षधर्मतालये पूर्वं परार्थानुमान एव हेतुरिति नानुमितिहेतुमात्रे निवेशनीया तथा च स्वार्था
नुमानाव्यापकमिदं लक्षणं । स्वार्थानुमाने संशयात्मकपक्षतायाव्यभिचारज्ञापनायागमेनेत्यादि ध्यानानूत्यनुप्रत्यक्षलक्षणेतेन
ध्यानस्य प्रमाकरणत्वाभावात् नेन त्रिविधेति नानुपपन्नं प्रमाणानां संप्लवः संकरः । एतेन निर्दुष्टापि व्यापकं तनूपरामर्श इति प्रसंगा
दिति योग्यतायानिश्चयदशायां मपि संभवात्तस्या यावद्व्यभावित्वात् अन्यथा कालांतरेनत्रैव संशयो न जायेत किं च संशययो
ग्यतायदिति निश्चयः कालेनिवृत्तिनदा तिव्याप्तिः न तिष्ठति चेन्न दाशात् ज्ञानानंतरमनुमानं तस्यात्र तन्निश्चीत योगमं तद्वा इति
श्रुति विरोध इति भावः पक्षधर्मतायाः अनंगत्वप्रदर्शनेन साधकबाधकमानाभावक रूपा संशययोग्यतापक्षेनेसपि निरस्तं
यद्वा साधकमाने सत्यपि मननदर्शनेनैतेन तु पदार्थ इति मिश्राः अस्तु तर्हि लिंगपदं व्याप्यपरं लक्षणे इत्याशंकते व्याप्यत्वमिति
अगृहीतव्याप्तिनेति अगृहीतव्याप्तियेन तेन पुरुषेण योयं धूम इति परामर्शस्तस्य संग्रह इत्यर्थः तृतीयार्थः कर्तृत्वं तद्वा अयत्नमात्रपरं ।
व्याप्युल्लेखिनइति व्याप्तिरितिज्ञानस्येत्यर्थः ननु नास्य व्याप्यो विषयः किंतु तद्गतो धर्म एवेत्याशंक्याह तस्यापि व्यापकाग्राहित्वात् धूम

१० हीति॰ व्याप्यस्य व्यहत्त्वमिदं प्रतियोगिविधया व्यापकविषयमेवेति भावः। विशेषतइति॰ समूहालंबनेन व्यापकं विशेषणरूपेण ज्ञायते न तु प्रकारमर्शे व्यापकाभावरूपे

निष्ठवह्निसामानाधिकरण्यं वह्निसामानाधिकरण्यधूमत्वं वा व्याप्तिरुभयत्रापि व्याप्यो भासत एवेति तथापि व्याप्यतयाभानं नेद
मिति चेन्न कोऽर्थः व्याप्तिप्रकारकं व्याप्यं भानं नेति चेत् तदुत्तरं ज्ञानस्य तथाविधस्यापि संभवात् व्याप्तिमुल्लिखत इत्यत्र धूमो
ग्निव्याप्य इत्येवं व्याप्तिं गृह्णतः प्रमाणस्यास्यैव तथात्वमित्येववार्थः। द्वितीयलिंगपरामर्शोनुमानं तृतीयलिंगपरामर्शोऽनुमा
नमित्यर्थः। अत एवेत्युक्तं हेतुमेव कथयति धारावाहिनीति दोषांतरमाह गृहीतव्याप्तिनाचेति चकारोनुमानत्वप्रसंगाद्वै सेव
योजनीयः सिद्धसाधनवदिति सिद्धसाधनस्य हेतो र्यथापक्षधर्मतानास्ति तथेत्यर्थः प्रमाणांतरेण साध्यनिश्चयेपि मननत्वदर्शि
नान्नायं इत्याशयेनाह स्वार्थानुमानइति अनुमानमात्रस्येति लक्षणानुमानविशेषस्येति दूषणे सत्येव तत्रेष्टापत्तेर्दूषणांतरमाह
साक्षात्वेति व्यापकधर्मविशिष्टधर्मिज्ञानस्यंद्रियान्वयव्यतिरेकवतः साक्षात्वाल्लिंगजन्यत्वेन परोक्षत्वात् साक्षात्वासाक्षात्वयोर्विरोधां
योर्विरुद्धयोरापत्तेः साक्षात्वपरोक्षत्वयोः सांकर्यापत्तेरिति तु विद्यासागरः। अव्यापकेतिव्यापकाविषयत्वे तिव्याप्यपरामर्शोऽनुमान
मित्यर्थः। यथाश्रुति समूहालंबनेपि अव्यापकस्य धूमधूमत्वादिविषयत्वान्न तस्य वारणं स्यात् एवं सत्यसंभव एव स्यादित्याह व्याप्येति
व्यापकाविषयत्वेपि कथं न व्याप्यविषयत्वं तयोरन्यत्वादित्याशंक्य ज्ञानस्याकारं प्रदर्शयन् व्यापकविषयतां प्रदर्शयति व्याप्यं नैव तस्य

भानमिति। नासंभव इति भावः। अग्निधूमावित्याद्याप्तवाक्याज्जायमानव्याप्तिग्रहस्य पुंसो व्याप्यपरामर्शोऽनुमानं स्यादिति द्यो
जनात्तनूपरामर्शस्य विशेषाविषयत्वादिति भावः। यदि च कश्चिद्वाक्यजन्ये तु विशेषाविषयत्वे च सति व्याप्यपरामर्शो न मान
मित्याचक्षीत तत्रे प्रत्याह पूर्वमिति गृहीतसाहचर्यस्य विचारवशाज्जायमानव्याप्तिग्रहस्य परामर्शोऽनुमानं स्यात् गृहीतधूमसह २
चारोऽप्यगृहीतव्याप्तिको यदा एवं विचारयति यदि धूमो वह्निं व्यभिचरेत्तदा भूयः स्वस्थानेषु वह्निसाहचर्यं नोपपद्यते इति तदा
व्याप्तिस्मृत्या नितलस्य यः परामर्शो नूनं धूमो वह्निव्याप्य इति सोऽप्यनुमानं स्यात् न चेष्टापत्तिस्तेन हि कीदृश्यनुमितिर्जननीया
न धर्मिविशेष्यका कस्यचिद्धर्मिणोऽनुपस्थितेः नापि वह्निविशेष्यकं तादृशानुमितेरननुभवात् निष्प्रयोजकत्वाच्चेति भावः।
ननु तर्हि उभयत्रापि अवश्यं व्यापकोऽभासिष्ट तद्रूपाशंक्याह वह्निधूमाग्रहणकाले जायमानं यः परामर्श इत्यन्वयः। विशेषत इति
विचारेणाप्तोपदेशाभ्यां जायमानस्य ज्ञानस्य परोक्षत्वया विशेषविषयत्वं न्नातितेन व्याप्यविशेषविषयपरामर्शत्वमनुमानत्वमिति तल
क्षणमित्यर्थः तथा चायं धूमो वह्निव्याप्य इति परामर्शोऽनुमानमिति लक्षणनिष्कर्षः। अव्यापकत्वप्रसंगं स्फुटयति एकव्यक्तीति
पर्वततनिष्ठधूमविषयत्वस्य प्राक्तननिष्ठधूमपरामर्शेऽप्यनुमापकेऽभावादव्याप्तिरित्यर्थः। ननु व्यक्तित्वाश्रयविषयत्वमेव विशेषविष

यत्वं न त्वेकैक धूमव्यक्तिविषयत्वमिति सामान्यतो व्यक्तिविषयत्वमित्यनेनाशंक्य व्यक्तित्वाधिकरणं प्रागुदाहृतप्रत्यभिज्ञाने स्फुरणात्ती
त्यर्थानि व्याप्तिप्रसंगेन दूषयतीति अथ तु यैः व्याप्यविषयत्वनिर्वचनखंडनेनानुमानस्य स्वरूपं खंडयित्वा फलमपि खंडयति
किं धूमादिना पर्वतादेर्यदा कदाचिदग्निमत्वं प्रतीयते तत्र यदा व्याप्यपरामर्शस्तत्कालीनमिति विकल्पार्थः अन्यदा
पीति अतीतानागताल्लिंगादावपि पर्वते वह्निमनुमाय प्रवर्त्तिनि तत्कालीनवह्निमानस्यापि संभवादित्यर्थः अधुनाअ
धुनाविद्यमानेऽपि स्वस्वकालेयामनुमितिं जनयेत्तस्या अयं पर्वतोऽपि विषयश्चेत्तदा वह्निनिश्चयस्यात्रापि सत्वा
दधुनाप्रवृत्तिः स्यादित्याशयः तदानीमिवेति तत्र लिंगकानुमानकाल इव । अथ प्रवृत्तिकाले निश्चयोऽपेक्षित
नास्तीति चेन्नातीतधूमजन्यवह्न्यनुमितिजनितसंस्कारेण वह्निस्मृति संभवान्नू तदाग्निमत्वेति धूमस्य वह्निमात्रेण
व्याप्तिग्रहाद्व्यापकतावच्छेदकप्रकारिकैवानुमितिरिति नियमाच्च वह्नित्वेनैव तद्भासेत ननु धूमकालीनवह्नित्वेन
[illegible] तस्य व्यापकतानवच्छेदकत्वेन कालस्य भानादिति भावः ननु यदा धूमस्तदा वह्निरिति कालगर्भव्याप्तिग्रहबलादेव
लिंगकालीनलिंगकसिद्धिरित्याशंक्य तेनेदेति धूममात्रे कालो विवक्षितः पक्षनिष्ठधूमकालो वा आद्ये आह कुत्रचि २३८

देशेइतिकालांतरेपिक्वचिद्देशेपर्वतावितिरिक्तेधूमस्याधस्यानमस्तीतिकालांतरस्यधूमकालतानंतकालीनोवह्निपर्वतेनिश्चितेति
धूमविरहदशायांपर्वतेतदन्यायन्निरित्यर्थः द्वितीयमाशंकतेतदेनेतिपक्षविशेषनिष्ठधूमकालीनाग्निनाव्याप्यग्रहात्संभवः
अपूर्तीनव्याप्तिकं त्वंपक्षवृत्तिधूमस्यपूर्वंपक्षीयवह्नेरज्ञानात्तदीयव्याप्तेरशक्यग्रहत्वादितिभावः यस्याधूमव्यक्ते
विशिष्टस्यकालिकीव्याप्तिगृहीतास्तेवतत्सूत्रार्थ इतिशंकतेयत्किंचिदितिधूमेसत्ययत्किंचिद्धूमकालीनवह्निभानेपि
तत्कालेधूमाभावदशायामग्न्यार्थिनः प्रवृत्तिः स्यादित्यर्थः ननुव्याप्यमात्रात्तत्साध्यसिद्धिः किंतुपक्षधर्मताप्यंगं
तेनपर्वतनिष्ठात्तद्धूमात्तद्देशांतरकालांतरीयवह्निसिद्धिरित्याशंकापरिहाराभ्यामाह हेतोरितिपक्षधर्मतयापिपक्षी
यावह्निः सिद्ध्यतितत्तुनियतकालीनतथापितस्यास्तदनंतरत्वादित्याशयः। ननुलिंगपरामर्शकालेः पक्षः प्रविष्टोस्तु
ननश्चपक्षधर्मतासाध्यस्यदेशनियमेनेवकालनियममपिसाधयिष्यतीत्याशंक्यपरिहरतिकथमनश्चादितिकालस्यपक्षांतभा
नै वेद्वितीयक्षणादौसत्वविशिष्टस्यपक्षस्यनष्टत्वात्तत्रनप्रवृत्तेरित्यर्थः मितभाविन्यांतुपक्षकालमेतभाव्यपक्षत्वंपक्षधर्मत्वंदेशोश्चपक्ष
धर्मः साध्यएवासिद्ध्यतीतिचेन्नत्राहतत्कालमितियावेत्यशयोऽनुवर्त्ततेतयोरेवहिपक्षकालोऽतःसंशयेनिवृत्तपक्षाभावादग्न्यार्थिनः

प्रवृत्तिर्न स्यादित्यर्थ इत्येवं ग्रंथो यं व्याख्यातः धूमकालः पक्षतां न भूत इति नोक्तदोष इत्याशंकते धूमकालमिति एवं सति यत् किंचिद्धूमका
लीनवह्निसिद्धिरिति अन्यदापि प्रवृत्तिः स्यात् परामृश्यमान धूमकालः पक्षतां भूत इति शंकते नदिति परामृश्यमानधूमविशिष्टः प
क्षत्वम् स एवेति आत्माश्रय इत्याशयेनाह ज्ञात इति विशिष्टेऽतिरिक्ते धूमस्य वृत्तावपि नात्माश्रयस्तस्य विशिष्टपक्षभिन्नत्वादि
त्यत उक्तम् ज्ञात इति। अथ तद्धूमकालः पक्षतावच्छेदकोऽस्तु तथा च तत्तत्कालावच्छेदेन साध्यसिद्धिर्न वा ज्ञातः स्ववृत्तित्वस्य पक्षे
नं तद्भावात् न च तथापि पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यसिद्धेर्नाभिमतसिद्धिरिति वाच्यं तत्तत्कालावच्छेदेन साध्यस्यासि
द्धावे[illegible]धयिघायां तथासिद्धेरावश्यकत्वात् किंच तादृशपरामर्शात्तत्कालायामनुमितौ पर्वते प्रवर्त्तनेऽद्यतनकालीनवह्निमत्ता
ज्ञानादेवेति सिद्धितेनादृशपरामर्शजन्यतावच्छेदकं तत्कालीनवह्निज्ञानत्वमेव इति कल्पनयैवोपपत्तौ नस्यावच्छेदकत्वाभावेपि दाति त
र्वात स्यावच्छेदकत्वास्फूर्तिदशायां प्रवृत्त्यानुपपत्तिः तथापि तत्कालीनत्वं व्याधकतावच्छेदकं कथं वक्ष्यो प्रकार इति चेत्
फलबलेनानथाभूतस्यापि भानकल्पनात् अन्यत्रापि तथा फलादर्शनमेवान्याप्रकारकतानाकल्पनायां बीजं अत एव सकलके
तानुमितावपि कर्त्तुरेकत्वप्रकार इत्यप्याहुरिति चेत् धूमकालीनत्वानुमि[illegible]तोन व्याप्यत्वानस्पर्शि कृ[illegible]कारणस्याभावेन तदा
प्र

धाराशादेव वह्निबुद्धौ जा[illegible]तायां सवह्निर्धूमकालीनो धूमकाले प्रतीयमानत्वादित्यत्र हि तत्कारणत्वेन कृप्तमिति अविनाभावइत्यत्रनि
षेधार्थकस्य किं विनापदेन संबंधो भावपदेन वा आद्ये विनापदार्थे न संबंधे व्यतिरेकाभावइत्यर्थः द्वितीये विनाव्यतिरेकेऽभावइत्यर्थः
तत्र विनेत्यत्र एकस्य व्यतिरेक इत्यर्थलभ्यमव्याहृत्य वाभावइत्यत्रापि अप[illegible]रस्येत्यर्थलभ्यमव्याहृत्य विकल्प्य यत्येकस्येत्यादि तथा च
२ एकस्य व्यापकत्वाभिमतस्य व्यतिरेकेऽन्यस्य व्याप्यत्वाभिमतस्याभाव इत्याद्यविकल्पार्थः एकस्य व्यापकत्वाभिमत
स्य व्यतिरेके व्याप्यत्वाभिमतस्य व्यतिरेक इति द्वितीयस्यार्थः । केवलान्वयसंग्रहाय निषेध्यत्वमर्थमाहात्तन्वयार्थ इति व्याप्तिः
स्यादिति न च सास्ति हीरके व्यभिचारादिति भावः । संबंध इति अन्वय इत्यर्थः । यदनभ्युपगम इति यदि प्रदीयधूमे न व्याप्ति
गृहस्तदा ततोऽनुमितिर्न स्यादिति सामान्यं प्रत्यासत्तिरभ्युपगंतव्या इत्यर्थः पंडकं नपुंसकं वीर्यहीनं [illegible] नवा अस्य पाणिगृही
तारं कृत्वा मुग्धायाः कामुकया या भ्रांतायाः स्तनं पुत्रप्रार्थनमिवेति उपालंभमाह सेयं वाचस्पतिरित्यत्र मिश्रपदं नोक्तं तथा सति नैयां
वाचस्पतित्वं बृहस्पतित्वं तत्सत्त्वं तल्लभेत अधुना तु वाचस्पतिमिश्र एव वाचस्पतिरेव बृहस्पतिरिवेति लभ्यते विद्यमानसहेऽसेत्यत्र
मनोभानसस[illegible]वरं तु लपरत्ला मांसपदस्यैवेति धूमज्ञानस्य पंडकत्वसाम्यं तु अगृहीतव्याप्तिकत्वे सति अनुमितिजननासामर्थ्यं ।

पुत्रोत्पादने वीर्य्यमिव लिंगज्ञानस्यापि व्याप्तिविषयत्वमनुमित्युत्पादनेऽङ्गमतद्धीनमसमर्थमेव स्यादिति सामान्यलक्षण
मनंगीकर्त्तुरनुमानत्वं प्रमाणमभ्युपगंतुर्न मनोरथसिद्धिः स्यादित्यलौकिकप्रत्यासत्तिः स्वीकारितापरस्येति [illegible] । ननु सर्व
मजानता त्वया कथं मम सार्वज्ञमापद्यते नेन दृष्टानन्त्रापाद्याज्ञानादिति मम सामान्यलक्षणस्थापनेयाकृत्यापरस्य
अर्थहेतुदेवतोपासनामंत्रप्रयोगो वा ननु त्वया सार्वज्ञापादनात्मिका त्वाप्रवृत्तैव न तव जाना सामान्यलक्षणांगीकारहेतुत्वान्
प्रतिकृत्याहि प्राकप्रयुक्तकृत्या विरोधिनी परेष्टस्य वस्त्वाधिकेनीयमपि तथेत्याशंकां परिहरति कुचिदपीति मम हृदयस्थ
वस्तुनि तवाज्ञानं मम भापृष्टस्य वचनासामर्थ्यादेव निर्णीतं न तत्स्यादित्यापादनादित्यर्थः नन्वेवं व्याप्तिग्रहणकाल एव सर्व
स्य ज्ञातत्वादनुमेयं किमपि न स्यादित्याशंक्याह नत्विति प्रमेयत्वादतिरिक्तं यद्रूपं तद्देवानुमेयं भविष्यतीति भावः ननु रू
पांतरवत्तः प्रमेयत्वेपि रूपांतरं न गृह्यते किंतु वस्तुनोयत्स्वद्वा न तत्गृह्यत इत्याशंक्याह येन रूपेणासीतिनेन रूपेण प्रमेय
मिति तद्रूपमपि प्रमितमिति तद्रूपे प्रमेयत्वसत्वात्तद्रूपमपि भासेत प्रत्यासत्तिसत्वात् अन्यथा तद्रूपेण प्रमित एव न स्यादित्यर्थः
ज्ञायतां यदिच्च ज्ञानद्दष्टापत्तिस्तदा कथं तामित्यपि वोध्यं प्रमेयत्वदर्शिनादृति । प्रमेयत्वस्य स्वरूपसतः प्रत्यासत्तित्वधारणा

विति

यद्दर्शने स्यात्। चित्रत्वं त्विति चित्रस्य पतत्र ज्ञानस्य ाद्याकारः परिणामः प्रियतामित्यस्य श्रद्धास्येति इत्यस्य सार्वज्ञ्यमिति शेषः श्रद्धा सत्य
मये सर्वज्ञ इति विश्वासः अयतद्रूपमपि प्रमेयत्वेन भासत एव ननु तद्रूपेण यन्न सामान्यं प्रत्यासत्तिस्तया तत्प्रकारकमेव ज्ञानं जन्यते तथैव साम
ग्र्यावधारणात् किं च सन्निकर्षे सत्यव स्वं भासत इति न नियमस्तदुत्तरकाल संशयदर्शनेन तत्र दोषस्य संशयाधायकस्येव प्रतिबंधकत्वकल्पना निति
चेन्न प्रमेयत्वेन ज्ञायमानानां घटत्वादीनामेव द्वितीयज्ञानार्थप्रत्यासत्तित्वमस्तु तथा च घटत्वप्रत्यासत्त्यानंतरं घटत्वप्रकारकं ज्ञानमस्त्वित्या
पादनेति। न च प्रमेयत्वेन ज्ञायमानं सामान्यं प्रत्यासत्तिः किंतु स्वांशे निष्प्रकारकीभूतज्ञानविषय एव तत्र पतित्वाच्चं प्रमेयघटत्वमिति ज्ञानस्यात्तथा
त्वापत्तेः। नापि सन्निकर्षे सति दोषात् संशयः दूरीभूतधर्मस्येव सन्निकर्षत्वेन तत्संशयस्येवाभावादिति यत्सार्वज्ञ्यमापादितं तत्र संभ
वतीत्याशंकनेस्याद्दत दिति। यथाभेदविधर्मादिधर्मिणोर्भिन्नस्तथा वस्तूनामेक्यमपि धर्मिणो भिन्नं तत्रानुगतो धर्मः प्रमेयत्वादि
कथमन्यथा प्रमेयं प्रमेयमित्यनुगतबुद्धिर्न चेनावता प्रमेयत्वमेवैवं सिद्ध्यति न धर्मी जिज्ञाचाम तर्हि प्रमेयाणामभेद एव भासते जा
तिखिल सर्वव्यक्तीनामेकं रूपं न हि धर्माणामेक्ये न धर्मो वा बुद्धिर्वि ने धर्मधर्मिणोरभेदेन सिद्ध्यतीति तस्मात् प्रमेयत्वं वस्तुत्वं च व्यक्तीनामेक्या
भेदपर्याप्तो धर्मस्तद्ग्रहणं कथं सर्वग्रहणमिति ननु धर्मिनैरैक्यस्य भेदकथनं किमर्थमिति चेद्धर्माणामभेदात्मकत्वासिद्ध्यर्थमन्यथा धर्मिण
ति

एवाभेदात्मकाः स्युः ननु धर्मस्तत्र धर्मित्वाय दि विषयास्तदा सर्वविषयता दुर्वारा प्रमेयत्वाश्रयाणां सर्वेषां भानात् न च धर्मिण एव
कथमभेदात्मका न स्युरिति वाच्यं तथा सति धर्मिणोऽभिन्ना न स्युः स्वस्य स्ववृत्तित्वविरोधात् ऐक्यस्य धर्मात्मकत्वे तदाश्रयतया एको
ऽभिन्नश्चेति प्रत्ययो नानुपपन्नः प्रमेयाद्यपीति धर्माभेदप्रतियोगितावच्छेदको न भवति स एवाभेदापरपर्यायमैक्यमित्यर्थः
ननु किमित्यत आह तत इति सर्वमपि तदेकमेव ज्ञातं भवति कथं सर्वमेकमित्याशंक्याह तत एकेनेति प्रमेयत्वाद्यात्मकं यदे
कं तद्विशिष्टतया प्रतीयमानमेकत्वाश्रयतया एकतामापन्नं यत्क्यात्मकं एकमेव धर्मिज्ञातं भवतीत्यर्थः तत्रस्मात कथमेक
त्वादित्यतः सार्वत्रिकशेषवस्तुज्ञोऽपि सर्वज्ञो भवति न चैकज्ञानेन नु सर्ववस्तुज्ञ इत्युच्यते यतः प्रमेयत्वादिनेति प्रमेयत्वादेरेकत्व
रूपत्वादिति भावः सर्वैक्यवादी स्वमतमुपसंहरति तस्मादिति भावः प्रमेयत्वादिना एकत्वेन कृत्स्ना यो दृष्टः नानैकमिति नाना
७ त्वेन प्रतीयमानस्य एकबुद्धिविषयतानेकदापि संभवति नानात्वस्य वस्तुवस्तुवृत्तित्वादेकत्वस्यैकमात्र [redacted] वृत्तित्वादिति [redacted]
प्रमेयत्वाधारस्येति धर्मो निर्धर्मिको न गृह्यते तेन तस्य धर्मी सर्व एवेति तद्ग्रहणं दुर्वारं चेति भावः। विद्यासागरस्तु भेदाभेदालंबनेन पूर्व
पक्षयति स्यादेतदिति अन्योन्याभावादिर्भेद एको न भवति किं नु भिन्नवृत्तिर्वै धर्मेण दृष्टांतमाह यद्येतिभेदस्य भिन्नत्वात्तद्विलक्षण

ममभेदापरपर्यायमैक्यं वस्तुनामेकमेवेत्याह तथेति एकस्यैकत्वेन प्रमेयत्वस्य किमायातमित्यत्राह तत्तदिति प्रमेयत्वं वस्तुत्वं च सर्वभावानामेकमेव तथापि
कथमनिष्टापत्तिपरिहार इत्यत आह तदिति यतः प्रमेयत्वादिलक्षणमेकत्वमेकमेवातः प्रमीयमानं घटपटादि यद्यपि निरर्थकं तथापि तत्तत्सर्वप्रमेय
त्वादिलक्षणेनैकत्वेनैक्यात् प्रतीयमानयोः पूर्वोक्तवन्नित्यादेकस्याप्य क्तिरात्मनात्मस्वरूपेण ज्ञायमानमेकमेव ज्ञानं भवतीत्येकत्वादीनां कथं सार्व
त्र्यप्रसंग इत्यर्थः नानात्वमपि प्रमेयत्वादिना गृह्यमाणमेकमेव भवति यस्मादित्युत्तरश्लोकापेक्षितं पूरयन्नेवाभियुक्तवचनमुदाहरति सर्वभावा
इति असाधारणरूपेण सर्वपदार्थभाने कथमनेकत्वाज्ञानमित्याशंक्य तत्त्वत इति पदं व्याचष्टे तदिति व्याचष्टे। अथ जातिव्यक्त्योरभेदेन जातीय
सर्वव्यक्तिभानेन ज्ञानप्रकारीभूतधर्माश्रययत्किंचिद्व्यक्तिसन्निकर्षे लेववापराणां व्यक्तीनां भानं स्यात्तु न च सार्वज्ञ्यं न तत्तत्प्रकारकभाने तत्त
न्निर्विकल्पकं स्यादिति हेतुत्वात् निर्विकल्पके च सामान्यप्रत्यासत्तिर्हेतुः सामान्यस्य प्रत्यासत्तिभूतस्य प्रकारकत्वादिति चेन्न व्यक्त्यो
विशेषकप्रकारेण प्रमिताः संत्येवेत्यत्र प्रमाणाभावेन तासां जात्याऽभेदोऽप्यप्रामाणिक इति दूषणं दुरुद्धरमेव सामान्यस्य प्रत्यासत्ति
त्वपक्षेऽप्येतद्दूषणं बोध्यं सामान्यलक्षणया घटपटत्वप्रत्यासत्तिरूपा ज्ञानप्रमेयत्वात्वयाच्चघटत्वादिनिर्विकल्पकं स्यान्न तनश्च
सर्वप्रकारकं ज्ञानं दुरपवादं फलानां तादृशानामदर्शनात्ततो निर्विकल्पकोत्पत्तिरिति चेन्न हि सामान्यप्रत्यासत्तिः सत्याम

(निर्विकल्पकस्यापि हेतुतानतिवि) वितस्यां कार्य्यादर्शनादित्येव कल्पनं ज्ञेयः अन्यस्त्वयं तु किंचिद्व्यक्तिसन्निकर्षाद्यावद्व्य
क्तिभानमिति सप्रमाणकमिति दिक् । संबंधास्तित्व इति व्यापकसामानाधिकरण्यं धूमव्यक्तिषु सर्वास्वस्तीत्यत्र किं प्रमाणमि
त्यर्थः । दूरमुपलक्षणं सामान्यस्य धूमत्ववह्नित्वादेर्विशेषतोऽगृहीतास्वव्याप्तिषु प्रमाणमपि दुर्लभमिति कथं तेन तत्ग्रहणं
तथा धूमाधिकरणानां सर्वेषां न सर्वत्र तत्त्वादिना ज्ञानं संभवति आनंत्यात् नापि धूमाधिकरणत्वेन धूमस्याधिकरणतायाश्च पर्वता
दिषु प्रत्येकमासन्न वृत्तेः सामान्यत्वाभावात् नापि धूमसामान्यमेव परंपरासंबंधेन वर्त्तमानं प्रत्यासत्तिः परंपराघटकव्यक्तीनामनंतता
ननुगतत्वादित्यपि दोष्यं तनु संबंधस्य ग्रहे पीति यद्यपि व्यक्तीनां सामान्यलक्षणया ग्रहणं संभवति संबंधानां तु कथं संयोगत्वसमवा
यत्वाभ्यामिति चेन्न स्यादेवं यदि तत्र तत् संयोगव्यक्तिषु संयोगमस्तीत्यत्र किमस्माकं भवेत् विशेषणतया व्याप्यव्यापकभावे वा
कागतिरिति दूषणमस्ति तथापि तदुपेक्ष्यान्यदप्याह तर्हीति क्वचिदिति पार्थिवत्वलोहलेख्यत्वे धूमाग्नि व्याप्तिग्राहकमिंद्रिय
मदुष्टं पार्थिवत्वे लोहलेख्यत्वव्याप्तिग्राहकमिंद्रियं दुष्टमित्यस्ति सामग्रीविलक्षण्यं दूषयति दोषादोषे निवेचित्रमिदं न प्रत्य
क्षगम्यमिंद्रियस्यातींद्रियत्वात् यादृशेनेंद्रियेनाग्निव्याप्तिर्धूमे गृह्यते न तादृशेनैव काचकामलदोषरहितेन पार्थिवत्वेपि लो

हत्वेधूमत्वव्याप्तिग्रहइति चेत् । यस्यानुपलब्धिबाधइतिमितभाविप्रणां नानुमेयंलिंगाभावात् । कार्य्यभेदएवानुमापकइति शंकते कार्य्यदादितियद्युविवे
चनस्यदुष्करत्वोक्त्यादोषत्वस्यप्राक्खंडितत्वात्तदभावस्यापिच प्रतियोगिज्ञानाधीनत्वाद्दुष्करत्वमाह कार्य्यभेदोपिसामग्रीभेदेमानंनदोषा
दोषत्वादि विशेषस्तु नरगृंथविरोधेपि नेतिनदानीमित्यस्यासत्वेनेत्यनेनसंबंधः व्याप्तिग्रहणप्राक्काले भाविसंबंधानामसत्वात् यद्यपिभाविसंबंधा
विशेषात्मनानसंभवतितथापिसामान्यात्मनासंत्येवव्याप्यव्यापकसंबंधस्यकस्यचित्सत्वादित्याशंकते सामान्यतइतिप्रत्यक्षंप्रतिकारण
तापिसामान्यधर्मावच्छेदेनैवेति भावः भ्रांत्यभ्रांतीतिपार्थिवत्वलोहलेखत्वयोरपिकाष्टादौसंबंधोस्त्येवेतितन्न प्रतीतिरपिप्रमास्यादित्यर्थः
अत्राभ्रांतिपदंसाधारण्यनिरूपकमननिप्रयोजनमेवतद्वोपपादयति क्वचिदितिसत्वादिनोमनिर्देशांतरगतस्यैवभ्रांतो धूम कारणादिति
भावः यद्यपिचतावतापिकारणतानास्तिसेवचेह विवक्षितातथाप्यविद्यमानसंबंधव्यक्तीनां कारणतासामान्यरूपेणापिनसंभवतिबाधा
त्तज्जातीयत्वं चेत्कारणत्वंतदाभ्रांतिविषयस्यापि तदस्तीत्यकार्य्यभेदादितिव्याप्तिप्रतीत्यासामान्यतः तत्प्रमित्याचविशेषः कल्प्यः अन्य
थाकार्य्यस्याकस्मिकत्वापत्तेरितिभावः । बहिरिंद्रियस्यसहकारी मनसोवाअग्राद्यग्राहइंद्रियस्येतिबहिरिंद्रियस्यसंबंधवर्त्तमान
ग्राहकत्वात्तत्प्रमाणत्वाभावेकल्पनीयस्यतत्सहकारिणानुपपत्तेरितिभावः व्याप्तिग्रहंप्रतिबहिरिंद्रियस्यव्यभिचारात्कार

णत्वकल्पनायां बाधमाह प्रस्तुतेति व्युपरते चक्षुरादीन्द्रियव्यापारस्य पुंसः भावयतश्चिंतयतो व्याप्तिघटकपदार्थान् स्मरतः व्याप्ति
मंतरेण दूषयः साहित्यं नोपपद्यत इति विचारयतद्भूति विद्यासागरस्तत्तदसव्यभिचारित्वमपि तन्मूलत्वात् पूर्वं प्रतीतः संबंधो यस्य
धर्मिद्वयस्य व्याप्त्यवधारणदर्शनात् व्यभिचारज्ञानविरहे सहचारदर्शनवतो बहिरिन्द्रियव्यापारविरामदशायां व्याप्तिधी
दर्शनेन बहिरिन्द्रियाणां कारणत्वबाधितमिति प्रघट्टकार्थः। करणत्वे प्रमाणाभाववृत्तिमनसः प्रमाणांतरसहकारेणैव बाह्या
र्थग्राहकत्वमन्यथांधबधिराद्यभावप्रसंगादिति तस्य करणत्वव्याप्तिप्रत्यक्षे नास्तीति भावः अवश्यं कल्पनीयेन मनसो बाह्य
प्रवृत्तौ सहायभूतेनेत्यर्थः। अंत्यशंकातं मनसः कारणीभूतस्यैव सहकारीसविशेषोऽस्तित्यासंक्याह चक्षुरादिवदिति करणं वि
ना कार्यानुत्पत्तिः करणांतरकल्प्यमिति भावः यदि व्याप्तिज्ञानप्रसक्तेन दासप्रमं अन्यथाह प्रमाणांतरमिति विकल्पयोः स्यात् २
पर्यं चक्षुरादियश्चैवमिति तेनांधस्य रूपाग्रहो बधिरस्य च शब्दाग्रह इति कल्प्यमानोपि विशेषो यदीन्द्रियरूपस्तदा षष्ठ इन्द्रियत्वं तदभावा
दिन्द्रियांतरभन्निंधरूपत्वे परिगणितप्रमाणमध्यातीतः पातात् प्रमाणांतरत्वमिति पक्षद्वयार्थः। सार्वत्रिकं व्यतिरेकयोरंगा
पद्यमिति। व्यतिरेकयोगः सार्वत्रिकोऽधकारालोकयोरपि न व्याप्तिरित्यत आह ये योगपद्यमिति तदुभयव्यतिरेकयोरेकाधिकरण

वृत्तित्वादृिक्रमेणेति भावः। अविनाभावनियम इति विनापदोक्तव्यतिरेकाभावपदोक्तान्वयव्यतिरेकयोर्नियम इति तद्घटितार्थकं इत्यर्थः कुटिलैकाधृतिपन्ति
गोरेवं व्यतिरेकयोरपि नियमस्तत्सहचारेणैव ग्राह्यत्वादुक्तं अन्वययोरेव तदस्तु व्यतिरेकस्यान्वयप्रतियोगिकतया तज्ज्ञानपूर्वकज्ञानत्वेन तयो
र्नियमग्रहायोर्ध्वदत्वादित्यर्थः। व्याप्तिद्धितीयंलक्षणं शंकते यत्रेति यत्रहेतौ बाधकमस्ति तस्यान्वयः साध्येन सहचारः यद्वा यत्र ययोः
साध्यसाधनयोर्मध्ये साधनस्य विपक्षे वृत्तौ बाधकमस्ति तयोरन्वयो व्याप्तिरित्यर्थः विपक्षबाधकसध्रीचीनोऽन्वयो व्याप्तिरि
त्यर्थः तदसंभवादिति इंद्रियस्य संबंधमात्रग्राहकत्वेनातीतानागतविप्रकृष्टविपक्षसन्निकर्षाभावेन तद्वृत्तित्वाभावबोधकत्वासंभ
सि वात्। व्यभिचारेति अव्यभिचारस्य निर्णीतत्वात् क्वापि संशयो न स्यादिति संदिग्धानैकांतोच्छेद इत्याशयः। न च हेतुसमानाधिकरणा
त्यंताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकरूपस्याव्यभिचारस्य विपक्षवृत्तित्वाभावनिश्चयेऽपि निश्चय इति स्यादेव
तत्संशयवृत्तिवाच्यं विपक्षवृत्तित्वाभावनिश्चयस्य विशेषदर्शनतया तत्संशयस्याप्यनुपपत्तेः अत एव विशेषदर्शनत्वभाव
तस्य नास्ति न हि व्याप्यदर्शनमित्येव विशेषदर्शनं स्यात् नु निष्ठेदंतानिश्चयस्यापि तथात्वापत्तेः व्याप्यत्वेन तत्तु तद्वृत्तिमिति चेत तत्सं
परं तु योग्यानुपलब्ध्याभावात् तद्वृत्तित्वं मात्रे गृहीतं न शक्यत इत्येव मुख्ययुक्तिरिदं त्वभ्युच्चयमात्रं साध्याभाववान्न हेतुमान्

साध्यविरोधिमत्तादिरनुमानमाशंक्य निषेधति नाप्यनुमानेनेति तस्याप्यनुमानतया व्याप्तिमूलत्वमेवमप्यस्यान्यस्यापीत्य
१ न्स्यापत्तेरित्यर्थः मीमांसकमतमालंब्य मानमपि निराकरोति व्यतिरेकेनेत्यादिना तदा तत्र एवेति अनुपपत्तिस्थानादेव पक्षीय
साध्यसिद्धेरनुमानकार्यस्याभावादलं तत्कारणीभूतव्याप्तिज्ञानविषयव्याप्तिवच्चेमित्यर्थः अनेवंभावे लिंगपक्षावेलिंगपनु
पपत्तिरित्येवंरूपत्वाभावेन योर्व्याप्तिरेवनेति तन्मूहार्थं विपक्षबाधकानुसरणफलमित्यर्थः साधकमिति विपक्षबाधकं प्रमा ए
णमिति शेषः अप्रमाशयो हेतुः साभाव्यतः स्वोपपादकमात्रमाक्षिपति तावतैव तदाकांक्षाशांतेः ननु विशेषमपि तथा हि धू
मो यदि केनचिन्नियतो न स्यात् कदाचित् को न स्यादित्येवं तस्य कादाचित्कत्वोपपत्तेर्वह्निमानिति या बुद्धिः सानुमानिकी वि
त्याह कथंचिदिति केनापि प्रकारेणेत्यर्थः यत्राप्यनुमानमिति यत्र पर्वतादौ वह्न्यनुमानं तत्रापि अग्न्यभावे धूमभावोऽन्य
थाभावस्तत्साधकयेत्यर्थः । अप्रमाशयो यदि धूमवति पर्वते वह्न्यभावेनेति बाधकाभावधीरर्थापत्तिरूपा तदा वह्निः सिद्ध
एवेति अनुमानं व्यर्थं । द्वितीये त्विति पार्थिवत्वलोहलेख्यत्वयोरप्येवंभूतव्याप्तिप्रसंग इत्युपरितनेन संबंधः । चारितादर्शनाय बाधकवि
षयं सामान्यतो विपक्षं धूमवन्न हीत्यादिना विपक्ष इत्यंते तेन प्रदर्श्यतेत्यादिना तत्र बाधककृत्यमाह सामान्यतो बाधकस्य विरोधपर्यव

स्तित्स्याभावबोधकं बाधकम् विरोध एव पर्यवसितमित्यर्थः। ननु किमित्यत्र आहाविरोधश्चेति। इत्युक्तमिति संबंधस्यार्वत्रिकत्वस्य सर्वस्वेन ज्ञातु
मशक्यत्वादित्येवं। तृतीयइति विपक्षबाधकोपेन मन्वयमात्रमित्यर्थः सामान्यविषयत्वे व्यभिचारित्वस्यपि व्याप्तिः स्यात् सर्वव्यक्तिविषयत्वे त्व्यर्थी
पत्त्यैव साध्यसिद्धेरनुमानावकाश इत्यर्थः। यदीत्यसंदेहे यदि वेदाप्रमाणं स्युरितिवत् विशेषत इति पक्षधर्मतावलम्भो विशेषो
ऽनुमानस्य प्रमेय इत्यर्थः। दृष्टांतेभावो वन्हेर्भानत्वादेः विशेषावस्थानं पर्वतत्वादि इत्वंत्तित्वं। कृतमनुमानेनेति नचैवं वह्निमनुमिनो
मीति प्रत्ययो न स्यात्। स्याच्च वह्निं साक्षात्करोमीति वा चेन्न अनुमितित्वस्य साक्षात्वव्याप्यत्वात् चाक्षुषादिवत् साक्षात्करोमी
ति न प्रत्ययः दोषविशेषसहकृतालौकिकसन्निकर्षजन्यत्वाभावस्य तद्व्यंजकत्वात् दोषविशेषेत्युपादानादलौकिकस
न्निकर्षजन्येपि रजते साक्षात्करोमीति साक्षात्वाभिव्यक्तिः किंच यद्यत्रास्ति तत्तन्न दवश्यं गृह्यत इति ननियमः प्रमाणाभा
ति वात् सामग्रीसत्वे गृह्यत एवेति नियमः साच नास्ति अनुमितित्वभानसामग्र्या एव प्रतिबंधकत्वात् अत एवात्मानुमितौ साक्षा
त्वेभासितेन लौकिकसन्निकर्षस्य साक्षात्वव्यंजकस्य भावादित्यपास्तं रजभ्रमे साक्षात्वस्यानुभवात् किंचात्मानुमितौ
साक्षात्वेनभासनइत्युभयसिद्धं ननु किमसत्वादेव उतानुमितित्वभानसामग्र्या प्रतिबंधकात्तत्र नाद्यः साक्षात्वस्येंद्रियजन्यता

२४५
245

सार्वत्रिकत्वविशेषणस्य न वा नुपलंभविशेषणयोग्यतायामपि तादृशकालेन तत्र बाधे एवेति। तदीयादर्शनेति। यत्र व्याप्तत्वदर्शनं तत्र व्यभिचारोपलंभो न

वह्नेर्देशकालेन तत्रापि सत्त्वात् अन एवं द्रियत्वेन जन्यतेष्टेव तन प्रयोजिकाइ जिनिरस्तं त्वाचे वेनेंद्रियजन्यतस्येतथात्वेन च स्मृतिवले
तत्रापत्तिविशिष्टत्वान् स्मृतित्वमपि साक्षात्त्वव्याप्यसंस्कारजज्ञानमात्रवृत्ति यदि च तांत्रिकानां नत्र साक्षात्त्वव्यवहारो नास्ती
त्युच्यते तदा संस्कारसहकृतेंद्रियजन्यज्ञानादेव साक्षात्त्वं अपि च भगवतः सर्वज्ञानेकत्वेनोभयवादिसिद्धा यथा च तुरादिसह
कृतं प्रत्यक्षविशेषकारणं तथा परामर्शसहकृतमनुमित्यात्मकप्रत्यक्षेपि न च प्रत्यक्षत्वमेवास्तिदं अनुभवत्वमेव प्रत्यक्षत्वं
न त्वनुभवविशेषत्वं गौरवात्मानाभावाच्च एतेन तत्स्यामनस्त्वेपरामर्शापेक्षानस्यादित्यपास्तं संशयोत्तरप्रत्यक्षेन यान्तदपेक्ष
णात् अन्वयव्यतिरेकाभ्यां तत्कारणत्वावधारणाच्च इति दिक्। तस्येति क्रियमाणस्य संज्ञासंज्ञिसंबंधः प्रवृत्तिनिमित्तं वा सादृश्यमेव वा
मीमांसकमते प्रमेयं न त्वभाव इत्यर्थः अनुपलंभात्मप्रमाणस्येति कर्त्तव्य नाभूत तर्कमाह एवमिति एवमुपकारणमित्यर्थः। तथाहीति काचि
त्कव्यभिचारादर्शनं व्यभिचाराभावं प्रमापयति सार्वत्रिकव्यभिचारादर्शनमिति सर्वत्र योग्यानुपलंभः सः आद्य आह नेति अतीतानागत
विप्रकृष्टानां व्यभिचाराणां योग्यत्वासंभव इत्यर्थः संभवादिति क्वचिदिति शेषः न त्वनुपलंभस्य योग्यतासहितस्य सार्वत्रिकत्व मपेक्षितं
न त्वनुपलंभमात्रमिति सत्त्वप्रतियोगियोग्यताया एव व्यवच्छेदो न तु अनुपलंभो नास्तीत्यर्थः। तथा च कदाचिद्व्यभिचारानुपलंभ[illegible]स्ताव



दर्शनेवा त्वापि तदनुपलंभे सार्वत्रिकोऽनुपलंभोऽस्त्वेवेति तत्रश्च तत्र व्यभिचाराभावः स्यादिति भावः तद्दर्शनदशायामस्ति व्यभि
चार इति यदा दर्शनं तदानुपलंभाभावाद्व्यभिचाराभावनिश्चयो नास्तीति कथं व्याप्तिः किंतु मम व्यभिचार एव नहि कुत्र व्याप्तिरित्यत आह यत्रेति यत्र व्याप्ति
२५ धूमे व्यभिचारो न दृष्टो न दृश्यते वा तथापि न दृष्टो न दृश्यते त्वत्र मानाभा[?]वेन व्याप्त्यभावप्रसंग इत्यर्थः । विपक्षबाधकं प्रमाणं न संभवतीत्युक्ते तर्कोऽवि
पक्षे बाधक इति द्वितीयपदं समनुवदन्नेव दूषयति नापीति । इदं वस्तु मिति अनवस्थापादकं वाक्यमित्यर्थः । अनुत्तर इति शंकाप्रतिपादको त्तररहित इत्य
र्थः तदेवोपपादयति स्वक्रियाकपापृष्ठत्यादिका । अथवा उत्तरो न विद्यते यस्यासावनुत्तरः व्याप्तिग्रहार्थमपेक्ष्यमाणोत्तरः तर्कहीन इत्यर्थः
अनुत्तरो अपरिहार्य्य इति वार्थः तर्हि व्याप्तिमूलकत्वे शंकायाः को विषय इत्याशंक्य कथयतीति व्याघातं स्वक्रियाव्याघातादय इत्यत्रादि
पदेन स्ववचनस्वभावव्याघातयोः परिग्रहः यथा हि कार्य्यकारणपूर्वकमित्यत्र शंकायां कारणोपादानक्रियाव्याघातस्तथा कारणाधीनात्मला
भत्वं कार्य्यत्वं न तत्कारणकमित्युक्ते स्वभावव्याघातः स्ववचनव्याघातश्चेति लोकमर्य्यादाप्रमाणिकी व्यवस्थाव्याघातपरिहारेण शंकां दर्श
यन परिहरति मैव किमेवमिति यतः शंकामात्रेणनुफललाभाव एव न भवति एवं शंकानकार्य्या कीदृशी कार्य्येत्यपेक्षायामाह एवं तु शंकितं
व्यमिति क्वचिद्वह्निजन्यो धूमः क्वचिदन्यजन्य इति विकल्पोऽपि न संभवति धूमात्मककार्य्यस्यैकजात्यादित्याशंकते नेन चवाच्यमिति ॥

क्वचिदिति घटप्रत्यक्षस्येंद्रियजत्वे इंद्रियानुमितेरनुमानजन्यत्वे धर्मज्ञानस्य शब्दजन्यत्वेपि त्रिषु यथा ज्ञानत्वाख्यैका जातिस्तथा वह्नि
नादितरप्रयोज्ये धूमेप्येका जातिरस्त्विति न च भिन्नकारणप्रयोज्ययोर्घटपटयोर्वैजात्यमेव नइंद्रियादिप्रयोज्यानामपि साक्षात्कारत्वादिना ।
वैजात्यं न च धूमे तथास्त्वीत्याशयेन शंकते न चेंद्रियादीनामिति । इंद्रियादीनि ज्ञानतायामपि प्रयोजकानि अन्यथा तस्यानुगतका
रणांतराभावेनाकस्मिकतापत्तेः न चात्ममनःसंयोगस्तदवच्छिन्नप्रयोजकस्तस्य दूषयिष्यमाणत्वात् न च व्यभिचार एकशक्ति
मत्वेन तथात्वात् तथा वह्नितदन्ययोरपि धूमत्वावच्छिन्नं प्रतिकारणतायाः शंक्यमानत्वमिति भावः । ननु कारणस्य ज्ञानसामान्य
कारणस्यानुगतस्य एकशक्तिमत्वेनेंद्रियादेरेव । अथ ज्ञानत्वस्य प्रयोजकं नेंद्रियादिकं किंतु साक्षात्कारत्वादीनामेव प्रयो
जकमित्युच्यते तदा वह्निरपि न धूमसामान्यप्रयोजकं किंतु धूमगतविशेष एव प्रयोजको धूमत्वं तु ज्ञानतुल्यमित्येवं शंकि
ष्यत इत्याह धूमेपि धूमे विशेष एव धूमगतविशेष एव वह्नेः प्रयोजकत्वमित्यर्थः । इंद्रियादि । प्रयोजकसाक्षात्त्वादिवद्धूमजाति
विशेषो न दृश्यत इति योग्यत्वानुपलब्ध्या बाधं शंकते न दृश्यत इति अविकल्पत्वाद्वह्निशिष्टज्ञानाविषयत्वात् नानुपलंभमात्रमभावनिश्चा
यकं किंतु योग्यताविशेषितं न च विशेषग्रहसामग्री तदास्ति वह्निप्रयोज्यधूमगतविशेषस्य हेतुत्वं न तु प्रयोज्यधूमगतविशेषप्रतियोगिकतया

तज्ज्ञाननिरूप्यत्वाद्यदि च जातिर्नसप्रतियोगिका तदापि चान्वयव्यतिरेकाभ्यां हेत्वं तत्प्रयोज्य जातिविशेषज्ञानमेव तादृशजातिग्रहे
हेतुरिति वस्तुतस्तृणारणिमणिजन्यवह्नौ जातिविशेषग्रहो यथा नायातः प्रथमदर्शनात्तथेहापीति शक्यते वक्तुं न चैवं
धूमसामान्यं किं प्रयोजकं स्यात् न च धूमविशेषसामग्रीषु धूमसामग्रीत्वं किंचिदस्तीति चेन्न ज्ञानत्ववदुपपत्तेः तत्रास्त्यनुगतं का
रणमिति वैधर्म्यं शंकते। आत्ममनोयोग इति इच्छादय इत्यादिपदेन द्वेषसुखादीनां परिग्रहः न विच्छात्वादिप्रयोजकसामग्रीसहकारे
णात्ममनःसंयोग इच्छादिकमपि जनयिष्यति सहकारिविशेषाधीनत्वात् कार्यविशेषजनने सामान्यकारणस्य तथा च यथा ज्ञानसामग्री
मादाय ज्ञानमिव मिच्छादिसामग्रीमादायेच्छादिकमपीति नैतावता ज्ञानत्वप्रयोजकता हीयत इति चेदत्रमेव मिलाय यदि ज्ञानमेव जनयती
ति नियमं तदेदमापादितं अन्यथा ज्ञानत्वस्यापि नित्यज्ञानवृत्तित्वेन तत्प्रयोज्यतानुपपत्तेः यदि च प्रत्यक्षादिवृत्ति ज्ञानतायां किं प्रयो
जकमिति संकायामिदमुत्तरं तदा अतिप्रसंगः यदि च तत्सामग्रीसहिता सामग्र्योत्पि केमुच्यते तदा तुल्यमविशेषसामग्रीसाम
ग्रीसहितो धूमे पीति भावः। यदि चेति मीमांसकानां शंका नैयायिकानां शक्तिरनंगीकारादिति विद्यासागरस्तन्न आत्ममनः
संयोगेन ज्ञानजनने दृष्टविशेषः सहकारीति नैयायिकानां शंका काचिदस्ति ज्ञानजनकेषु शक्तिभेदानुगतः सर्वकारणमिति

कारणताप्रयोजकं तदवच्छिन्नकारणमित्यर्थः शक्तिमत्त्वं कारणादभिन्ना शक्तिरित्यभिप्रायेण वा कारणपदं । ज्ञानत्वजातिर्वेति साहित्येनित्य
तया सर्वस्मात् ज्ञानात् प्राक् सत्तीति तस्या एव ज्ञानत्वं यथासिद्धत्वं कल्प्यते यद्वा जन्यज्ञानस्य ज्ञानत्वविशिष्टस्य तदात्मनोत्यात्तिर्विशेषणी
भूतज्ञानत्वाधीनेत्ति विशिष्टातिरिक्तवादिनां तन्मतं ज्ञानप्रागभावो वेति कॢप्तं हि प्रागभावस्य कारणत्वं तदेव त्या[illegible]ण्यं तादृतत्वापी
तितव्यनुष्टयं धूमत्वप्रयोजकमित्यर्थः दृष्टव्यभिचारइति दृष्टानामिंद्रियलिंगादीनां जन्यज्ञानभावे व्यभिचारादित्यर्थः ।
अस्य दृष्ट इति व्यभिचार इत्यनुषंगः तन्निश्चयोऽदृष्टकारणे निश्चयः अन्यत्रेति व्यभिचारनिश्चयादन्यत्र कारणांतरस्य तिश्च
योस्तु धूमे तु वह्निव्यभिचारसंशयाद्दृष्टकारणांतरसंशयो भविष्यति यद्यपि व्यभिचारो न दृष्टो न वा दृश्यते तथापि न द्रुतस्त इति नि
श्चयाभावो नियामकाभावादिति भावः प्रतिवाद्यनुमानादीति प्रतिवादिशरीरं सात्मकं प्राणादिमत्त्वात् अत्र शरीरवत् इत्यनुमा
नाभादेकस्य प्रबोधार्थं कथाप्रवृत्तिः आदिपरानूपरच्चैतन्यानुमानपरास्फुरणाभावानुमानं च न स्यात् नन्वश्च किमुद्दिश्य
साधकं बाधकं वा ब्रूयादिति कथापि न स्यादिति भावः । शंकामनिच्छतोपि व्याघातइति वक्तुं प्रथमतोऽतिप्रसंगमाह धूमवह्नि
द्वह्नेरपीति अयं देशोऽवर्तमानवह्निरित्यपि मदनुमानं स्यात् तदनुमानत्वप्रसंजकं सामग्री साम्यमाह सामग्रीति पक्षधर्म

त्वाद्देर्दोषस्य च समानत्वाद्धूमाद्वह्न्यनुमानं प्रमाणं वक्ष्यैरवमेवानुमानप्रमाणाभिनिवेशित्वाद्यनुपपत्तिरित्यर्थः वह्निव्यतिरेकेन धूमदर्शने शंकेवनोदेति
व्याघातादितिचेन्नहि सर्वासामपि संकानामप्रशंकानेतिवदतस्तवापिव्याघात इत्याह साधारणेनेत्यादिपदेनविशेषादर्शनपरिग्रहः तद्धीति
व्याघातात्मनोविशेषस्यदर्शने व्याघातस्वरूपमिति मिश्राः आहावदृष्टानुप्रेक्षा आदिपदाद्वाक्याभासादिपरिग्रहः कूटमस्तदर्थविषयकं
यदिपार्थिवत्वं लोहलेख्यत्वं व्यभिचारेत्तर्हि प्रमेयं तस्यादित्यपिव्यभिचारशंकावारकं स्यादित्यर्थः। कूटमिति इत्तिवास्तवाद्याप्याद्वात्त्व
स्येव व्यापकस्य प्रसंजनमित्यर्थः तर्हि तर्कस्वरूपमेवैतः तत्राग्रेदूष्यमित्याह न तस्य तर्क इति। प्रमाणवत्प्रमितविषयत्वेन तत्प्रशादित्व
मेव तस्यादिति तर्केन निरस्यत्वादित्यर्थः यस्मादेवमुपेक्षादिजत्वं न संभवति तस्मादन्यजन्यत्वं वाच्यमित्याह तस्मादिति आहावादिज
त्वपक्षस्य दुष्टत्वात् शंकायां सत्यामेवेति तथा च शंकायां सत्यामेव व्याघाताभिधाने न शंका। विशिष्टत्वाद्व्याघातस्य विशेषणविशेष्ययो
रेकप्रमाणविषयत्वादित्यर्थः इति विद्यासागरस्त्वत्यं शंकायां व्याघातविशेषणविशेषणत्वे मानाभावात् यतः शंकानिमित्त
को व्याघातस्ततोऽप्रामाणिकस्य निमित्तत्वासंभवाच्छंकापि अप्रामाणिकी स्यादित्यर्थः इत्येव व्याख्येयं अन्वयमुखेनोपपाद्य
व्यतिरेकमुखेनोपपादयति यदीति शंकमानेति यथाशंकमानस्यममव्याघातस्तथानशून्यस्यतवापि स्वक्रियाव्याघातस्यात्

क

शंकासदसत्त्वयोर्थ्या। घाताप्रयोजकत्वादित्यर्थः। ननु स्वरूपेण विशेषयोरवस्थानं क्वचिदपीति सत्यपि पुरोवर्त्तिनि पुरु
षत्वे न क्रमेपि संशयोच्छेदात् सत्यपि च नदत्तात्र संशयोनुत्पन्नेन दर्शनजन्य संस्कारयोरन्यतरस्यैव विरोधी त्यर्थः यावद्द्रव्यभा
विनो विशेषस्य निश्चितत्वात् संशयो भवेत्तत्रैवेत्यत आह यावदिति श्यामरूपस्येत्यर्थः। ननु प्रतिनिधर्मत्वस्य प्रतिकूलो
विरोधी धर्मः पीनरक्तादिः। संशयो यस्मादिति आक्षिप्य कुंभकारस्य पाकनिष्पन्नभस्माद्यावरणे नैव दर्शनतः वीक्षणस्य कि रू
मर्थं रक्तो नवा कदारंभकः परमाणुरधुना रक्तो नवेति पाकजन्यरूपविशेषो रक्तपीतादिः विद्यासागरस्तु पाकजन्यत्व
संशयो ननु रक्तिमगुणाद्युत्पत्तिपूर्वपक्षत्वायितत्वात् सत्यमेव परं तु तत्राप्यनुपपत्तिरस्तु तेषां पूर्वं पाकजत्वस्योपलंभादिति। यश्च त्वेवो
न त्रिंशत्। एकदा घातविषयत्वे शंकायां दोषमुद्भाव्य व्याघातेनाप्रयत्ने विकल्प्य दूषयति यदि चेति अप्रमाशयोर्व्याघातस्याप्रयोजनत्वे
त्वादिकेनाप्युच्यते अनवस्थस्य शंका वा आश्रयः किं वा व्यभिचारः आद्ये शंकाया व्याघाताश्रयभूतायोः शंका माभूदाश्रयभूता तस्मादेवेति
न व्याप्तिर्विषयः द्वितीये त्वाह यदि चेति अनादीति अनादिसिद्धा मूलभूता व्याप्तिर्येषां तेन तथा अनादिपुरुषपरंपरायातत्वं बुद्धिधारा
त्तित्वमनादिसिद्धित्वेन न युगपद्व्याप्तिग्रहापेक्षा अनवस्था असंज्ञातविरोधित्वया च तत्त्वप्रतिष्ठत्वाद्बलवत्त्वरा संतः आगंतुकं

व्यभिचारसंशयं शमयस्यंतीत्याशयः।७ तादृशस्यापीति आभासत्वं व्याघातसाधकत्वं चेति विरुद्धद्वयसमुच्चयात्मकव्याघातापत्तेरित्यर्थः। अयं व्या
घातस्तद्यातनापादयितुं शक्यते व्याघ्यमंगीकारेण तस्याभासत्वादित्याशंक्याह स कथं नेति यथातथाभासरूपा व्याघात आपद्य
ते तथा मयापि शवचन आपादयितुमित्यर्थः।९ एवं व्याघातसदसद्वयोः संकामापाद्य न्याय्या चार्थ्येण शंकासदसद्वयोरनुमा
नास्तित्वे युक्त्यभिधायकं वाक्यं वाक्यमुक्तं तदस्मत्पक्षेपि वक्तुं शक्यत इति तन्मूलकूटन्यायापातो भवतीत्युपहसन्नाह तस्मा
दिति यत्स्व्याघातसत्वासत्वयोः शंकास्यादेव तस्मादस्मिन्नर्थेऽस्माभिरपि तत्रार्थे वन खलु दूपठा किंतु स्वप ठेव अर्थाभेदात्
१ कथं स्वेष्टत्वमित्याशंक्याह अन्यथाकरमिति अन्यथाकारं यथास्यात्तथा क्रियंत स्वदाराणि कृत्वेत्यर्थः। इति विद्यासागरस्य योजं क्रियंत्स्वदाराणि ना
त्वज्ञात्वा अन्यथाकारं न्नदुघटेतिमि अस्मत्कृता था क्रियंत्स्वदाराणएस न्यथाकृता न दुष्पटेत्य न्वयेसिद्धाप्रयोगत्वाभावादन्यथैवं कथमि
त्थं स्वसिद्धाप्रयोगश्चेति सूत्रेण प्रयोगस्यादिति शंकाचेदनुमास्त्येव न चेच्छंकातनस्तरां। व्याघातावधिर्दा शंका तर्कः शंकावधिर्मतइत्या
चार्यगाथामन्यथाकारं पठति व्याघातो यदीति यदि व्याघातस्तदा शंकास्त्येव शंकामंतरेण व्याघातानवतारात् न चेद्व्याघातस्तदा
सुतरां शंकास्ति प्रतिबंधकाभावात् अथ व्याघात एवावधिः शंका याश्चावधिः सति हि विशेषदर्शनरूपे व्याघातज्ञाने शंका न जायते।

तदुभयपक्षानंतरं किमत्रमानं संभवत्यतः शंकाजनतापक्षमानं तत्स्वीकार्य्यं न चेच्छंका तर्हि तर्हि मृततं [redacted] त्वहादव्यभ मिति विततं पाति अत्रापरः शिष्यानां वीतस्य / इत्याह
[redacted]

पूर्वोचनस्यतीति चेदित्यस्यानुषंगः दूषयति तर्कः शंकावधिकुतः व्याघातदर्शनजनकेन तर्केन शंकायाश्चावधिपर्यवसानं कुतस्तस्या
पियाप्तिमूलकतया शंकांतरस्यावश्यकत्वादित्यर्थः। यद्वा न चेच्छंका ततस्तदामित्यत्रैवोपपत्तिर्व्याघातावधिराशंकेति व्याघाततांताहि
शंकातदभावे सुतरांस्यादित्यर्थः। तर्कः शंकावधिर्मत इत्याचार्योक्तं दूषयति तर्कः शंकावधिः सएव कुतः विपक्षबाधकस्तर्क एव नावत
रतितन्मूलव्याप्तौ शंकाया बाधकाभावात्तत्रापि तर्कपरंपरास्वीकारेऽनवस्थानात्। यद्वा शंकाचेदनुमास्त्येव स्यात् आचार्यकारिकायां व्याघातावं ता
धिराशंकातर्कः शंकावधिर्मत इत्येकदेशस्यैव दूषणं प्रतिज्ञेयं हेतुस्तु व्याघातो यदीति पूर्वोक्त एव अयमाशयः धूमस्य दृश्यमान
स्य न वह्निव्यभिचारशंकासंदेहे वोपलब्धेः किंतु कालांतरीयस्य देशांतरीयस्य वा न चैवमयमेव धूमो वह्निव्यभिचारी न वेति
शंका जायते यदि च वह्निमद्वृत्तिः कथं वह्न्यभाववद्वृत्तिर्भवेदित्युक्तं रंतदा सति तदा नूनं तयोर्विरोधोवधृतोस्ति सएव नियमघटितः कथ
मवधार्यद्दृत्याशंक्याह तर्कः शंकावधिरिति तथा च धूमो यदि वह्निव्यभिचारी स्यात् व्यधिकरणो वह्निजन्यो वह्न्यसमवहितो न न
जन्यश्च जन्य एव न स्यादिति तर्केण शंकावारणीया अथ वह्न्यसमवहिता जन्यत्वमसिद्धं कदाचिद्वह्न्यसमवहितादपि भविष्य
तीति शंकायां सेतदा व्याघातादेव शंकानिवर्तनीयेति तदाह व्याघातावधिराशंकेति तदेवं समुदायमनूद्य दूषयति कुतः कीदृशो

व्याघातेनोक्तत्वम् यदि कथापूर्वत्वादिकासापि संभवेन पेक्षोपपद्यते। अथ धूमार्थिनो वह्नौ न नियतप्रवृत्तिः स्यात् कदाचिदन्यत्रापि प्रवृ
त्तिः स्यान्न त्वत्र तदस्मानादावित्युच्यते प्रवृत्तिसंभवात्तु अयमेतादृशसंकास्वरससवाहिनीचेन्न शंकापिशाचीत्वेन दूतिकरी। अन्वा
चनात्स्येवेति चेत्त्र धूमे कार्यत्वेनालात्मकावगमिस्यवह्निसमवहितजन्यवह्निसमवहितजन्यत्वाधारणस्य दर्शनात्त्र दापत्तेदु
र्वारत्वात् यत्रभ्रमात्मिकृतात्र हि व्याघातः शंकाश्रितः किंतु स्वक्रियैव शंकाप्रतिबंधिकेति खंडनमप्यद्भुतं न तदसत्प्रवृत्तेः शंका
प्रतिबंधकत्वस्य कृाप्यकल्पनात् क्रियाकारणीभूतनिश्चयस्य प्रमात्मकस्य कृाप्यसिद्धेः प्रमाभ्रमात्मत्वस्य खंडितत्वात्। 1
भ्रमात्तु न वस्तुसिद्धिः किंचाक्रियापि संभावनात एवोपपन्नाननिश्चयमपेक्षत इति न किंचिदेतत् ननु व्यभिचारशंकाया
मव्यभिचारस्यैकाकोटिरिति कुचिदव्यभिचारप्रमा यां तत्रैवानुमानभ्मानत्सिद्धमित्यत आह व्यभिचारस्येति अग्नेस्तस्यैव
धूमत्वस्यभावपरित्यागेन धूमान्वयोर्व्यभिचार इत्यर्थः। तत्र अन्यत्रानुमानं तत्रैव दृष्टत्वादेवेति भावः इत्यादु रिति तत्रापि व्यभि
चारादर्शनमात्रमाश्रयनाशान्न व्यभिचारासिद्धिरित्यस्वरसः। व्यावहारिकमणिर्वचनीयमव्यभिचारमादायैव शंकेति नुप
रमार्थः यद्वा विपक्षवृत्तित्वबाधकाद व्यभिचारा सिद्धिरिति दूषयित्वा प्रकारान्तरेणापि दूषयन्व्यभिचार इति एतादृशोऽन्न

घोगस्यगमकभावोपयोगी न भवतीत्याशंक्यतद्व्यादुर्घतः समकालदृष्टमनंतरंचनदृष्टं यद्वस्तुद्वयं गम्यगमकभावस्तूयं तत्राप्यसौ यथा एक
स्मिन्नहन्येव क्षेत्रेऽन्येवर्षे गल्पं दृष्टमनंतरस्मिन्नेव द्वयोर्नाशे आश्रयनाशाद्व्यभिचारिणि दृष्टस्तथापि न तत्र गम्यगमकभाव तथान्यत्र भविष्यतीत्यर्थः
॥ तृतीयं व्याप्तिलक्षणमाशंकते स्वाभाविक इति । अन्यस्येति नन्वयं पक्षोऽनुसंभवदुक्तिकः न ह्यन्यस्य संबंधोऽन्यस्य संबंधो भवतीति चेन्न हि यस्य
स्वाभाविकस्तस्येत्यर्थप्राप्तं न वादिवाक्यार्थप्राप्तिदुष्टत्वेनाप्युपपत्तिरित्याशयः । जघन्यत्वादंतमपि पक्षमादौ दूषयति विपरीतापत्तेरिति
असंबंधिनो व्याप्यव्यापकभावानापत्तयोः संबंधः संबंधिनो व्याप्यव्यापकाभावापत्त्योरसंबंध इति वैपरीत्यापत्तेः व्याप्यस्य व्यापकं
म व्याप्यस्य च व्याप्यत्वं स्यात्तथा चालं भवति व्याप्तिः स्यादित्याशयः । अन्यस्य संबंधोऽन्यस्य गमक इति वैपरीत्यमिति मितभाषिणां यथा
अग्नेरौष्ण्यं स्वाभाविकमुच्यते न तत्स्वरूपाश्रयत्वादेवं संबंधिस्वरूपाश्रयत्वात्संबंधः । स्वाभाविक इति प्रथमविकल्पार्थः । पुरुषस्य चैतन्यं
स्वाभाविकमिति वक्तव्यं न तद्भिन्नार्थ इति द्वितीयविकल्पस्य । अतिव्याप्तेरिति अन्वयोः संयोगे अव्याप्तेरिति नित्यत्वाकृतत्वकैर्यादसं त
बंधे पृथिवीत्वद्रव्यत्वयोश्च कार्यसमवाये । अत एवेति भूतलघटाभावसंबंधेऽतिव्याप्तेः धूमसंबंधे चाव्याप्तेरित्यर्थः व्याप्यनिरू
प्याविति व्याप्यत्वं हि व्याप्तिमत्त्वमिति तथा चात्माश्रय इति भावः संबंधो यद्यपि न संबंधिनो व्याप्या धूमसंयोगवति धूम
धूमाभावादेवं ॥

वह्निसंयोगाश्रयेन्धनद्रव्याभावान्न तथाप्यभ्युपेत्य दूषणांतरमाह संबंधिनो विव्याप्याद्भूमादधिकदेशकालवृत्तित्वमगृहीष्यमाणिनी
ह्यापि संबंधिनो व्यापकयोरधिकदेशकालवृत्तित्वसंभावनार्थं धूमेनाप्यनुमानायनियामकासंभवः संबंधो हि नानियामकसं
विनापि कस्मिंश्चित्काले अग्निधूमयोरवस्थानसंभवादित्यर्थः । नियामकायोगान्नचेतुर्थ इत्यर्थः । संबंधस्य व्याप्यत्वदृष्टिस्वाभाविकः
संबंधः इत्यस्य हि स्वव्याप्यः संबंधः इति पर्यवसितोऽर्थः । व्याप्यापेक्षया व्यापकस्याधिकवृत्तित्वं दाच्यमन्यथा व्याप्यव्यापकनिश्चयासंभवादेवं च
वह्निव्यतिरेकेनापि धूमावस्थानसंभवान्न धूमेन वह्न्यनुमानं स्यादित्यर्थ इति विधालागरस्तन्नसंभव्याप्यस्यापि संभवात् संभवेन तु क्वचित् दर्शनाद
पि संभवतीति । संबंधस्यैव व्याप्यत्वे स्यान्न तु संबंधिनोः इत्यनंतरस्यन [illegible] च धूमेन वह्न्यनुमानं न स्यादिति मेथिलानां व्याख्यानं व्याख्येयासं [illegible]
वादिकिं च संबंधिस्वभावव्याप्याय संबंधिनोः संबंधः स्वाभाविको व्याप्तिरित्यनसंबंधिनो व्याप्यताप्रतीते धूमेन वह्न्यनुमानेना
नुपपत्तेः स्यादिति इदं नु चिंत्यते कथमयमर्थः स्यादिति तस्य तत्रानुशासनादिति शब्दार्थो न विकल्पनाईः मेवं स्वभावप्रयुक्त इत्यर्थे पि स्वा
भाविकशब्दः प्रयुज्यते प्रयुक्तत्वं च व्याप्यत्वमिति स्वभावेनैव प्रयुक्त इत्यर्थः समर्थः । पदविधिरिति पाणिनिस्मृतिमनुसृत्यैतत्कृतेविकल्पं दू ति
षयितुमाह नापि पंचम इति । प्रयुक्तत्वं व्याप्यत्वमिति पक्षे दूषिते अस्य पदस्योत्थानमिति तन्नाशंकितं अन्यपदं विनापि अज

२५१

251

नित इत्येतावतैव तदर्थप्राप्तेः स्वेन जन्यत्वे सति हेतुत्वं तदा निराकरणाय विशेषणीयं न चैतदश्लीलत्वाशयेनाहाकृतकस्येति अस्मिन्
पक्षे धूमादितत्संबंधस्य जन्यत्वात्तत्राव्याप्तिरिदा पक्षश्च बोध्यः कृतकत्वपदादिति जन्यसंबंधेन संयोगादिना हेतुतायामित्यर्थः स्वरूपासिद्धि
रसंभवः यद्यपि नित्यसंबंधेन हेतोर्लक्षणमित्यत्राव्याप्तिरेवं वक्तुमुचितं तथाप्यर्थविशेषणतया नित्यसंबंधेन हेतोर्लक्षणे त्वेदमिति धिया
गद्दूषिते जन्यसंबंधेन हेतावपि मा भूदिति चेन्न दालक्षणमात्रवृत्तित्वेनेदमुक्तं । समग्रा इति न किंचिदेकमेकस्मादित्यादिः जन्यसं
बंधस्यापि संबंधिनोः अन्यजननादित्यर्थः अंतत इत्यवसानेपीत्यर्थः अन्यस्यान्यकारणस्य निषेधोऽप्यषां सर्वोत्पत्तिमन्निमित्त
कारणानां निषेधा[illegible]संभवादित्यर्थः आदिपदेन ईश्वरपरिग्रहः । यद्यपि स्वाभाविकत्वमित्यपि शक्यं निर्वक्तुमशक्यत्वं तथापि सोऽप्युपा
धिखंडनेनैव निरसिष्यत इति भावः । निर्वक्तुमशक्यत्वादिति यथासंबंधि स्वभावादन्येनोपाधिनाननुयुक्तः स्वाभाविक इत्यपि शक्यं निर्वक्तुं तथा
पि प्रयुक्तपदार्थखंडनेन सोपि निरस्त एवेति भावः । यदि हि इत्तानेव विकल्पान्निराकृत्य विरतः स्यात्तदा परो ब्रूयान्ममान्य एव प्रकारोऽभि
त इति न्यूनो न्क्षिप्रस्तत्परिहारायेत्याह न्यूनतेति ॥ व्याप्तेश्चतुर्थलक्षणं शंकते अनौपाधिक इति एकसाध्याविनाभाव इति ।
एकेन साध्येन श्यामत्वादिनेमित्रातनयत्वशाकाद्याहार[illegible]परिणतिपरंपरापूर्वकत्वयोरविना[illegible]भावे साहचर्येपि सति

मिथःसंबंधशून्ययोःपरस्परं व्याप्यव्यापकभावहीनयोर्मध्ये यदन्यतरं शकाकाद्याहारपरिणतिपूर्वकत्वप्रत्ययोऽभावः साध्याभावव्याप्यः
म पत्रसाकाद्याहारपरिणतिपूर्वत्वाभावस्तत्रव्याप्त्यभाव इति व्याप्तेस्तत्शाकाद्याहारपरिणतिपूर्वकत्वधर्म उपाधिरित्यर्थः अत्र मिथःसंबंधशू
न्ययोरिति साधनाव्यापकत्वमुक्तं एकसाध्येत्यादिस्वरूपकीर्त्तनमात्रं व्यतिरेकोमुखं द्वारं यस्य साध्यव्यापकसाधनाव्यापकस्यैवा
भाव इदृशो भवतीति साध्यव्यापकत्वे सति साधनाव्यापकत्वे पर्य्यवसितोर्थ इत्याशय इति विद्यासागरः वस्तुतस्तु विषमव्याप्तस्योपाधि
नावारणाय एकसाध्याविनाभाव इति एकेन हेतुना यत्साध्यं तद्विनाभावे सति तेन साध्यव्याप्यत्वं तत्त्वं यदस्यपसाध्याभावाविनाभावीत्य
नेन साध्यव्यापकत्वं मिथःसंबंधशून्ययोरित्यनेन साधनाव्यापकत्वं । अतएवाह तद्धर्मभूतां हि व्याप्तिरिति उपाधिगतां हि साध्यव्याप्तिरि
त्यर्थः।स उपाधिर्यदन्यतर इत्युद्देश्यविधेयभावं वैपरीत्येन परिहरति यदन्यतरः स उपाधिरिति अन्यतरप्रतियोगी स उपाधिरित्यर्थः। उपाधेः साध्य
व्याप्यत्वे भट्टाचार्य्यसम्मतिमाह। तदाहुरिति अन्ये साध्यव्यभिचारिण इत्यर्थः तैः पक्षेदृष्टैरपि न व्यापकांशावधारणं नानुमितिरित्यर्थः अथैवं
साध्यव्यापकत्वे सतीति व्यापकतांशमात्रोद्भावनं मूलेन युक्तं स्यादिति चेन्न साध्यं व्यापकं यस्येतत्साध्यव्यापकं साध्यव्याप्यमित्यपास्तम् इत्यर्थः
यद्वा व्याप्तिविरोधिकस्य प्रदर्शनमात्रपरं तदिति संदिग्धोपाधौ भट्टाचार्य्याणामेव सम्मतिमाह यावदेवेति विपक्षस्येति पक्षीयं सप्तम्यर्थः अव्यतिरे

किलं सद्भावेशतांशेनापि शंकितो पाधिद्वारेण हेतो यावद्वंकतेन तावद्धेतोगमनिकावलं साध्यनिश्चयसामर्थ्यं कृतो न कुतोपि व्याप्त्यासकांग
त विकलत्वादिभावः । पक्षेतरत्वइति पर्वतो वह्निमान धूमादित्यत्र पर्वतेतरत्वादेरप्यसंबंधेन वह्निव्यापकत्वेऽति व्याप्तिः न च पक्षे वस्तु
तो वह्निमति व्यभिचारः तथापि पर्वतावृत्तिवह्निव्यापकत्वात् साध्यपदं तु न तासाध्यतावच्छेदकावच्छिन्नपरं वा युः प्रत्यक्षः
प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्ते व्याप्त्यापत्तेः न च तथापि पक्षेतरत्वं न साध्यव्यापकमिति वाच्यं उद्भूतरूपतुल्य
त्वात् यदि च महत्त्वसमानाधिकरणं तत्तथा तदा वह्निविशेषवद्वृत्तित्वपर्वतेतरत्वं तथेति परितुल्यतामिति । मितभावि
रूपां तु व्यापकत्वं ह्यधिकदेशकालवृत्तित्वं तच्च पक्षेतरेप्यस्ति वह्निमत्वाभावे च पक्षेतरत्वस्य दर्शनात् न हि व्याप्यो तु पाद
तं कत्वं व्यापकं त्वनित्यं त्यत्वस्य कृतकत्वव्यापकत्वाभावप्रसंगात् न हि कृतकत्वे नित्यत्वं संसर्गाभावात्मकादनित्यत्वादुत्
पादने व्याप्यप्रमेति त्वपक्षेतरत्वस्यापि न हि अद्रिमत्वे न पक्षेतरत्वमनुमीयात् पक्षेपि भावात् अनुमीयमानत्वाभावे वि
व्याप्तिग्रहणदशायामग्रे धूमव्यापकत्वदर्शनादिति याख्या तं तत्र साध्यसमानाधिकरणीत्यंताभावाप्रतियोगिकत्वमेव
त व्यापकमिति सुवचत्वात् ननु पक्षेतरोलहाडूमि चेन्नानुमानोच्छेदापत्तेः ननु वाऽऽश्व तत्र दोषो तो नोपाधिरस्तीत्याशंक्याह ।

न्यथा निरुपाधिसंबंधिसंबंधित्वमिति यद्भिमुक्तं कृतकत्वादित्यत्र कृतकत्वस्य घटादौ साध्यसहचारिणस्तदभावसहचारो विरुद्ध इति अत्र वि
दभेदोपन्यासावश्यकत्वेनादृशस्य तत्रापरस्यासंभवाद्बुद्धौ तरत्वमेवोपाधिरित्याशयः। विद्यासागरस्तु दुष्टकारणजन्यस्यैव शुक्तिरूप्या
दिज्ञानस्य बाध्यत्वान्निरुपाधिसंबंधत्वे कूटकारणजन्यतया प्रमाणमेव स्यादिति बाधो न स्यादित्यर्थ इत्याह बाधेनेति कुसुमांजलावा
प्यवाक्यं अन्येन व्यभिचारेण प्रतिकूलतर्केणोनेत्यर्थः। अत एव पृथिवीत्वस्य गंधव्याप्यस्यापि गंधप्रागभावकालावच्छिन्नस्य घटस्य पक्षे
बाधो दृश्यत इति कथमेतदित्यपास्तं तत्र ज्ञानस्यैवानुदयेन दुष्टकारणजज्ञानस्थलीयस्यास्यानवतारात्। एतदर्थमपीति बाधोन्नीतपदे
नरानितरिक्तपदेन रइति विशेषणीयमित्यर्थः। साधनाव्यापकत्वं साधननिष्ठव्याप्तिनिरूपकत्वमित्याशयेन दूषयति तथापीति। अदृष्टेति
वह्नि न दृष्टो व्यभिचारो यस्य अर्थात् हेतो एवंभूतं साध्यं यस्य न दृष्टो व्यभिचारो येन साध्येन तादृशसाध्यकत्वमितिमितिवार्थः। वस्तुगत्ये
ति। द्वितिःसोका कार्यत्वात् घटवदित्यत्र रूपत्वमप्युपाधिः स्यादित्यर्थः। व्यभिचारदर्शनात्पंताभावविवक्षायामाह तद्दृशेन
इति व्याप्तिग्रहणकाले इति रूपमवधार्य इत्यत्राप्यनुषंजनीयं साध्यत्वं तु द्विकर्मत्वं सद्भावेन व्यापकादृष्टव्यभिचारत्वं
साध्यव्यापकत्वमिति निशंकते संभावितव्यापकेति किंरूपतयेति केन प्रकारेणेत्यर्थः। इदमेवाश्वाद्येव साधनं नेदं धूमादीति

विनाशवादनिरूपण-२

अथाव्यापकत्वं स्वसामानाधिकरण्यात्यंताभावप्रतियोगित्वं तादृशाभावाप्रतियोगित्वं तु व्यापकत्वमिति चेन्न। अत्यंताभावस्य
प्रागुक्तदोषेणानिर्वचनीयत्वात् प्रतियोगित्वं च तव्याप्तिनिरूपणमिति दिक्। यत्रेति हि साध्याव्यापकताग्राहकं निषिद्धत्वा
त्मकोपाधौ श्यामत्वादिकमस्तीत्यर्थः। साधनाव्यापकतासंदेहमुपपादयति मैत्रातनयत्वमिति न च यत्र यावंति मित्रातन
ये श्यामत्वे वास्ति तत्र निश्चयः संभवतीति वाच्यं तेत्रानुमानस्यैवाभावेन श्यामत्वस्योपाधित्वस्यैवाभावादिति मानाभावेना श्याम
न प्रदर्शनेन दूषयति मैत्रतनयत्वेनेति तथा च साधनव्यापकतानिश्चयादुपाधित्वमेव नास्ति कुतः संदिग्धोपाधित्वमिति भावः। सकलतादि
ति तथा च साधनव्यापकत्वमिति भावः। अन्योन्योपाधिना यदीश्वरासिद्धिमुक्ता तस्य सर्वज्ञत्वाद्यनुमानासिद्धिमाह एवं बुद्धिमदिति। ननुप
क्षेतरत्वं नोपाधिः साध्यसाधनसंबंधाव्यापकत्वात् अस्य व्याप्तिमहानसीयसाध्यसाधनसंबंधस्याव्यापकत्वात् तत्रापि साध्यसाधनसंबंध
त्वावच्छिन्नं प्रति व्यापकत्वात् प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वं चोपाधिः प्रत्यक्षांशे अयत्नप्रत्यक्षत्वसंबंधव्यापकत्वात् एवं मित्रातनयत्व स्या
श्यामत्वसंबंधव्यापकत्वात् शाकाद्याहारपरिणतेः पूर्वोक्तत्वस्यापि परिग्रह इत्याशंक्याह तथैवेति सर्वानुमानोच्छेदप्रसंगादेव यत्र
कार्यत्वसकर्तृकयोः संबंधस्तत्रादृष्टजन्यत्वमिति तस्यापि उपाधितापत्तेरिति भिन्नभाविणां वस्तुतस्तु साध्यत्वव्यापकतयोरनिरूपणात्

साधनाव्यापकतायानिरुपाधित्वमशक्यत्वाद्वेति प्रागुक्तदोषादेवेत्यर्थः यत्र चेत्यनेन यज्ञियहिंसायाधर्मजनकत्वे साध्ये निषि
द्धस्यसाधनाव्यापकतागृहीतार्थं तदभावो ग्राह्यः स चाभवः पक्षेप्रत्यक्षेणायं ग्राह्योभवत्यतीन्द्रियत्वादिति यागांगहिंसाया न
न निषिद्धा विहितत्वाद्यागवदित्येवं तस्यानुमेयतावाच्यान चैवमनुमानासंभवनिसाहिंसानिषिद्धा हिंसात्वात् क्रतुवा
न ह्यहिंसावदितिसत्प्रतिपक्षसंभवात् एवं पार्थिवत्वे लोहलेख्यत्वे साध्ये प्रशिथिलावयवत्वस्योपाधेरभावो वज्रादावनु
मितः वज्रन्नसौ प्रशिलावयवं लोहालेख्यत्वाद्वायुवदिति अन्यच हेतोर्वज्रं प्रशिलावयवं पार्थिवत्वात् काष्ठवदिति सो
पाधीकियभागं पार्थिवत्वेनैव सत्प्रतिपक्षस्य कर्तुं शक्यत्वान्न साधनाव्यापकत्वनिश्चयः संभवतीत्यर्थः तथा सतीति अनी व
द्विधोपाधौ साधनाव्यापकत्वानिश्चये सतीत्यर्थः निर्व्यूढमितिसिद्धमित्यर्थः अपसिद्धान्तापत्त्यादूषणमिति तदृर्शनस्यानमिति ते
साधनाव्यापकत्वनिश्चयस्यानमुपाधिनिश्चयस्यानमितिवार्थः तथा च वह्निना धूमे साध्ये आर्द्रेंधनस्य साधनाव्यापकता अयोगोलके प्र
त्यक्षेण निश्चितेतिन तदुपाधिरित्याशयः अयोगोलकमार्द्रेंधनवद्वह्निमत्वादित्यप्रयोजके नापि हेतुनाप्रत्यक्षेंधनस्यवाधेपि अतीन्द्रियेंधनसिद्धौ
साधनव्यापकत्वस्यादित्यर्थः इंधनत्वावच्छेदेनैव प्रत्यक्षत्वान्न साधने वाधः इति शंकते नेन चेत्तु यथापाके नानुमीयमानोवह्निर्जठरेप्रत्य

द्रोवाधिनद्रूप्यंतीद्रियापिजाठरानलः सिद्धतीनिरस्तीकारात् आदिपदेन नन्नतरूपादीनां परिग्रहः साधनाव्यापकत्वं निरस्य
साध्यव्यापकतां निरस्यति अव्यापकत्वादोषउपाधिलक्षणइति शेषः श्यामकारणत्वे न तेषामनुगमभाशंक्याह तुरितिवि
द्यासागरस्तन्नैर्द्रनीलश्यामस्यापितद्व्याप्यत्वादुक्तरग्रंथविरोधात् अक्रियमाणश्यामकारणत्वेनाक्रियमाणत्वेन नानु
गमभाशंक्याह —वेतिव्याख्येयं अथ शुद्धसाध्याव्यापकस्यापि विशिष्टसाध्यव्यापकतया साध्याव्यापकत्वमदोषमिति
भावेन शंकते शरीरश्यामत्वं साध्यमिति साधनावच्छेदकाश्रयः पर्यवसितं साध्यमितिकार्थः व्याप्तिरिति यन्निरूपिता व्याप्ति
र्हेनाभिमतातत्र उपाधिर्वाच्यो न च विशिष्टनिरूपिता व्याप्तिरिति भावः पुरुषश्यामत्वेनेति पुरुषश्यामत्वावच्छिन्ना व्याप्तिरित्यर्थः
न च तथा व्याप्यभावे कथं पुरुषश्यामत्वसिद्धिरित्यत आह हेतुपक्षधर्मतयेति हेतोः पक्षधर्मतयेत्यर्थः । यदि पुरुषश्यामत्व
मेव साध्यं तदाभेत्रः पुरुषश्याम इति प्रतिज्ञा स्यात्तत्र दोषमाह पुरुषपदस्येति नहि मैत्रे पुरुषत्वासमानाधिकरणं श्यामत्वं
प्रसक्तं येन तद्व्यवच्छेदाय पुरुषपदं प्रयुंक्ते — तिभावः पुरुषमात्रनिष्ठश्यामतासिद्ध्ये पुरुषविशेषणमन्यथा कं त्व
ला[illegible]रिश्यामतापि परं पर्यासंयुक्तसमवायेन सिद्ध्यन्तेन पुरुषस्येव श्यामत्वं पक्षीनरपुरुषलभ्यं तन्न सिद्धिमुरुषस

मवेन सिद्धिरित्याशयेन परंपरेत्यादि संयुक्तसमवेतेनेति धूमव्याप्तिह्रवस्येवेति यवच्छेदस्तत्र मास्त्विति तस्य केवलीयत्वात्तथापि संयुक्तसमवायेन ननु पु
रुषस्येव कालेनु समवायेनैवेति भवति परंपरासंबंधेन व्यवच्छेद्यन्यद्वावच्छेदकमिति संयुक्तपुरुषश्यामपुरुषेति संयुक्तपुरुषपुरुषत्वव्याप्तित्वं
परंपरासंबंधेनान्यगतेनरूपमपीतितदपि सिद्धेदिति भावः पुरुषेण श्यामेन संयुक्तो यः पुरुषस्तत्र श्यामतापुरुषगतासिद्धेदेवपरंपरा
संबंधेन बाधाभावात् पुरुषमात्रसमवेतत्वाच्च तस्य न च साध्यासाधनेति तथा च श्यामत्वसध्येकहेतोः पुरुषपाधिसंकुरेदिति भावः ।
रूपादिसाक्षात्कारकरणेरिति श्राद्यादिपदेन स्पर्शादिपरिग्रहो द्वितीयेन स्पर्शादिसाक्षात्कारणस्य स्पर्शनादेर्ग्रहणेन सा
दित्वद्र्व्यत्व वायवीयत्वादेः परिग्रहः । तेन च चक्षुस्तेजसं रूपसाक्षात्कारणत्वात् प्रदीपवदित्यत्रोद्भूतरूपवत्त्वमुपाधिः स्यात्तदा चो
ष्णस्पर्शिणि शुद्धसाध्याव्यापकस्यापि साधनाव्यापकत्वादिति तन्माभूदिति न तथा विवक्षणीयं तथा स्पर्शनं वायवीयं स्पर्शादिषु
मध्ये स्पर्शस्यैव व्यंजकत्वात् व्यंजनाभिघातजवायुवदित्यत्रोद्भूतस्पर्शवत्त्वं घ्राणं पार्थिवं गंधादिषु मध्ये गंधस्यैव व्यंजकत्वात् व्यं
पकवदित्यत्रोद्भूतगंधवत्त्वमित्यादि दर्शनीयं । दार्ष्टान्तरे साधनेति साध्यसाधनसंबंधान्निष्टव्यभिचारमित्यत्र संबंधत्वावानिष्ठवेशनीयं यत्
साधनेतेन शुद्धसाध्यव्यापको व्यवच्छिद्यते यदि तदा साधनावच्छिन्नसाध्यव्यापकत्वं केवलसाध्यव्यापकोपाधेर्नास्तीति तत्राव्याप्तिः न हि तत्र सा

४ विशेषणत्वेनव्याप्यतासिद्धिः स्यादित्यर्थः व्याप्य हि विनिरकत्वेकाश्चरीरजन्यत्वादिसत्त्वशरीरपदं इत्यव्याप्यसिद्धिवारकतया सप्रयोजनमपि शरीरविशेषणं व्यर्थं [illegible]।

थनं विशेषणीभूय व्याप्यतावच्छेदकमव्यावर्तकत्वात् तस्य व्यभिचारसंकोचानद्दामस्यापीति सशंकाव्याहारपरिणतिपूर्वको मित्रातनयत्वादित्य
त्रभ्यामत्व स्यात्पर्थः इदमुपलक्षणं व्यभिचारनिश्चयदशायामे आर्द्रेन्धनादावव्याप्यापत्तिः ननु केवलसाध्यव्यापकोपाधिव्यवच्छेदायनेदं विशेष
णं येनाव्याप्तिस्यादिसाशंकते अथेति तथा च साधनावच्छिन्नसाध्यव्यापकोपाधिसंग्राहकतयेदं प्रयोजनवदेवेति भावः तदा विशेषणत्वेनि
यदिनव्यवच्छेदकं तदा साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वसाधोऽसमर्थमित्युच्यते तथा त्वाविस्फारित्यर्थः इदम
प्युपलक्षणं शब्दो नित्यः कृतकत्वादित्यत्र भावत्वेऽव्याप्तिरपि द्रोध्या। अन्वयव्यतिरेकानुमानाभासोपाधावव्याप्तिमुक्त्वा
व्यतिरेकानुमानाभासोपाधौ साध्यव्यापकत्वग्रहासंभवादव्याप्तिमाह किंचेत्यादिना आभासत्वाभिधानमुपाधिध्रौव्यार्थं
तच्च न संभवति विनाप्युपाधिम्पक्षधर्मतयाप्यासत्तेः एतेन भावात्तद्व्यतिरेकेपि व्यापकनियमो मा भूदसमव्याप्तिकयोर्धूमाग्न्यो(
यपत्तेरित्यत आह पक्षधर्मेति जीवच्छरीरमिति जीवत्पदं भागासिद्धिवारणाय वाधवारणाय च द्रव्यवदित्युक्ते सिद्धसाधनमिति अतिरिक्तांनं
विशेषणं तथापि सात्मकत्वेन सिद्धसाधनमासनाचनस्यादित्यत आह नेकेति तेनैकस्मिन्शरीरेऽनेकभोक्तृमत्त्वं साध्यं दशमद्रव्यवत्त्वं वा साध्यमिति
विद्यासागरः। निरुपाधिसंबंधस्याभासत्वासिद्धेः स्वरूपमुपाधिरूपं वा व्याः सचान्वयव्याप्तौ व्यतिरेकव्याप्तौ वा नाद्यः अनेकचेतनवत्त्वलक्षणे ले
विशेषणत्वेनव्याप्यतासिद्धिः

१० तीति वादः उपाधेर्व्यापकत्वप्रतिपादनेऽस्मात्तेः० न त्वनुपाधिर्भवतु साध्याभावव्यापकः परं तत्र स्वव्याप्यैव० न व्यतिरेकव्याप्तेति न साध्याभावाभावात्मकस्य साध्यव्याप्तिरि

स्य साध्यस्याप्रसिद्धेरुपाधेस्तद्व्यापकत्वग्रहासंभवादित्याहुः न व्याभासेदिति । व्यतिरेकीति विशेषणमसंभवद्योतनाय अभ्युपेत्य
साध्यप्रसिद्धिं दूषयति अन्यथेति क्वचित् स्वपक्षे परपक्षे वा पराभिमतस्य स्थापनार्थमभिमतस्य साध्यस्य निर्व्यापकत्वेरित्यर्थः ॥
अयमाशयः स्वपक्षे प्रसिद्धस्य साध्यस्य व्यापकता चेदुपाधेर्व्याप्तानदात्मके तोऽस्तत्र दृष्टान्त व न्वयित्वमदृष्टान्तावसाधारणताय दिपक्षे प्रसि
द्धिस्तदा उपाधेर्हेतुमन्मात्रवृत्तितया व्यभिचारज्ञानाधीनास्तामर्थ्यादहेतुदोषत्वाभावादनुमानापत्तिः सिद्धसाधनादनुमानवैय
र्थ्यं वा । उपाधेः साधनव्यापकत्वादनुपाधित्वं वेत्याशयः । व्यतिरेकव्याप्ताविति यत्तु पृथिव्यादिषट्द्रव्यातिरिक्तानेकद्रव्यवन्न
भवतीति न तत् प्रमाणादिमन्न भवति यथात्मेत्यादिमिस्तत्राभोगायतनत्वमुपाधिरित्यर्थः व्यतिरेके यद्व्याप्यमिति साधनाभावे ना
व्याप्यं साध्याभावरूपं तस्य व्याप्य उपाधिरभोगायतनत्वं यत्रोपाधिरभोगायतनत्वं न च प्रतिज्ञानसाध्यन्नास्तीत्यवश्यंभावन
यं व्याव वश्यक त्वेहेतुमाहान्यथेति उपाधिर्यदि न साध्याभावव्याप्यस्तदुपाधेः साध्येन सहानवयोपि क्वचित् स्यात् साध्या
ग भावाव्याप्यत्वे यत्रैव साध्याभावव्यभिचारस्तत्रैव साध्यापत्तौ साध्यानवयोपत्तिरित्याशंक्याहुः उपाधेरिति उपाधेरभोगायतन

साध्यापत्तिश्च न पक्षेऽनस्योपाधिमत्त्वाभावात् व्यतिरेकित्वेन तदप्रसंगाच्चेति उपाधिमति साध्यसत्त्वे प्रमाणादिमत्त्वमपि स्यादेव न स्य तद्व्याप्यत्वात्
ततः प्रमाणादिमत्त्वाभावो यो व्यतिरेकि साध्ये तद्व्यापकत्वान्नोपाधिः स्यादित्युपाधित्वभंगप्रसंग इति भावः ।

त्वस्य व्यतिरेकव्याप्तिर्यत्र साध्याभावो नास्ति तत्राभोगायतनत्वं त्वात्मीयस्याभ्युपेयात् अयमाशयो व्याप्यवृत्तिव्यतिरेकिनो धर्म
ता व्यतिरेकव्याप्तिनियतताऽव्यव्याप्तिरस्य यथा बाधात्वनीतपक्षेतरस्याप्युपाधिनापत्तिउपाधेय व्यापकं साध्याभावात्व
कं तस्य व्यतिरेकः साध्यमेव उपाधिव्यति[illegible]रेकस्याभोगायतनत्वव्यतिरेकस्य भोगायतनत्वस्य व्याप्यतया मंतव्य इति
परसाध्यापत्तिः कुत्रचित् साध्याभत्वव्यतिरेकावधारण एव पक्षपदाभङ्गावं व्यतिरेकित्व[illegible]स्वतिरित्यर्थः। ननु व्यापकाभावो ९
गा व्याप्याभाव[illegible] व्याप्यवृत्तिनियमो नाशुङ्उपाधेर्यद्व्यापकं न हृतिरेको न व्याप्यतया मंतव्य इत्यत आह समव्याप्तिकयोरिति
समव्याप्त्योरिदमेव साध्यमिदमेव साधनमिति यमाभावात्तत्रव्यतिरेके विव्यापकनियमो माभूद्समव्याप्तिकौ यो धूमाग्न्योरन्वयेयः सा
ध्यसाधनभाववत्वं पूर्वपरित्येन व्यतिरेके न साधनभावो यत्राव्यभिचारस्तत्र धूमाभाववृत्तिव्याप्तेस्तत्रापि व्यापकाभावस्य व्याप्यत्वेनेति अन्वये
य द्व्यापकं तद्भावो व्यतिरेके व्याप्य इत्यत्र केवलान्वयिनि व्यभिचार इत्यसमव्याप्तिकयोरिति ननु तर्हीदृशे व्यतिरेकिनि नोपाधिर्दोष इत्या
शंकते नच्चेति दोषांतरमिति हेत्वाभावतो भिन्नमित्यर्थः। तर्हि हेतौ नु वतगुणस्याव्याप्तिपक्षधर्मताभ्याम प्रमितस्ये वहेत्वाभावत्वादस्य
चपक्षधर्मस्य साध्यत्वहानिर्वक्तव्या न दर्थश्चोपाधिर ग्रीति नियमो न्यथाव्याप्तिमत्पक्षधर्मस्य हेतोराभासत्वेऽतिप्रसंग इत्यर्थ इति
पी

विद्यासागरस्तु चिंत्यं हेतोरदुष्टत्वाभावात् दोषांतरस्यस्वीकारात् तस्मादयं हेतुर्व्याप्यो नवा आद्येऽपसिद्धांतं क्वचिदपि साध्यव
त्यवृत्तिनीत्यं व्याप्तिर्हि अनौपाधिकसंबंधरूपा तदभावे श्चोपाधिरिति स चान्वयव्यतिरेकैश्च दूषित इति संकपन्नो निर्वचन दा
कारीकांदृशाभापते दिति। यत्तु उपाधेः प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मस्याप्रसिद्ध्या निर्वेधानुपपत्तिरिति दूष
णांतन्नयुक्तं येन धर्मेणोपाधिमान् सोपाधिरित्युच्यते तेन धर्मेण तेन संबंधेन तदभावदवान्निरुपाधिक इति निर्वचनात्
तथाहि धूमे साध्ये वह्निरार्द्रेंधनोपाधिमान् आर्द्रेंधनप्रभवो वह्निरिति उपाधिमत्तदभावव्यवहारः वह्निरार्द्रेंधनवानिति कम
त्रव्याप्यत्वेन न तु संबंधीति विषमव्याप्तय एवमार्द्रेंधनप्रभववह्निः नार्द्रेंधनवान् इत्यत्र च व्याप्यत्वेन संबंधे आर्द्रेंधनशून्य इति
प्रतीतेर्नानुपपत्तिरर्थ इदिव व्याप्यत्वघटनार्थो दोषः सदार्द्रेंधनं वह्नौ व्यापकत्वेनास्ति न त्वार्द्रेंधनवह्नौ वित्येव विषयः ननु यावत् व
साध्यव्यापकव्यापकत्वे यावत् साधनाव्यापकव्यापकसाध्यकत्वमेवानौपाधिकत्वं व्याप्तिः हेतुमन्निष्ठात्यंताभाव
प्रतियोगितानवच्छेदकसाध्यतावच्छिन्नसमानाधिकरण्यं हेतुतावच्छेदकरूपवत्त्वं वा साध्यसामान्यावच्छेदकहेतुताव
च्छेदकरूपं वा साऽस्तु हेतुसाध्यादिपदं त्वं धूमवह्न्यादिपरमिति न कोऽपि दोषः नचैवमपि अधिकरणत्वप्रतियोगित्वाभा

वत्वसंबंधवत्तानां व्याप्तिघटितत्वतया दुर्निरूपत्वमिति वाच्यं तेषां पदार्थान्तरत्वस्वीकारात् नचैवं साध्यसाधनभेदेनाऽनु न
गमो दोषाय कस्य का व्याप्तिरित्यननुगतस्यैव लक्षणत्वादित्याशयवानाह भवतु वेति ननु सत्त्व एवेति व्याप्तिसत्त्व एवेत्यर्थः
सदनुमित्यभिप्रायं किं वा कारणतावच्छेदकव्याप्त्यभिप्रायेण सत्येवं कारणैक्यं यदि तथा तथा च व्याप्तिज्ञानेयानुमितिं प्रतिने
यतेनेति निष्कर्षः व्याप्तिरेषैव्या अन्यथासिद्धिनिष्ठव्याप्तेरेव कारणतापदार्थत्वात् ननु मितिकारणीभूतव्याप्तिज्ञानविषयीभूताया व्याप्तिः
तैव चेत् कारणतावच्छेदकतदात्माश्रयः ननु तस्यामेव सा संभवति नहि सुशिक्षितोपि नटवटुः स्वस्कन्धमारोढुं क्षमते अथ व्याप्तिज्ञान कंधं
एवानुमितिकारणताव्याप्त्यातिरिकेति चेन्न ज्ञाने व्याप्तिविशेषणतयाविशिष्टनिष्ठयाव्याप्तेर्विशेषणोपि चेष्टापन्ने अथ व्याप्त्यन्तरं वाच्यं
तस्य तर्हि भिन्नजातीयतासिद्धये लक्षणान्तरं वाच्यं सजातीयस्य सजातीयसंबंधानाश्रयत्वात्तथा सति दोषमाह तद्भेदे चेति एकस्या व्याप्ते
न र्लक्षणमन्यत्र न वर्त्तत इत्यननुगमो दोषः भिन्नलक्षणकानेकव्याप्तिस्वीकारे च का साध्यसाधनयोर्व्याप्तिः का च व्याप्त्यनुमित्सा रित्स निद्धा
रितविशेषस्य लक्षणानुप्रवेशात् सनिवालक्षणे अन्यतरैव व्याप्तिरिति विनिगंतुमशक्यमिति निविद्यासागरस्तदनुयायी च तदनुद्धन्त्र न्व
यव्यतिरेकाभ्यामेव तदवगमसिद्धिर्यज्ज्ञानानन्तरमनुमितिः सा व्याप्त्यनुमितिकारणं तस्यैव चानुमानलक्षणेऽनुप्रवेशः

तथापि विनिगमनाविरह इति चेन्न हि सर्वैर्व्याप्तिरनुमितिहेतुः व्यभिचारोद्धारस्तत्तद्व्याप्तिज्ञानाव्यवहितप्राक्कालिकानुमितित्वेन तत्तद्व्या
व्याप्तिज्ञानत्वेन । वस्तुतस्तु व्याप्तीनां भिन्नानां लक्षणे प्रवेशे अननुगमः शक्यपरिहार जातिमत्वघटनया किंतु कारणतानग्रह एव तत्स्यात्
साध्यसाधनभेदेन भिन्नानां सर्वासां ज्ञातुमशक्यत्वात् तज्ज्ञानोत्तरानुमितौ तज्ज्ञानं हेतुरित्येवमपि केषांचिद्देवज्ञानसंभवात् । यत्र व्यभिचा
रादर्शने धूमवह्निसहचारज्ञानादेवानुमितिस्तत्र व्यभिचारश्च न च तदनुमितिव्यक्त्यंतर्भावेनापि कार्यतानग्रहो येन तत्र व्याप्तिज्ञानमनुमीयेत न
न वानुमितित्वं व्याप्तिज्ञानजन्या अनुमितित्वादित्यनुमितिः स्यात् दृष्टांतपक्षयोरेकव्याप्तिज्ञानाजन्यत्वादित्याहाननुगमेति । न च उक्तव्याप्ति
प्रकारेषु [illegible] व्याप्यसाध्यसंबंधिनावच्छेदकरूपवत्वं तज्ज्ञानं हेतुरित्यत आह विनिगमाविति अयं भावः किं गुरुव्याप्तिज्ञानोत्तरमनुमितिविरहोस्ति अथ
ते अथवा तत्रापि लघुशरीरव्याप्तेरेव ज्ञानं कल्प्यते नाद्यः धूमव्यापकवह्निसमानाधिकरणधूमवानयमिति शाब्दबोधानंतरमनुमानं अनुभव
सिद्धत्वात् नांत्यः अननुभूततादृशव्याप्तित्वेन कल्पनायामसंभवादिति अनुमितिनियत इत्यनुमितिं भवंती प्रयोजयतः अनुमितित्व
प व्याप्त्यनुकूलं ज्ञानं जनतेति यावत् वदंति नैयायिका इति शेषः नैयायिकादीनिति आदिपदेन वैशेषिकपरिग्रहः अतिरिक्तावि
ववषि विषयिभावानंगीकर्तृणां तेषां मते प्रमेयत्वस्य घटतत्प्रमास्वरूपस्य विषये घटे वृत्तावा[illegible]श्रयापत्ते वपक्षधर्मतास्यादित्यर्थः

त्व प्रमेयत्वपरंपरासंबंधमेव यद्यपि प्रमात्वं तथापि तदपि विषयघटितमेवेति हृदयं अनुभवत्वमेव प्रमात्वं प्रमेयत्वोपाधिघटकमिति चेन्न तथासति
अनुभवत्वमिति प्रमेयमिति च बुद्ध्योरैक्यापत्तेः अनुभवत्वमिति बुद्धौ समवायः प्रकाशते अनुभवत्वस्य प्रमेयमिति बुद्धौ तु विषयानुभवसं
भि बंधविषयादृतिं शेषदूति चेन्न तथाप्यनुभवत्वस्य प्रकारत्वे तथा अनुभवत्वाकाराप्रतिर्दुर्वारा समवायातिरिक्तस्य संबंधस्य भाने
पि अनुभवत्वस्यैव संबंधित्वात् यथा लोहितस्फटिक इति हृदयं। अथ नैयायिकानां प्रमेय विषय ताज विषयेऽपि तदादुर्न्या
याचार्याः प्रकाशस्य सत्तत्तदीयतामात्रनिबंधनः स्वभावविशेषो विषयतेति चेन्न घटज्ञानस्यापि पटविषयतापत्तेर्ज्ञान
त्वाविशेषात् तस्मात् घटज्ञानत्वमेव घटज्ञाने विषयता न च पटे सास्तीति नातिप्रसंग इति तेषां मतमिति भावः यदि च ज्ञान
न वृत्तिर्ज्ञानकरणजन्यतावच्छेदको धर्मविशेष एव विषयता तेन घटज्ञानस्य पटविषयता किं तु पटज्ञानस्य पटज्ञानकरणज
न्यतावच्छेदकत्वात् यथा अत एवानागतघटज्ञानमपि स विषयमिति तत्र घटेन्द्रियसन्निकर्ष जन्यज्ञानत्वं घटप्रसक्तो घट घ
व्याप्यजन्यज्ञानत्वं घटानुमित्यादाविति तदा नैष दोषः परं तु तथापि घटज्ञानविषयता अनुगता न स्यात् घटज्ञानकरणज
न्यत्वेनानुगमस्तु घटज्ञानत्वव्याप्तेनेति द्विस्यात्तथा चान्योन्याश्रय इति दिक्। सिद्धाधयि विनधर्मापक्षा इत्युक्ते धर्मविशिष्टस्य

पक्षतास्यान्नश्चासंभवः स्यान्नु साध्यस्य पक्षवृत्तित्वेनात्माश्रयापत्तेरिति धर्मिपदे विशेष्यपरं तथा च सिषाधयिषाविषयः साध्यमेव पक्षते
त्यर्थः आद्य इति तत्र प्रतिपाद्याभावेन प्रतिविप्रतिपादयिषाया अभावादिति भावः द्वितीये चेति सिषाधयिषेति णिच् प्रत्ययः कथमिति तु चिंत्यं । असुरभी
ति असुरभिगंधेन प्रत्यक्षेण हेतुना कुसुमितरसानुमाने पूतिभांडाराद्यावर्त्तिमत्तु तत्त्वेत्यर्थः हेतोरवधारणेनानवधारितधर्मत्वे सामान्याभावस्य यत्
किंचिद्विशेषेण विरोधादतः पक्षतोपपन्ना येय दि हेतोरप्यनवधारणं वाच्यं तदा दूषयति हेतुमत्त्रयेति निदानभावो निदानत्वं हेतोरिति शेषः हेतो
रनिश्चये संदिग्धासिद्धत्वेन हेत्वाभासत्वादनुमितिकरणत्वं न स्यादित्यर्थः । हेतोरनिश्चय इति नोक्तं हेतोः पक्षातिरिक्ते निश्चयदशायां धर्मि
णोऽनवधारितधर्मत्वेन पक्षत्वे बाधकाभावः पक्षेतन्निश्चये हि अनवधारितधर्मत्वाभावे पक्षता न स्यादिति तस्य हेतुमत्तया निश्चया
भावः पक्षतोपयोगी वाच्यस्तत्रेदं दूषणमिति अवधारणे इत्यत्र हेतुमत्त्रयेति षष्ठ्यंतविपरिणामेन संबंधः विद्यासागरस्तु अवधा
रणे इति लंघितं पाठं मत्वा अनवधारणपक्षे एवं दूषणं तत्र मते अनवधारणे वेति धर्म्यनवधारणे तद्विशिष्टस्य धर्मिणोऽप्यवधारणा
संभवेन पक्षासिद्धिर्विशेषणानिश्चयपूर्वकत्वाद्विशि[illegible]सिद्धेरित्यर्थः न चावधारितरूपतया धर्मस्य निश्चितत्वान्न तद्वि 7
शिष्टपक्षासिद्धिरिति वाच्यं अनिश्चितरूपेण निश्चितमित्युक्तौ निश्चितभावाभावयोरेकतरोपाधौ व्याघातादिति व्याचष्टे

२५९
259

द्वेमुविषयेति साध्येत्यर्थः। स्वयमज्ञाने स्वयमनवधृते परं प्रति प्रमाणेन प्रतिपादनायोगादित्यर्थः संदेहविषये प्रमाणस्य
व्याघातात्तथा चाप्तस्य स्वनिश्चितार्थस्यैव प्रतिपादकत्वादित्यर्थः प्रतिवादिविदितेपीत्यनुमानवाक्यप्रयोक्तुरितरः
वादी अनुमानवाक्यप्रयोक्ता अयमाशयो यदा गुरुमुखादवधृतेप्यर्थे सतीर्थयोरेकः स्थापनावादी परश्च दूषकः स च दूष
णं स्थापनावादिने परा जेतुं न ददाति किं नु तस्य विद्यानुकर्षज्ञानाय न च दूषणवादिना सोर्थो न ज्ञापनेच्छया जाननाप्ययम
र्थोऽनेन स्थापयितुं शक्यो न वेति दूषणमुद्भावयति अनुमानवक्ता च मम सामर्थ्यमयं जानातु इति कृत्वा स्थापयति नत्वेत्यर्थः न
न्वेवं न दूषको न प्रतिवादी स्यात्तच्च निर्णयविजयफलकामनाया विरहादिति वाच्यं स्थापनाप्रतिकूलवादित्वेनैव प्रति
वादित्वोपपत्तेः कोयं शब्दः अनुमानवाक्यप्रयोक्तृ इति वचनादिना विवक्षितानन्तत्वनिर्णीयुताप्रयोजनं स्थापुरस्याः क व
थायाः स्वोत्कर्षख्यापनमेव वादिनः प्रतिवादिनश्च तदुत्कर्षज्ञानमेव यदि च कथात्रितयबहिर्भूतत्वादियं कथा नेष्य
ते मा भूत् कथात्वं साधनदूषणप्रयुक्तवाक्यसंदर्भस्त्वेतादृशः सहाध्यायिनोः संभवत्येवेत्येतदुदाहृतं तत्र निर्णयफलका
यां तु नावधृतार्थमात्रविषयत्वमिति तदुपेक्षितमिति परिभाष्यं न तु हेतुगोचरेति पर्वत एव धूतकत्वसा[illegible]पवत्त्वहेतुकसाध्यानित्यत्व

कार्यत्वानिर्णयाद्धूमं प्रति अग्निमत्त्वनिर्णयदशायां पक्षतापत्तेरित्यर्थः तद्धेतूनामिति तेषां कृतकत्वादिहेतूनामपि वादिप्रयो
ज्यत्वात् ननु साध्यानित्यत्वादिधर्माणामग्निमत्त्वनिर्णयदशायामप्यनवधारणादिति व्याप्तिज्ञानाद्रवस्थ्यात् । तत्तद्धेतुगोचरस्य धूम
विषयप्रदेशस्यामलत्तादेव निश्चयादग्न्यनुमितिर्न तस्यापि पक्षतापत्तेरिति व्याख्यानं ननु मैथिलोक्तं हेयं तथापि तत्तत्प्रसंगा
देवेत्येतावतैव पूर्वदोषप्राप्तेः तत्तदेतिवीप्सावैयर्थ्यापत्तेः किं च तत्तद्धेतूनामिति वक्तृवचनं च व्यर्थमेव स्यात् अपि धूमानुमानप्रयोगदशा
यां तेषां वादिप्रतिवादिप्रयोज्यत्वानां नास्तीति चेत्तत्र वादिप्रयोगयोग्यताप्रयोगाभावदशायामक्षेपव प्रयोगोपाहितत्वं ननु स्वार्थानुमाने पक्ष
त्वभंगप्रसंगादेव न युक्तः । असाधारणेति वादिप्रयोज्यधूमवत्त्वहेतुविषयानवधारणमग्निमत्त्वं प्रति पर्वतस्य पक्षत्वमिति विद्यासागरस्तद्
सत्प्रदेशस्याग्निमत्तामादायातिप्रसंगतादवस्थ्यात्तद्धेतुविषयाग्निमत्तावधारणाभाव इति वाच्यं न चैवं सति धूमपदं व्यर्थमिति वाच्यं
आलोकेऽनवच्छ्यनुमितावाच्याधूमलिंगकानुमितिस्वीकारेण तत्र पक्षतासंपत्तये तदावश्यकत्वात् अननुगमादिति शङ्कादेवैवं प
क्षतानतस्यादिति भावः ननु तत्तत्पक्षकत[illegible]द्धेतुकपक्षतानां चानुमितिविशेषहेतुरिति नाननुगमो दोषाय इत्यनुशयेनासंभवमाह
इतरेतरेति अनुमानानुदयप्रसंगादिति प्रयोगयोग्यतायाश्च निर्वक्तुमशक्यत्वादिति भावः तत्र साध्यस्येति नित्यत्वे कृतकत्वविषय

260

लं

स्तज्ज्ञ्यानुमितिविषयत्वं हि तद्विषयत्वं च तत्रानुमितिरस्तीति भावः ननु तत्र नास्त्येव शब्दादेः पक्षता किंतु पक्षाभास एव सः अत एव वि
रुद्धोऽपक्षधर्मत्वादेव हेत्वाभास इत्याशंक्याह हेतोरेवेति पक्षधर्मस्येत्यर्थः विरुद्धो हि व्याप्तिज्ञानविघटनद्वारा हेत्वाभासः ननु अपक्ष
धर्मतया तथा च हेतुदोषत्वेनानुमानस्याभासतोपपत्तौ न पक्षस्याभासत्वं कल्प्यं गौरवात् प्रमाणाभावात् अन्यथा बाधितसाध्यपक्षा
भासतापत्तेरिति भावः एतेनेति विरुद्धहेतुकपक्षस्याभासत्वप्रसंगेनापि हि नैतत्त्वादिप्रयोगेऽग्रेहे तु तत्पाद्यानुमितिविषयता साध्यस्य
संभवति यद्विवादिप्रयोज्यहेतूत्पाद्यज्ञानत्वं हेतुमात्रोत्पाद्यज्ञानत्वं येन केनाप्युत्पाद्यमानत्वं वा विवक्षितं तदाग्निमत्त्वनिश्चयदशा
यामपि पर्वतस्याग्निमत्त्वप्रतिपक्षत्वप्रसंगात् प्रागुक्तोऽस्त्येवेति अननुगमेऽप्याह चतुर्थे पक्षेऽप्यविशिष्टः संदेहस्य विशेषणत्वो
पलक्षणत्वं वा दाहसंदेहाधारपुरुषविकल्पादिनेत्येतेनेत्यस्यार्थः सुमिश्रोक्तो न ग्राह्यं तस्याबुद्धिस्थत्वादिति पक्षस्य धर्मः
पक्षधर्मस्तदभावः पक्षधर्मतेति दूषयतेने पक्षधर्मत्ता व्याप्यस्य पक्षसामर्थ्यविशेषाय दूषणात् साध्याग्नेर्विशेषं पर्वतीयत्वादि
रूपः सिद्ध इत्यर्थः व्याप्तितो व्यवच्छेदमाह प्रतीतिमितिप्रतीतिमादाय विशेषं पर्यवसाययितुं व्याप्यस्य सामर्थ्यमित्य
न्वयः पक्षाविशेषमादाय पर्यवसाययितुमित्यन्वयः परं केवलं सामर्थ्यमिति अनुपपत्त्यादेः पक्षत्वशङ्कि विशेषमुपाद

८ द्वितीये ॥ यावन्तु भितावेव भासते । ननु व्याप्तिज्ञाने तर्हि सामान्यज्ञानं विशेषज्ञानं विना प्युत्पद्यंत इत्यत एव विशेषाणि विषयत्वेनातस्याप र्यवसानमिति अपक्षपाते

यसामान्यपर्यवसानेनानुपपत्तिरिति विद्यासागरः व्याप्यस्य हि व्यापकसामान्यबोधनमेवं कार्यं तत्र व्याप्तिरेव तस्य बलं
व्यापकगतविशेषबोधनं व्यापकविशेषबोधनं वा अपरस्तत्र यत् सामर्थ्यं तद्व्याप्तितः परं व्याप्तेः शकाशाद्विन्नं कार्यं
वैलदाएपस्यत कृतायकत्वादिति वा पक्षे कि कार्यः। तत्रेदं विचार्यं किं यद्धर्मस्य व्याप्यस्य तत्सामर्थ्यं ततु व्याप्यमात्रस्य तत्रा
द्ये शब्दोऽभिधेयः प्रमेयत्वादित्यत्र प्रमेयत्वस्य ज्ञानज्ञेयात्मनः वस्तुधर्मतानस्यात् ज्ञानस्यात्मगुणत्वात् ज्ञेयस्यानुस्योऽवृत्तित्वादित्युक्तं
विद्यासागरेण तत्रापि तद्दूषयोधुतः द्वितीये त्वाह नस्यादिति सामान्यप्रतीतेर्विशेषविषयत्वं विना अपर्यवसानं यदि अनुत्पत्तिस्तदाह व्याप्ति
ज्ञेरिति उत्पद्यत एव हि सामान्यज्ञानं विनापि विशेषभानं द्वयोर्भेदाद्विशेषग्राहकसामग्र्या सामान्यग्राहककारणत्वे मानाभावात् कथम
रि न्यथा व्याप्तिज्ञानमित्याह व्याप्तिज्ञानवदिति यदि च तत्रां विशेषाभासस्यैवेत्युच्यते तदानुमानस्य प्रमेयमेव विलीयेत अथास्ति
कश्चित्स्व विपरीत दोषाजेन्यत्वेन व्याप्तिनिश्चय एव तदुपपत्ते अपव्याप्तिग्रहोऽपि विशेषविषयत्वं विना अनुपपन्न इत्युच्यते तत्राह अनु
पपत्तित्व इति न विद्यते उपपत्तिर्यस्य तथात्वे व्याप्तिग्रहणकाले सामान्यप्रतीतौ विशेषभानस्वीकारे व्याप्यानुप्रवेश एव विशेषस्येति अनु
मानोच्छेदः व्याप्याननुप्रवेशादिति पाठे व्याप्तिग्रहे व्यापकसामान्यं न प्रतीयते विशेषाग्रहात् तेन व्याप्यसिद्धिरित्यर्थः। मितभाषिण्यां

नुपपत्ते विशेषस्याभावे व्याप्यस्यानुपपत्तिरित्येव व्याप्यसामर्थ्यं कल्पितत्वं विशेषस्येति चेन्नत्राह अनुपपत्तित्व इति पक्षधर्मतायाश्चानु
पपत्तिरूपत्वे व्याप्तिमतिरिक्तं न तस्यान्यत्र ह्ययं वर्त्तते धूमस्तत्राग्निं विना तस्यानुपपत्तिरिति व्याप्तिरेवेत्यर्थ इति व्याच
ष्टे अनुपपत्तित्वेन विशेषविषयताभ्युपगमे अर्थापत्तिरेवस्यात् सा चानुमितेत्याहानुपपत्तित्व इति मिश्राः। उत्पन्नयोरपि
पि व्यापकप्रतीतेरधिकारत्वाकांक्षा अपर्यवसानमिति चेन्नत्राह विरलव्यापारापत्तिरिति अर्थप्रहरणरूपाया बुद्धेर्ज
न्मैव व्यापारः तदनंतरं पुनरधिकविषयाकांक्षिते विरम्यव्यापार आपद्येतेत्यर्थः तथा च सामान्येन तस्याः प्रतीतेर्व्या
पारः प्रथमं पश्चाद्विशेषेन चैवं संभवति तस्या जन्ममात्रव्यापारत्वाज्जन्मन [illegible]कत्वात् बुद्धिर्हि उत्पद्यमानार्थां विषयीकरोतीतामे
वनान्यं कालांतरे घटबुद्धेः पटबुद्धित्वप्रसंगादिति भावः अथ धूमज्ञानस्य धूमविषयस्यापि वह्निज्ञानं न तन्न नाद्वह्निविषयत्ववत् सामान्यप्रती
तिरपि विशेषबुद्धिमुत्पादयिष्यतीत्याशंक्याह मानान्तरतापत्तेरिति तदेव हि प्रमाणान्तरं यस्य विलक्षणप्रमायां जनने मनसो
धारणे सहकारी तिष्ठसामान्यानुमितिकरणं द्विशेषप्रतीतेः करणं प्रमाणान्तरत्वेन गण्येत न हि तदनुमानं व्याप्तिज्ञानेतरत्वादिति भावः
व्याप्तित्वं सामान्यबुद्धिजनकमेकं तथा पक्षधर्मतावत्त्वं विशेषबुद्धिजनकं परं प्रमाणान्तरस्य। विशेषविषयायाश्चेति यदि सामान्य

प्रतीतिरनुपपद्यमाना विशेषधियं जनयति तदा अपरापरविशेषधियमपि जनयेत् सामान्याश्रयगतत्वाविशेषात्पर्वतवद्वि
गन्तेकहस्तद्विहस्तत्वादेरित्यर्थः यदि च तादृशविशेषधियं विना नानुपपत्तिस्तदा सामान्याश्रयनिष्ठविशेषं विनापि नानुपपत्ति
र्जातत्वादेवेति भावः । मितभाषिण्यां पक्षधर्मताबलाद्बुद्ध्यंतरस्य विशेषविषयत्वमिष्यते तदा बुद्ध्यंतरस्य भानांतरापत्तिः
प्रमाणांतरापत्ती [illegible]तीति विषयबुद्धिजनकत्वादित्यभ्युपेत्य दूषयद्वस्तुतः पक्षधर्मताया अनुपपत्तिरूपत्वे चक्षुरादेरपि अनुपपत्तित्व
प्रसंगो विशेषविषयत्वाविशेषादित्याह विशेषविषयादेरिति विशेषविषयत्वमादीयते यया पक्षधर्मतया सा विशेषविषयादिस्तस्या विशेषविषयो
इति पाठः सुगम एवेति । ननु सामान्यप्रतीतेर्नानुपपत्तिर्येनोक्तदोषः स्यादपि तु विशेषविषयोऽस्तस्याः यथा पर्वतनिष्ठत्वादि विशेषमंतरेणानुप
पत्तिः साध्यव्याप्यसामर्थ्ये पक्षधर्मतेत्युच्यते इत्यत आह विशेषेति अतिप्रसंगादनवस्थापातादित्यर्थ इति विद्यासागरः । प्रागिति अनुमितेर्हि स
विशेषानप्रत्यक्षतो दृष्टोऽतोऽपरोक्षविषयदर्शनाभावात् संशयोऽपरोक्षो नानुपपन्न इत्याशंकार्थः यद्यपि च संशयो निश्चयमात्रनिवर्त्योऽन्यथा
अनुमितवह्नेः पर्वतेन न संशयापत्तेस्तथापि दोषांतरमाह पश्चादिति अनुमितस्येव विशेषस्य पश्चाद्दर्शनादित्यर्थः भवति च भयार्थे शंकृतानुमि
तोऽयं पुमान्सोऽयं नवेति संशयस्तस्माद्विद्यमानोऽपि विशेषोऽव्याप्यस्योपपादको न निश्चितः संशयविषयत्वादिति भावः तस्मादनुमानं न सामा

न्यप्रमाणत्वापि विशेषेण तत्प्रत्यये न सामर्थ्याभावादिति कल्पितमेव तत्तत्प्रामाण्यमित्यनुमानानिर्वाच्यतया तत्प्रमेयस्यापातनोऽ
निर्वाच्यत्वेपि वेदेनाद्वैतसिद्धिरप्रत्यूहेति अनुमानखंडविनिर्गदः ॥ इति समाप्तौ ॥ अध्यक्षपादक्षोत्तरक्रमप्राप्तमुपमानं खंडयितु
मुपक्रमते उपमानमिति किमाक्षेपप्रश्ने च साधारणेनादिभिन्नमपि प्रत्यक्षमसादृश्यमिति विद्यासागरः वस्तुतस्त्वा
नेता क्षेपेत्वलक्षणखंडनायत्तान्नोपपत्स्यति उपमानमिति करणमित्यर्थः स्मृतावितिसादृश्येतिलक्षणवाक्य न एव ज्ञान वि
शेषणतयालभ्यतेऽपि शब्दः स्वांशयभ्रमयोरपि संग्रहाय। न च सादृश्यज्ञानमात्रमुपमितिकरणं तदनंतरमुपमितेरदर्शनात्
व्यापारविधुरस्य फलायोगव्यवच्छेदेनैव करणत्वेनोऽनुभवो निश्चयात्मक प्रमात्मकश्चेति शेषः यद्यपि तद्दोषे सत्यपि वदोषांतरमाह इंद्रियजेति
यद्यपि नेदमुपमितिर्यद्यपि नेदमुपमितिलक्षणं किंतूपमितिकरणस्य सादृश्यप्रत्यक्षेनुनागोविकेसवनगतस्योपमितिं जन्यत्येव तथा
प्येकमात्रविशेष्यकं तत्वेति भावः। अथातिदेशवाक्यार्थधीमतः सादृश्यानुभवो यथार्थ इति विवक्षितमित्यत्राह सापि गवय इति ।
एवमिति गोसदृशो गवय इत्यास्तवाक्यजं ज्ञानमुपमितिकरणं न भवति संज्ञासंज्ञिसंबंधपरिच्छेदरूपा उपमितिर्गवयदर्शनत्वादि
त्यनिर्वाप्तिरुक्ततया। किं चेति ल्युडर्थं भावे करणे वेत्याशयेन विकल्पः न च प्रमाणस्यैव लक्ष्यत्वेन भावव्युत्पत्तिपक्षेऽर्थान्तरतेतिवाच्यं

अस्पष्टो यस्यापि वोद्धव्यत्वात् तद्यथा तदा उपमितिकरणमेव फलद्वारा लक्षणमिति तात्पर्यार्थान्तरं तापरं त्वप्राप्तकालता
स्यादेवेति । गवयदृशामिति सेतिसादृश्यं विशिष्टज्ञानमेवोपमितिस्तस्य विषयः सदृशमुपमेयमेवेति भावः । उपमित्यात्मकफलस्यैवैजात्ये
सिद्धे तत्करणमुपमानं मानान्तरकल्पं तद्वैजात्यं तु करणवैजात्येन वा प्रत्यक्षादिसिद्धं वा नायत्तस्थानुभवाभावात् उपमेयमिति धीस्तु
सादृश्यविशिष्टप्रत्यक्षादिगोचरत्वेनाप्युपपन्ने[illegible]त्याह । प्रत्यक्षादिकरणेति तथा च लक्षणमिदमसंभवीति भावः । सादृश्यज्ञानस्य सर्वस्येत्यादि
न संभवत्प्रमाणान्तराणां व्यापारो यस्मिन् फले तदसंभवत्प्रमाणान्तरव्यापारं फलं तज्जनकत्वमित्यर्थः । न च सादृश्यव्यवहारस्तत्फलं प्रमा
या एव प्रमाणफलत्वात् तच्च सदृशानुभवस्तत्फलं तस्य प्रत्यक्षादिनैव सिद्धेः नापि सादृश्यानुभवः करणफलयोरेकत्वानुपपत्तेः नापि संज्ञा
संज्ञिसंबंधपरिच्छेदस्तत्फलं दृष्टगोचरत्वेन गतस्यापि (पि सादृश्य) देशवाक्यश्रुतवतो यं गवयपदसंज्ञोऽन्यथा गो सादृश्यानुपपत्तेरित्यर्थो ज्ञो
यत्रैव तत्सिद्धिरिति लक्षणासंभवः । किं च सादृश्यं ज्ञानस्य उपलक्षणं विशेषणं वा आद्ये उपलक्षणस्योपलक्ष्यवहिर्भावात् अ
न्यस्य च ज्ञानगतधर्मस्य दुर्वचत्वात् ज्ञानत्वमात्रस्य लक्षणत्वेऽतिव्याप्तिर्वि[illegible]शेषणे च सादृश्यस्य प्रतिव्यक्ति व्यावृत्त्या तद्विशिष्टस्या
पि व्यावृत्तेरेव व्याप्तिरित्याशयवान् आह न चेति भेदेनेति मुखे चंद्रस्य सादृश्यमाह्लादकत्वं हस्तेः करिपुष्करसादृश्यं दी[illegible]र्घत्वे सति क्रम

ननु त्वमिति भेदः सादृश्यरूपत्वमिति सादृश्यत्वमित्यर्थः सादृश्येषु यदेकं रूपं सादृश्यत्वं तत्रापि सादृश्येन सदृक्सादृश्यमस्ति
त्वा अनेकस्यत्वत्रेयादि सादृश्यत्वं यथानेकस्यत्वेयं च तथा सादृश्यमपि द्विगामित्येयं चेन्निति तस्मिन सादृश्यत्वाश्रिते सादृश्ये सादृश्येऽ
नेकस्यत्वादौ सादृश्यरूपत्वस्या अथ भावोपगम्यते तदा सादृश्येऽनेकस्यत्वादि विरूपं वर्त्तते तस्मिंश्च सादृश्यत्वमित्य
न्योन्याश्रयान्नैकस्यापि सिद्धिरित्यर्थः अनेन भयेन यद्यनेकस्यत्वादि सादृश्यरूपत्वाश्रयता नाभ्युपगम्यते तत्राह्ना मभ्युपगम ग
वेति सर्व सादृश्येषु सादृश्यरूपत्वस्य तिशेषः अथ सादृश्येन सदृक्सादृश्यरूपस्य सादृश्यमेव नास्ति सादृश्यसादृश्यतयोः सादृश्य
मेव नास्तीति यावत् तथा च नोक्तोपालंभ इत्यत आह तयोरिति सादृश्यसादृश्यत्वयोरित्यर्थः सदृशबुद्धिविनैव सादृश्यमभ्युपगमे
मुखचंद्रादावपि सादृश्येन स्यादेवेदेत्यर्थः। वैधर्म्यप्रतीतेरिति धिक्कारभाग्मिति दीर्घग्रीवं प्रलंबकर्णं चलोष्ठं उत्कटं कठोरं तनूकंट
काशिनं कुत्सितावयवसन्निवेशमप्रसदं पशूनामित्येवं वपर्श्नं तस्वैधर्म्यप्रतीतिरित्यत्र विशेषाभावादित्यर्थः। यदि च प्रमाणां
तराधिक्यभयेन वैधर्म्यप्रतीतेः प्रत्यक्षावयंतर्भावस्तदा हसादृश्येति। इति सादृश्यखंडनसमाप्तिः। मीमांसकाभिमतलक्षणं
खंडयत्यप्रतीयमानेति अप्रत्यक्षीक्रियमाणस्येत्यर्थः एतेन नतद्बुद्धेः प्रसक्तांतभावः अनेन सदृशीमदीयागौरितिबुद्धिर्नप्र

सदृशात् संभवति गोरसन्निकर्षादिति भावः। उपमानमुपमितिकरणमित्यर्थः सादृश्यप्रमितिर्यस्मादिति बहुव्रीहिः। आप्त
वाक्यादपीति तथा च शब्देऽतिव्याप्तिरिति शङ्काजन्यत्वे सतीति विशेषणीयमित्याशयेनाह यत्रेति तद्व्यापारस्तद्वाक्य
व्यापार एवेत्यर्थः स चायं च पूर्वोपलब्धश्च संप्रत्यनुभूयमानश्च देवदत्तावभिन्नाविति वत् स च न गवेऽनुभूतो गोरयं च
वनेऽनुभूयमानो गवयश्च सदृशाविति प्रमितौ प्रत्यक्षात्मिकायामतिव्याप्तिरित्यर्थः यथा हि संस्कारेंद्रियाभ्यां दे
वदत्तावभिन्नाविति प्रत्ययस्तथा गोगवयौ सदृशाविति प्रत्ययोऽपि संभवति न च तत्र न तेंद्रं न विशिष्टस्य धर्मिण एकत्वाद्विशेष्यसन्नि
कर्षसत्त्वान्नादृष्टं प्रत्यक्षं संभवति न तु प्रकृते विशेष्यभेदात्तथापि विशेष्यसन्निकर्षः प्रत्यक्षे हेतुर्यावद्विशेष्यसन्निकर्षोऽन्य
थाभ्रान्तविपरीतप्रत्यभिज्ञानं नस्यादिति [illegible] दवस्तु न तत्रापि संस्कारात्मिकाप्रत्यासत्तिरस्त्वेवेति। एवं विशेषणपर्य्यवसितन
मर्थलक्षणवाक्यस्य दर्शयन विशेष्यवैयर्थ्यं न दूषयति तदा चेति। अन्यथेति तद्धर्मा यमिति प्रतीत्यर्थं तत्र मेतद्धि
धर्मासदृशीति प्रतीतिरित्यर्थः। आचार्यलक्षणं दूषयितुमुपन्यस्यति अनवगतेति अनवगतासंगतिर्यस्याः संज्ञायाः स
स्याः समभिव्याहृते सह पठितं यद्वाक्यं गौरेवेति तदर्थस्य संहितमनुसंधानमित्यर्थः। अंत्रिनीत्येन नत्र्द्वाणप्रविष्टं सत्ता

संबंधपरिच्छित्तौ वै प्रमानफलभित्तिप्रदर्शनार्थं नन्वाप्तवाक्यात् असति दृष्टांतरे वृद्धिस्तत्र प्रयुज्यमानत्वादिति लिंगा
द्धोऽवगत एव संबंध इति वाच्यं प्रवृत्तिनिमित्तस्य प्रागनवगतो अवगतस्य च सादृश्यस्य प्रवृत्तिनिमित्तत्वात् तदाहुः सादृ
सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतिरिति नः। समयोऽनुग्रहः पूर्वेक्षा वेनानुमयापि वेति। प्रस्मृतसंगतेरिति तथा चानधिगत
संगतित्वाभावाद्व्याप्तिव्यनुभूतस्मृतेति पूर्वमनुभूयस्मृता कालांतर प्रस्मृतं संगतिर्यस्य कालव्यवधानात्तस्योपमितावव्याप्तिरस्मृ (तेना)
तेति विशेषणाभावादित्याशयः कदाचिदिमहतिकाननेहस्तिनः सतं सतीत्यत्रापि कदाचित् सामर्थ्यमाणार्थत्वस्य संभवात् सामर्थ्यमा
नार्थतादशायामतिव्याप्तिरित्यर्थः। कदाचित्समर्थ्यमाणार्थतया इति पाठे कदाचित्समर्थ्यमाणार्थतया अनुभूतस्मृतकालां
तरविस्मृतस्थलेपि संभवेनासमर्थ्यमाणतया असंभवेनाव्याप्तिरेवेत्यर्थः। सर्वदेतिलक्षणाभिमतेपि फलसिद्ध्युत्तरकालस्मर
णसंभवेन सर्वसमर्थ्यमाणतयाविशेषणस्याभावात् विशिष्टासिद्धिरित्यर्थः। क्रंदनमाक्रोशनं रोदनं वा यस्याः प्रमितेरिति
पूर्वलक्षणे येन प्रमात्रे व्यवहितलक्षणे संज्ञापदेन का संज्ञा विवक्षितेति न शक्यते निश्चेतुं तत्रश्चातिव्याप्तिरित्याह
संज्ञेत्यप्याकुलमव्यवहितार्थः संदिग्धार्थमिति यावत् गोसदृशो गवय इति अत्र विद्यासागरः एतादृशवाक्यं

श्रुतवनो वनं गतस्य स एवायमुपदिष्टो गवय इत्यनुसंधानं जायते नचैसावुपमाने गवयसंज्ञायाः संज्ञिना सह संबंधः प्रतिपत्तिर्हि तान चैयं
तथा काननपदेन विदितसंगतिना समभिव्याहारादनलद्धी ज्ञानानुसंधानेनातिव्याप्तिरित्यर्थमित्याहु तन्न काननगमनरहितस्याप्य
नुसंधाने ऽतिव्याप्तिस्तत्रापवर्धितानुसरणाद्वैयर्थ्यात्प्रायःपदवैयर्थ्यापत्तेः काननगमनविधुरस्यापि तादृशशाब्दबो
धे अतिव्याप्तिरिति शिष्यहितैषिण्यां मिश्रास्तु प्रायःपदं वा दुलपवाचिव्याप्तिपरं नावाक्यस्य व्यक्तिर्तथा चेइदं कान
नं गवयाधारत्वादित्यनुमितेर्गतमित्यर्थ इत्याहुस्तन्न दृशप्रतिपत्ताविति वाक्यार्थप्रतिपत्तावतिव्याप्तेरेव मूलार्थ
त्वात् ननु प्रायःशब्दस्य प्रयोगात् काननपदस्यापि विदितसंगतिकत्वं गम्यते अतः प्रायःशब्दरहितमुक्तलक्षणमुपमान
मिति नातिव्याप्तिरिति चेन्न आह विनापि प्रायःपदमिति अन्यत्रैव इति रूढप्रभित्र कमलादेः मधुनि मधुकराः पिबन्तीत्यत्रैवे
त्यर्थः । इदं गोसदृशगवयपदयोः समभिव्याहारादेव गवयपदव्युत्पत्तेः सिद्धत्वात् उपमानमस्तीति कथं नोपमानस्येत्युक्तिरिति
चेन्न अभ्युपगम्यापि दोषोयमुक्तः उपमेयेति काननसंज्ञा च नोपमेयस्य गवयस्येति भावः तादृशे वाकुलभेदे इत्यर्थः गोसदृशो गवयो मह
ति कानने दृश्यत इत्यपि कदाचिदतिदेशवाक्यं तस्येति विग्रहः समग्रवाक्यार्थानुसंधानाभावाद्व्याप्तिरिति भावः । कानना

दीत्यादिपदेन महत्त्वादपरिग्रहो वाक्यार्थस्य पदार्थघटितत्वेन पदार्थस्मरणे वाक्यार्थस्मरणाद्व्याप्तिः यदि पुनः पदानि
न स्मर्य्यन्ते तदा पदार्थस्मरणाच्चाव्याप्तिः। न चेतिदेशवाक्य गत यावत्पदघटितं न वाक्यं किंतु तदेकदेशघटितमिति वाच्यं देश
दोषद्वयमिति चेन्नत्राह वाक्यैकदेशेति। प्रतीत्युत्पत्तिमिति प्रतीतिप्रयोजकस्य यावद्विवक्षितमित्यर्थः अतः काननादिपदस्य प्रतीत्य
प्रयोजकत्वान्नाव्याप्तिः। तत्र कानने निष्प्रसिद्धगवयपदार्थस्य काननवृत्तित्वप्रसिद्धस्य विभक्त्यर्थतो अधिकरणस्य च सम
भिव्याहारान्यथानुपपत्त्या गवयस्याधिकरणं काननपदार्थवृत्तित्वं गम्यते अर्थापत्तेरित्यर्थः। गोपदस्य प्रतीतिजनकस्याप्य
सत्त्वान्नातिव्याप्तिश्चेति भावः। अंतमिति अंतर्भावितं वनमधिकरणं यत्तादृशबुद्धौ काननाधिकरणगदयो गवयपदवा
च्यत्वबुद्धौ काननपदमपि प्रयोजकमेवेति तदनुसंधाने स्थलीयोपमितावव्याप्त्यापत्तिरेवेत्यर्थः। ननु तत्राप्युपमिति
प्रति काननपदमप्रयोजकमेवेत्युपमितिप्रयोजकस्य यावत्त्वमस्त्येवेति नाव्याप्तिरित्याशंक्याहोपमितिमिति नानुपमितित्वेन
प्रवेशस्यादात्म्याश्रयत्वेऽन्यथाप्रवेशं संकेते संज्ञासंज्ञीत्यादिलक्षणेति गंधवती पृथिवीलक्षणेन सहचरितायाः पृथिवीति
संज्ञा तस्या उपदेशो लक्षणवाक्यं तदर्थानुसंधाने गंधमुपलभ्य से गंधवती पृथिवीत्यनुसंधानवृत्त्यर्थः न चैतदुपमान

लक्षणं केवलव्यतिरेकीत्युक्तत्वात् न च संज्ञासंज्ञिबुद्धिरितो न जायते इति वाच्यं उपदेशपदेऽत्रापि गंधवती पृथिवीति श्रुत्पादकत्वलाभेन
गंधवती पृथिवी पदवाच्येति वाक्यपरत्वात् संज्ञासंज्ञिसंबंधप्रतिपत्तिजनकवाक्यैकदेशार्थानुसंधानमुपमानमित्यत्रातिव्याप्त्यंतरमाह
किं चेति गवयत्वेन गवयपदवाच्योऽयमित्युपमितेः करणमुपमानं तच्चत्वाद्यवनर्कावतारेऽसति संभवति तत्सादृश्यं वा गवयत्वं वा
गवयपदप्रवृत्तिनिमित्तमिति चिंतार्था गवयत्वस्येव तत्त्वायं सादृश्यस्य न त्वेडपाद्येवैरूप्यधर्मघटितत्वया बहूनां तत्त्वानौचित्यात्
यदा तु नर्कीनावनीणिस्मदासादृश्यपयेव गवयपदप्रवृत्तिनिमित्तत्वेनावगाहमानोपमितिर्जायते धूमेनाग्न्यनुयुंगोसादृश्येन गवय
स पदवाच्य इत्यतिव्याप्तिरित्यर्थः। अनुसंहितेति स्मृतिदेशवाक्यार्थस्य गोसदृशोऽयं गवयत्वेन यवंदृत्तं वा गवयपदप्रवृत्तिनि
मित्तवत्वात् यत्रैवं न तन्नैवं यथा गोरिति याऽनुमितिः तत्रातिव्याप्तिरित्यर्थः। अथवोपमितेरुत्तरकालमुपमितेः स्वरूपस्य गवया
देयद्यवद्वाद्यर्थेनानुमानमित्यर्थः। अव्याप्तेति अव्याप्तस्य विषये व्याप्तस्याविषये या प्रमा तत्फलं यस्येत्यर्थः। अनुमितिस्तु व्या
प्तस्य लिंगस्य व्यापारानुबंधितया विषये एवोत्पत्तेः न तत्र तत्रातिव्याप्तिरिति भावः। वस्तुगत्या तु उपमितिकरणस्यानुसंधानस्यापि
प्रमेयत्वज्ञानस्येत्यादिना व्याप्तत्वात् तेन जन्यमानं ज्ञानं व्याप्तविषयकमेवेत्यसंभवः अव्याप्तस्य करणस्योपमेयेऽप्यभावादित्यर्थः।

उपमेयमपि येन केनचिद् व्याप्तमित्यसंभविलक्षणमिति तन्मे चिन्ताया व्याख्यानं तथा सति संकार्ग्यं स्यात् संभवदुक्ति
कतापन्नेति न हि अनुमेयमपि तु व्यापकमेवेति कथमनुमितिजनकानुसंधानोतिव्याप्त्युद्धारः शंकते । व्याप्यत्वेनावग
म्यमानस्य विषये यत् प्रमाफलमनुसंधानमित्यर्थः अनुमानजनने व्याप्यतयाऽवगमोऽपेक्षणीयो न तूपमितिज
ननेपीति नातिव्याप्तिः सत्यपि व्याप्यत्वेऽवगम्यमानत्वाभावे न विशिष्टाभावसत्त्वादिति भावः । तल्लिङ्गमिति उप
मितिकरणं यस्य व्याप्यं तेन प्रतिव्याप्यत्वावगतमपि यदोपमितिजनकं तदाऽव्याप्तिः स्यात् व्याप्यतयाऽवगम्यमान
त्वांशाभावात् न हि तदा व्यापकानुमितिरेवोत्पद्यते भिन्नविषयेऽनुमितिसामग्र्याबलवत्त्वान्न तूपमितिरिति व्या
प्तिरूपमित्साधौ सत्याम् उपमितेरेवोत्पादादिदृष्टाघटितसामग्र्याबलवत्त्वादिति भावः । उपमेयेनेति ठक्कव्यवहार्यता
नुमानेति प्रसंगः स्यादित्यर्थः । तदनपायात् उपमितेरनपायात् उपमित्सयोपमितिः स्यादादित्यर्थः तथा च स्वव्या
प्तलावगतो उपमितिकरणं कतृ याम व्याप्तिना व्याप्तिनाऽवस्थामिति भावः प्रमितिमितेनव्यवहार्यत्वानुमितोनाति
व्याप्तिः तस्याः सौंज्ञासंज्ञिसंबंधज्ञानपूर्वकत्वेन तन्तूप्रमात्वाभावादित्याशयः तथात्वासिद्धेरिति भवदभिमतस्यो
ध

पमितिकरणस्य संज्ञासंज्ञिपरिच्छेदकत्वासिद्धेरित्यर्थः। संज्ञासंज्ञिप्रमितेः करणमर्थापत्तिरनुमानं वा न तूपमानम
धिकं करणमित्यर्थः। नादृगिति अनधिगतिसंगति संज्ञासमभिव्याहृतवाक्यार्थस्य संज्ञिन्यनुसंधानमित्यर्थः। तथा
च न व्यवहार्य्यतानुमितिकरणेऽतिव्याप्तिरित्यर्थः। जनकताश्रनन्यथासिद्धपूर्वजातीयता न था च व्यवहार्य्यतानुमितिजन
कप्रतिसंधानजातीयत्वमनुमितिफलानुपाधायकेऽप्यसतीत्यनुमितिजनकभिन्नत्वमसंभवीत्यर्थः। असंभवमेव विवृणोति
प व्यक्त्यपेक्षयेति यावद्व्यक्तिस्तादृशीनानुमितिं जनयतीत्युक्तावपि सामान्यधर्मपुरस्कारेण गृहीतायां व्यक्ताववश्यंभावात् व्यक्त्य
पेक्षयानुकारणता न संभवति व्यक्तेर्व्यभिचारितया कार्य्यजातीयनियमाभावात्। अथ न तु कार्य्यनियमं तत्तत्कारणव्यक्तेः
संभवतीत्युच्यते तत्राह नानुगमेन चेति तथा च व्यवहार्य्यतानुमितेः कस्याश्चिद्भूतायाभाविन्या व्यधिकरणयोर्वा ज
नकत्वस्याभावस्तादृशानुमितिजनकेऽप्यसतीति अतिव्याप्तिरिति भावः। लाघवतर्कोऽप्युपमाने सहकारीष्यते न चोप
मानस्य प्रमाणतासिद्धा कॢप्तानुमानस्य प्रमाणतास्तत्रैव सहकारिता युक्ता कीदृशं तदनुमानं तदाह विमतिपदं [illegible] ति
गवयत्वमित्यर्थः। तथात्वे प्रवृत्तिनिमित्तत्वेन कॢप्तगौरवेन विषयीक्रियमाणो विपर्य्ययो प्रवृत्तिनिमित्त [illegible]ः।

तादृशत्वादित्यर्थः। गवयत्वस्यापि तु तथा प्रवृत्तिनिमित्तत्वं सादृश्यस्य न प्रवृत्तिनिमित्तत्वं कल्पनागौरवतर्कप्रतिहत
त्वादिति भाव इति। यदि व्याख्यानं तदा तथा यद्रूपसंगतं तथात्वे विपर्ययो यस्येति संबंधे तथा त्वस्येति स्यात् न वा प्रवृत्तिनि
मित्तस्य विपर्ययस्तर्केण गृह्यत इति युक्तं वक्तुं तथात्वे तर्केण विषयीक्रियमाणत्वादित्येव वक्तुमुचितं न वा गवय
त्वस्य प्रवृत्तिनिमित्तत्वं गौरवात् किंतु सादृश्यस्य प्रवृत्तिनिमित्तत्वं गुरुपदार्थे गौरवादितर्के यद्यपि विशिष्य व्याप्त्युपग्रहो
नास्ति अतो विपर्ययपर्यवसानं नास्त्येवं तथापि लाघवमेवास्य विपर्ययाभाव इति व्याख्यानं तदपि न युक्तं लाघव
स्य गौरवाभावात् भावत्वेन मानाभावात् तस्मात् तथात्वे तथाभावे तर्केण विषयीक्रियमाणो विपर्ययो वैलक्षण्यं यस्य। गव
त्वस्येत्यर्थः। आरोपितगवयपदवाच्यत्वाद्धि सादृश्यादस्य वैलक्षण्यं लाघवाख्यतर्केणावगम्यते तत्र तस्य गवयपदप्रवृ
त्तिनिमित्तत्वेन तथ्यमेव भवतीत्यर्थं तर्कमेत्यनुच्यमाने प्रमाणेनाविषयीक्रियमाणत्वादसिद्धिः स्यात् अतएव तर्केण तथात्व इत्य व
स्य व्याख्यानायोपन्यस्तं मूलशैथिल्यादिदोषरहितेनेत्युच्यते न तथापि विपर्ययपदं सादृश्य वैलक्षण्यपरं न तथा न सत्य
इत्यर्थः। विद्यासागरस्तु गवयपदप्रवृत्तिनिमित्तत्वेन तर्केण बोध्यमानसादृश्यादेर्धर्मान्तरस्य विपर्ययोऽभावो यस्य तत्तथा

नत्वादित्यर्थ इति व्याचष्टे। गवयपदमिति इदं गवयत्वप्रवृत्तिनिमित्तकतामादिशतीत्यनेन संबध्यते। अर्थात् स्वरूपेति लभ्यते
त ननु गोरेव दोषाद् संभवे संसादृश्यप्रवृत्तिनिमित्तकमप्रवृत्तिनिमित्तकमेव कुतो न संभवतीत्यत आह अनुपपद्यमानेति सामा
नाधिकरण्यान्तमपि गवयपदविशेषणं तथा च प्रसिद्धार्थपदसमभिव्याहारान्यथानुपपत्तिरेव गवयत्वस्य गवयपद
प्रवृत्तिनिमित्तत्वे मानमिति नमानान्तरमिति प्रमाणान्तरीयेति प्रमाणीकार्य्या इति रूपमानखंडन न[illegible]र्थसमाप्त्यर्थः॥
क्रमप्राप्तशब्दप्रमाणखंडनायोपक्रमते शब्दोपीति तथाभूतस्यापीति प्रमाणदृष्टस्य परजनस्यापि प्रयुक्तित्वेन वादसंभवात्
तथा च प्रतारकवाक्ये अतिव्याप्तिरित्यर्थः यथाप्रमाणेति प्रमाणमर्थेति। कस्यापि यो वदति स तेन आप्त इत्यर्थः। अयथार्थस्या न
पीति दृष्टेरंगरजते इति वाक्यस्यांशतः प्रमाणमनतिक्रम्यैवोक्तत्वादिति भावः। यावदिति यावद्यथाप्रमाणदृष्टवक्ता आप्त इत्यर्थः
तेन अंशतोऽप्रमाणदृष्टस्योक्तौ नातिव्याप्तिरित्याशयः यदि यावद्यथाप्रमाणदृष्टं यावद्यो वदति स आप्तस्तथा राहप्रमेव नि
लस्यापि णाभाप्तानां प्रायेण बाहुल्येन यावत्प्रमितवादित्वाभावान् शब्दप्रमाणे शब्देऽतिव्याप्तेः तदेव स्पष्टयति नहीति अंशतः प्र
माणीभूतातिव्याप्तेस्तावद्वस्याद्येत्यपि बोध्यं यथा प्रमितिं तस्यैवेति यो यावन्तो यदुक्तितत्प्रमाणदृष्टं स आप्तस्तेन नातिव्याप्तिः

अंशतोऽप्रमाणादृष्टस्याभिधानात् तदेवाक्यस्य निष्कृष्टमर्थमाह यथाप्रमितस्येवेति यावत्पदसमभिव्याहारादेवकारार्थ
स्य लाभ इति भावः अनेवंभूतस्येति अप्रसिद्धस्यामाहूत इति वाक्यस्याप्रमितांशस्यार्थमाह अनर्थकत्वेन प्रमितार्थकेपि तद्वाक्यो
ल्लङ्घनाभावादसंभव इति भावः तत्र विषय इति शब्दजप्रतिपत्ति विषये प्रकृते यावत्प्रमातद्विषयस्येवेति पर्यवसाने इदं वो
भजनीयमिति वाक्यस्य प्रामाण्यं स्यान्ननु दृहरिः सोव्यय ३॥ दैवादिति करणापाटवेन वेत्यर्थः पूर्वमेवेति आभासीभूतक
रणजन्यस्याप्यनुभवस्य यथार्थत्वं चेत्तर्हि तस्य प्रमात्वमेव न तन्निश्चायकत्वं करणमपि प्रमाणमेवेति निर्दोषवाक्यत्वं ल
क्षणमव्यापकमेव स्यात् अनाप्तत्वं वंधादापाततः प्रवृत्तिसंवादात् प्राक्तनतः संदेह एव जायत इत्याशंकामपदनिप्रवृ १
त्तिसामर्थ्येनेति तथा चोदको ह्ल रणार्थिनो घटे प्रत्यक्षेण जलादिकार्यदर्शनेन प्रामाण्यावधारणं भविष्यतीत्यर्थः यद्यपि च शब्दा
त्तसंदेह एककोटिमात्रविषयकज्ञानसामग्रीतोऽनेककोटिज्ञानस्यानुत्पत्तेस्तथाप्युत्पन्ने ज्ञाने प्रामाण्यसंदेहाहितः संदेहः स च न
प्राक्कालीनप्रमाविरोधी न चाप्ताप्तत्वनिश्चयः प्रमाहेतुः प्रतारकवाक्यजभ्रमेपि प्रमात्वापत्तेः नाप्याप्ताप्तत्वं तथा तथा सति स्तुत
वां व्यभिचारादकारणत्वापत्तेरन्यदेवाप्तत्वं निर्वाच्यं तच्च प्रकृतवाक्यार्थगोचरयथार्थज्ञानवत्त्वं तच्चाव्याप्त्यादूषितमिति भावः भ्रम

प्रमादविप्रलिप्साकरणापाटवानि दोषास्तत्प्रमान्याभावो भीमाग्रजे युधिष्ठिरेपि नास्ति शरीरादावात्मभ्रमस्य तस्यापि स्वा
हारादिव्यवहारस्य रोगेन्नेयस्य सत्वात् विशेषतः इति प्रकृत वाक्यार्थभ्रमादिराहित्यस्येत्यर्थः। आप्तोपदेशः प्रमाणमिति
गौतमीयशब्दप्रमाणलक्षणे दूषयन्ते द्वितीयं केषांचिल्लक्षणं दूषयितुमुपन्यस्यति यथार्थवाक्यमिति पूर्वोक्तेति यथा
र्थानुभवप्रमेत्यत्र यानि दूषणानि तानि प्रथमतोत्र दोषस्तथाहि अर्थसादृश्ये वाक्यस्य प्रमेयत्वादिना अनाप्तवाक्यस्या
पि तेन यथार्थज्ञानजनकं वाक्यमित्यर्थो वाच्यं तत्रापि यत् किंचित्सादृश्यं भ्रमेपीति तज्जनकवाक्येतिव्याप्तिः प्रका
शमान [redacted] रूपेण सादृश्यविवक्षायां रूपवान् घट इत्यत्राव्याप्तिस्तज्जन्यज्ञानस्य रूपादिमत्वाभावादेव मन्यत्रापी
त्यसंभव एव स्यादिति भावः वक्तारमपि दूषणांतरं प्राग्युक्तत्वेनानुगमय्यैकं वचनेप्रयुक्तं यथार्थमिति यथार्थपदं
यद्यथार्थस्याव्यवच्छेदकं तदा [redacted] ंशे तो यथार्थो यथार्थस्यांशतः प्रमाणत्वेन स्यादित्यव्याप्तिः अयथाव्यवच्छेदकं तदा
विशेषणं वैयर्थ्यमित्यथव्याख्यानं यत्सर्वांशेऽयथार्थं तदेव व्यावर्त्यं तथा च नाव्याप्तिः नचैवमयथार्थांशे पि प्रामा
ण्यापत्तिरिति वाच्यं प्रमाणशब्दो हि लक्षणैः सेन चांशिकप्रमाणस्यन प्रमाणता नचबाधितांशे प्रमाणत्वस्यापादकं किंचि

इति न हि प्रमाणत्वं तदापादकं व्यभिचारात् बाधितांशप्रमाणे तस्याप्रसिद्धत्वाच्च । अत्रेदं हृदयं यदीदं वाक्यं प्रमाणं स्यात्तदा बाधितोप्यर्थः
प्रमितः स्यात् प्रमाणविषयत्वादबाधितांशवत् न तथा च तस्यालक्ष्यत्वं वाच्यं न तत्र बाधितोप्यर्थस्तन्न प्रमितो न स्यादित्युभयथापि निरु
न्यसंभवः । यद्वा विशेषस्याभासव्यवच्छेदकता न संभवति आभासस्यापि अर्थित्वादृष्टस्य संभवात् अव्यवच्छेदकत्वे च न विशेषणत्व
मिति पूर्वोक्तदोषादिसर्थः फक्किकायाः । एकार्थावच्छिन्नेति यस्तु समुदायात्मकोऽनियाप्तिवारणाय पदेति अनाप्तवाक्येतिव्या
प्तिवारणाय एकार्थेति क्रियाकारकादिभेदेन विशिष्ट एकोर्थस्तद्वदित्यर्थः तु समुदायः । एकत्वं यदि गुणस्तदा गुणादौ वाक्यार्थे नास्ति
अथाभेदस्तदार्थशब्देन विषयमात्राभिधाने आभासीभूतवाक्यस्यापि वाक्यत्वप्रसंगः न च भवत्येव तद्वाक्यं न तु प्रमाणमा
प्तीयत्वाभावादिति वाच्यं तथा सति भोगोवां विभजतु पूर्वां वां विभजत्विति वाक्यद्वयस्यापि वाक्यत्वं स्यात् अर्थपदं साकां
क्षपदप्रतिपाद्यपरमिति चेन्न तथापि तद्दोषतादवस्थ्यं परस्परमनयोराकांक्षा नास्तीति चेन्न हि यः पदसमुदायः परस्परसाकां
क्षावानिति न तदर्थ इति निरपेक्षाणां पदसमुदायस्याकांक्षाविरहादव्याप्तिः अथ यत् समुदायप्र[illegible]नि परस्परसाकांक्षामीमति 2
विवक्षितं तदा यत्पदार्थानुगमादननुगतेलक्षणं तच्च [illegible]तं च शब्दप्रमाणलक्षणं न प्रमाणविभागकं स्यात् किं च विषयता स्वरूप

मतिरिक्तं वेति विकल्पानां दूषणं चतुर्थपरिच्छेदे वक्ष्यते । अवच्छेदकत्वं च अर्थस्य पदसमुदायावृत्तेर्न संभवतीति नियतानतिरिक्तवृत्ति
त्वं चेत्तदाऽव्याप्तिः सर्वस्यार्थस्य पदसमुदायाधिकरणत्वेन गगनादिवृत्त्यसंभवात् । नापि पदसमुदायजन्यज्ञाने विषयीभूय व्यावर्त्तकत्वं ज्ञा
नजननात्प्रागवाक्यतापत्तेः नापि स्वरूपयोग्यत्वेन विषयव्यावर्त्तकत्वं स्वरूपयोग्यतानिरूपकस्य पदसमुदायगगनस्य प्राग
प्रतीतौ लक्षणस्य दुर्ज्ञेयतापत्तेः प्रतीतौ न देवलक्षणमस्तीत्याशयः वर्णादि इति विशेष्यमानं वर्णसमाम्नाये अतिव्याप्तेः विशेषणमात्रं च
इत्युभयमुपात्तं वर्णत्वं चेह वाक्यभिन्नत्वमिति अव्यापकत्वाद्दोषाविति प्रत्येकं अव्यापकं स्वरत्वस्य तिङन्तेऽभावात् स्वरत्वे सति
तिङन्तेत्वासंभवि आदिपदेनासंभवपरिग्रहः । पृथगिति प्रवृत्तिनिमित्तभेदेन नानार्थतायां त्वित्यर्थः । प्राग्देशेति दिकशब्देभ्यो अवस्ताद्विहित
तसिलादिविभक्तिसंज्ञा भवतीत्यर्थः किं चावच्छेदकत्वं संबंधविशेषः स हि विशेषणादिशेषभावादनतिरिक्तोऽनतिरिक्तो वेति विकल्प्य दूषणं
को नत्रैव वक्ष्यते अहमिति अत्रावरे हकारो द्वौ वर्णौ ततः परयोर्विभक्तिरादेशो भकार इति बहूनां विभक्तित्वं तत्र नास्तीत्युपपादयिष्यते ।
हकारस्य प्रकारस्य सत्त्वात् तस्य चाद्याकारभिन्नत्वात् नूनस्मात्त्वौ वक्तुं तथ दितसिलादेरित्यादिपदेन यत्तदः कालेदाप्रका
रवचने दाइत्यादयः परिगृह्यन्ते न च विभक्तिशब्दवाच्यत्वे नानुगमः शक्यतया अस्वीकारादस्वीकारे वा सप्तम्यादिविधानवैयर्थ्यात्

त्वात्र पद्कृत्वे तत्र चिह्न्यसि वाच तयोरक्षरोकारयो रक्षाप्तिः। पुत्र्यां इत्येवमत्र ह्यास्त्वानां मित्राणां। मापमरुमतेष्वापाकारेहि कारयो रये दा[illegible] इह

विभक्तिशंकाविषयत्वेनानुगमे तद्दूषणमाह इति। तदाऽयं दोषः। यदि वर्णोऽहमित्यत्र विभक्त्यंतरत्वाभावः समर्थनीयः अहमित्यादे
रित्यादिपदेन कः सङ्ख्यादेः परिग्रहः एवकारादीनामिति शपोऽकारः स्यनोऽकारस्य सार्थकः शप्कर्तरीत्यादिना कर्त्तरि विधानानु
कूचित्तुसार्थकत्वादित्यस्य पश्चानेकर्तृवाचित्वादिसेवपाठः यदि च कर्त्तरीति परसप्तमी न च शब्दसन्निवेशे कर्त्तुः परत्वं संभ मी
वतीति कर्तृवाचकपरं तथा च कर्तृवाचके आर्धधातुके इत्यर्थः। शपः कर्तृवाचिता स्तीत्युच्यते तदसत् परसप्तमीलक्षणाश्रयस्य योर
न्याय्यत्वेन कर्तृवाचिता या एव सूत्रकारस्य मतत्वात् उक्तस्य अथमर्थोभट्टाचार्यैः एकत्राधिकरणेन तु संवादो वायं ग्रंथः। यत्रेति निषे
तुसप्तमी धातुनिमित्तीकृत्य विभक्तेर्विधीयते न तु शपमित्यर्थः। तथा च यतो विभक्तिर्विधीयते तद्भक्तं परमिति लक्षणवाक्यार्थः
पृथक् पदत्वप्रसंग इति तथा च एकपदत्वप्रसिद्धिर्विरुध्येत यद्वा भवतीत्यस्य पदसमूहत्वेन वाक्यत्वापत्तिरित्याशयः देवदत्तमिति व
र्णोऽम्यः पर तः सकारो विभक्तिर्यदा प्रयुज्यते तदा अतिव्याप्तिरित्यस्यार्थः अथेतिने देपरे पदत्वे सतिपरांतस्य सकारस्य हत्वविधानात्वं
स्यान्न तस्य विघर्जनीयः स्यान्नरभावानुपरत्वं नास्तीत्यर्थः। सत्वेयमिति सुपतिङंतपदमिति हत्वादीति तस्य परांत एव विधानादित्य
र्थः। अन्येवेत्यस्य प्रतियोगिनमाह नत्वलोकिकव्युत्पत्तिसिद्ध्यर्थः। दाक्षीति दाक्षीनंदनेनोदीरिता या नदी संज्ञा तस्याः कालस्थली

मित्यत्र प्रत्यभिज्ञा स्त्रियूङ्ख्याख्यौ नदीति ईकारस्य नदीसंज्ञाविधानात् ननु कानननस्य लीमपि पाथोर्थी भ्रान्त्या धात्वेव इत्याशंक्याह
अलीकाभिमानीति । अभिमानपदं ज्ञानमात्रपरं मिथ्यापर्यायस्यालीकशब्दस्य पृथक्ग्रहणात् तथा च काकत्यव्याचष्ट इत्य
र्थः इति जीविकामिव कृत्वा व्याचष्ट इत्यस्य परत्रयार्थिप्रयुज्यमानशब्दजीविकाकामिति पदत्वं यस्येत्यर्थः । यदा जाना
तिकाननस्य लीजलात्मिका नदी न भवति तदापीत्यर्थः यदि लोकव्यवहारेप्ययोगिनी सा स्यात् तदा एवं वाक्यादीत्वं जा ननु व्य
वहारादेवेत्याशयः । सर्वलक्षणेति सर्वाणि यानि सूत्राणि तेषां प्रवृत्त्या तन्त्रत् सूत्रविहितकार्ये सति यन्निष्पन्नं देवदत्त इति वि
सर्जनीयान्तं ननु संज्ञमिति नाति व्याप्तिरित्यर्थः व्यवहारिकं व्यवहारायोपयुक्तमित्यर्थः । सर्वत्राभावादिति नाहि शब्दस्या
नो विधायकं सूत्रमेकस्मिन् प्रवर्त्तते दिवादिभ्य एव श्यन् विधेरित्यर्थः । अन्यथा सर्वपदानामेकरूप्यापत्तिरिति भावः ॥
संभवदिति यस्मिन् पदे यस्य लक्षणस्य प्रवृत्तिः संभवति तस्य सर्वस्य प्रवृत्त्येत्यर्थः न चैकस्मिन्नुदाहरणे शपश्यनोः प्रवृत्ति
रिति भावः । संभवतीत्यत्र दिवादेः श्यन्नित्यस्य प्रवृत्त्या परत्वसिद्धिरित्यर्थः । हलविधानकाल इति विसर्गस्य नद्युत्तरकाल एव विधानादिति
भावः । देवदत्त इत्याह इत्यत्र कदाचित् यत्वयलोपाभ्यां परसिद्धिर्न च देवदत्त इत्यत्र तन्संभवस्तस्य उकारे परभूते विधानात् ॥

यद्धाविलक्षणमिति प्रवर्त्तते यत्र लक्षणं संभविन तस्य सर्वस्य प्रवृत्त्यर्थः। भाविपदं वा घटं तावन्मत्वर्थीयनिष्पन्नं संभविपरं
व्याख्येयं ओपम्यमन्तरेण जीविकां कृत्वेति भवत्येवेत्यतनत्र आह उक्तपदलक्षणेनेति जीविकापदस्य विभक्तिविहितस्य सन्निधानं
विना कृत्वेत्यत्र क्त्वाप्रत्ययस्य ल्यपो विधानाभावेन जीविकां कृत्वेत्यत्र सर्वलक्षणप्रवृत्तेः न चैवं वाक्यं साधु जीविकोपनिषदावौपम्ये इत्य
नेन गतिसंज्ञायां गतिसमासस्य नित्यत्वेन जीविकां कृत्वेति पदसमुदायोऽसाधुत्वान्न प्रयोगार्हो न वानुच्यमानो वाक्यमुच्यत इति वाक्य
मिति वाक्यपदव्युत्पन्नेः शब्दानां तरसन्निधिव्यतिरेकेणेति न विवक्षणीयं किंतु पदत्वासिद्ध्यर्थं येषां लक्षणानां प्रवृत्तिस्तेषां लक्षणानां साक
ल्यं विवक्षितं तेन देवदत्त इति पदं ननु जीविकां कृत्वेति समासोपाधावेव जीविकां कृत्वेति समुदायस्य पदत्वादित्याशंकते यदुपाधिकेति
यदुपाधिकायन्निमित्तिकायस्य पुत्रस्य प्रवृत्तिस्तस्योपाधेः समासोपम्यादेः संपन्नौ सत्यां तेन सूत्रेण निष्पन्नं पदं गतिसमासोपाधौ प्रवृत्ते
त्वाप्रत्ययस्य ल्यपो विधायकं लक्षणं तेन जीविकां कृत्वेति पदं समासाभावदशायां लक्षणस्याप्रवृत्तेः पदत्वे च नास्तीत्याशयः देवदत्त इति
केवलं न स्यात् स्यान्नु उपाधिघटितपदलक्षणाभावादित्याह यत्रेति सत्यामित्यस्य उपाधिसंपन्नौ सत्यामित्यंशस्याभावादित्यर्थः यस्यामव
स्थायामिति। उपाधिसद्भावे न समासादिविशेषाणां सत्वे किंतु नन्नु पदस्यावस्था तथा च निरुपाध्यवस्थायां यावतो लक्षणस्य संभवस्तत्सर्व

संपन्नो परत्वं जीविकाकृत्वेति सोपाध्यवस्थायामुपाधिकालीनसर्वसंपन्नोपदत्वमेवं चदेवदत्तइत्यादिनिरुपाधिकाएकाव
स्थाइति पूर्वं सोपाधिकावस्थानस्यां यदुपत्लोपाभ्यामेव पदत्वं न तु विसंगीतस्येति न कर्तव्य[illegible] पव्याप्त्यतिव्याप्तीइतिभावः
यस्यामवस्थायामिस्सत्र यत्पदेन प्रत्येकमवस्थायाग्रहणे अव्याप्तिः यौगपद्येन ग्रहणं चासंभवी त्याह वस्थानामैक्य
मिति अविवक्षितमिति एकत्रसर्वावस्थानामसंभवादितिभावः। असंभावितमिति वहूनामवस्थानामैक्यादित्यर्थः। संभवा
न हि सर्वास्ववस्थास्वेकाजातिरस्ति येन तदात्मनैक्यं स्यात्तादृशजातौ मानाभावात् अथ वृत्त्यव्यवहारसिद्धपदत्वेऽप्यनुगतकालत्वेनानु
गमस्तदा सर्वदेति कीदृश प्रसंगस्तमाह स चेति एकरूपत्वे यद्यवस्थैक्यं विवक्षितं तदा भवतीत्याद्यानस्य सदृशसंबोधनसाधारणानि
लक्षणानि सुः एकार्थत्वं चेत्तदाह भवत्यास्ति देति अत्र समानलक्षणत्वप्रसंगः समानविभक्तिकत्वं चेत्तदा पटः पटाविन्यत्रातत्प्रसंगः
समानप्रातिपदिकत्वे चेत् पटं पटाविन्यत्र न चैषां समानलक्षणत्वमस्ति तथा च न दचटितलक्षणाविरहाद्व्याप्तिप्रसंग इतिभावः
तथा च पदशक्त्यननुगुणतावच्छेदकमेव न्निरूपमिति खंडननिष्कर्षः। अथवा वर्त्तमानकालावच्छिन्नानुभवैकतत्त्वविवक्षा न
वस्थायां भूधातोर्भवत्सेत्याप्यागनपरे निष्पद्यते स्त्रीलिंगं भवतु शब्दस्य संबोधनदिवसावस्थायां भवति इति निष्पद्यते पुंलि

गभवतुशब्दस्य अधिकरणविवक्षावस्यादशायां सप्तम्यंतं भवतीति नामपदं निपात्यते । अत्र प्रतिपत्रमेकं नास्ति ॥

तदिह यदि नन्नरवश्यायां प्राप्तानां लक्षणानां योगपद्येन प्रवृत्त्याः निष्पन्नं पदं स्यात्तदा भवति भवति भवतीत्येकं पदं स्यात् तथा पटः पटा इत्यादिक
मेकं पदं स्यादित्याशयः । न चैकस्मिन्नेव पदे एकद्वित्वन्ननेलक्षणस्य प्रवृत्तिसंभवे आव्यान नाम पदयोरेकपदत्वे स्यान्न तु पदत्रयाण
मेकपद्यमिति वाच्यं एकदैव सर्वलक्षणप्रवृत्तौ विवक्षाभेदेन तावतां पदानां भेदस्याप्यवश्यकत्वात् अन्यथा नानार्थबोधानु
पपत्तेः । सकृदुच्चरितस्य नानार्थाननुभावकत्वादिति यत्तु शक्तिमत्त्वमेवेह वाक्यलक्षणे घटकपदत्वं तदविवोध्यबोधको
पाधिघटितैकात्मकतया अत्यन्ताननुगतं ताद्दशसमुदायस्य च निर्विभक्तिकदशायामपि वाक्यताप्रसंगाच्च अतएव कां
क्षायोग्यतासत्तिमत्त्वमेव वाक्यलक्षणं पदाद्यघटितमित्यपास्तं आकांक्षादीनामर्थधर्मत्वे तत्रातिव्याप्तेः पदधर्मत्वे चाकां
क्षायाः अनुभवजनकता[illegible]वच्छेदकानुपूर्वीरूपाया अननुगतत्वात् वाक्यलक्षणमव्यापकं स्यात् अपभ्रंशानामपि शक्त्या
रोपेनानुभवजनकत्वात्तेष्वतिव्याप्तिश्चेति । प्रभाकरमते लौकिकं वाक्यं प्रमाणमेवमिति तन्मते शाब्दलक्षणमनुद्यानिर्दे
शेन दूषयति एतेनेति वाक्यत्वान्निरुक्तिदोषेनेत्यर्थः । अपौरुषेयशब्दत्वं तु पदेतिव्याप्तमिति वाक्यपदपरित्यागेपि न तन्नि
स्तारः । अन्यथानुपपत्तिरिति उपपाद्यं जीवि देवदत्तगतगृहासत्त्वं अन्यथा बहिःसत्त्वादन्येन प्रकारेण नोपपद्यत इति गृहेऽसत्त्वानुपप

त्तिरर्थापत्त्या एवं प्रमाणं वहिःसत्त्वप्रमायाः करणमित्यर्थः। अनुपपत्तिरन्यथाप्युपपन्नावस्तीनिश्चयपथे तमाह यतोऽन्यत्वमिति
वहिःसत्त्वसिद्धेः प्राग्वहिःसत्त्वान्यथात्वं ज्ञातुमशक्यं प्रतियोगिज्ञानाधीनत्वात् प्रतियोगिप्रकारकाभावज्ञानस्य इत्याह तन्नूसि
द्धेः प्रतियोगिसिद्धेरन्यथानुपपत्त्यसिद्धेरन्यथानुपपत्तेरज्ञानानुकरणत्वं न हि स्वरूपमन्यथानुपपत्तेः करणं सर्वदैवोपपत्ता
दृकसिद्ध्यापत्तेः अर्थापत्त्या भाशाछेदापत्तेश्चेति यद्वा यतोऽन्यत्वे अग्रे प्रथमं तत्र तत्र सिद्धेः तत्प्रमायाः फलीभूतायाः सिद्धेः
अर्थापत्तेरसिद्धेः अर्थापत्तेः प्रमाणत्वासिद्धेः वहिःसत्त्वस्य प्रथमत एव ज्ञानत्वात् किमर्थापत्त्येत्यर्थः ननु देवदत्तीयवहिः
सत्त्वप्रमाफलं। वहिःसत्त्वान्यथानुपपत्तिश्च करणं तच्च सामान्यतः सिद्धमेवेत्याशंकते सिद्धेनेति सिद्धं प्रसिद्धमादायानुपप
त्तिज्ञानं करणमित्यर्थः सिद्धे वहिःसत्त्वसामान्ये ऽनुपपत्तिर्नोत्थीति वार्थः। अन्यथानुपपत्तिज्ञानत्वानुपपन्नामित्यर्थ निष्कर्षः।
ल सिद्धेत्यसिद्धा देवदत्तीयवहिःसत्त्वव्यवच्छेदाय विशेषणं न चादिसवच्छेद्यं प्रसिद्धं तदा अस्मदर्थापत्त्यान्यथाप्रसिद्धं तदासन्नमरणादेर्विधाव न
च्छेद्यत्वानुपपत्त्याविशेषणं व्यर्थमित्यर्थः इत्यपव्याख्यानं जीविनो गृहासत्त्वं वहिःसत्त्वं विनानेनेति ज्ञानस्य नानुपपन्नता यद्वददत्ते तदुभयग्रहः
सम्भवादित्युच्यते ननु सिद्धेति विशेषणं दीयते येनोक्तदोषः स्यादिति। तस्मादेवं व्याख्येयं नवयं सिद्धे ऽनुपपत्तिं ब्रूमः किं त्वेकं प्रकारं

२

व्यवच्छेद्याभावेऽपि येन प्रकारेणोक्तिर्विशेषणत्वं सिद्ध्यति तथा चान्यथेति विशेषणं व्यवच्छेद्यस्यैकस्य प्रकारस्याजीविनो विशेषस्यान्यथेत्यस्य
वैयर्थ्यमित्यर्थः। न च बहिःसत्त्वं व्यवच्छेद्यं प्रसिद्धमिति वाच्यं तथापि बहिःसत्त्वं विना जीविनो गृहासत्त्वेनोपपन्नमिति। सामान्यतो
ज्ञानं न देवदत्तबहिःसत्त्वसाधकं किंतु देवदत्तस्य जीविनो गृहासत्त्वं बहिःसत्त्वं विनानोपपन्नमिति वाच्यं तदप्रसिद्धेः न च पक्ष
धर्मताबलाद्देवदत्तबहिःसत्त्वसिद्धिरिति वाच्यं तथा सति जीवित्वे सति गृहासत्त्वस्य हेतोरेव गमकतापत्त्या यज्ञदत्ते गृहवार्त्तेनितयोर्व्यतिरे
कव्याप्तिग्रहादिति देवदत्तबहिःसत्त्वमन्तरेणानुपपत्तिर्वाच्या न चैवं व्यतिरेकी व्यतिरेकप्रतियोगिनोऽप्रसिद्ध्या व्याप्त्यग्र
हात् तेषां तमकार्थापत्तिफलं विनेति तेषामाशयस्तदा संभवति यदि चान्यथेत्यस्य व्यावर्त्यस्य देवदत्तबहिःसत्त्वस्याप्र
अनुपपत्त्या सिद्ध्या विशेषणमन्यथेति नोपादीयते तथा हि सर्वथेति यदि जीविनो गृहासत्त्वं सर्वथैवानुपपन्नं तदा तस्योपपादक
मलीकमेव स्यादिति बहिःसत्त्वकल्पनानवकाश इत्यर्थः साध्यसिद्धपर्यवसानादिति देवदत्तीयबहिःसत्त्वमात्रं न सि
द्धेस्तेन विनानुपपत्तेरज्ञानात् तथा चार्थापत्तिलक्षणमसंभवीत्याशयः। प्रमाणयोरिति तथा च न विशेषणदोषावव
हितोक्तदोषा[illegible]याः प्रसंग इति जीवी क्वचिदस्तीति सामान्यतोदृष्टमात्रवाक्यं वा कुत्रचित्तेन रूपेण देवदत्तस्य गृहसत्त्व

त्वत्वप्रसंगादित्यर्थः॥ व्याप्तत्वेन एकस्य धर्मिणो विरुद्धरूपत्वापत्तिर्व्याघातः। प्रतिहतप्रमाण्यमिति आप एकस्य विषयसंकोचेन नेनापि दूषोः प्रामाण्योपपत्तेः ५

विषयीकरोति देवदत्तो गृहे नास्तीति चानुपलब्ध्याऽभावमतः प्रमाणयोरेकत्र एकस्य भावाभावग्राहकयोर्विरोधे मालो
च्य विरोधभंगाय यथा वाहिहिः सत्वकल्पनास्याफलं विरोधत्रानं च कारणमित्याशयः अस्ति इत्यादिति प्रमाणयोर्विरोधए
व नास्ति किं कारणं स्यादित्यर्थः नहि विरुद्धविषयकं प्रमाणद्वयमेकत्र संभवति प्रमेयस्य विरुद्धस्यापत्तेरित्याशयः।
ति अतिप्रसंगादिति अन्यत्र कस्यचित् सर्पभ्रमस्य दंडे यमिति चापरपुरुषभ्रमस्य एकपुरुषीयस्य स्वप्नेनादृशभ्रमस्य च
प्रमाणत्वेन भ्रमविषयस्य स्वोपपादकवस्तुकत्वमिति अभिमानः आभासत्वादिति प्रमाणत्वनिश्चयः स्यादेवेत्यर्थः।
ननु प्रतिपक्षस्थले व्याप्तिग्राहकतर्कयोर्विरोधो नास्ति एकस्यासत्तर्कत्वादित्यन्यतरप्रामाण्यनिर्णयान्नोपपादक
कल्पकत्वं नास्तीह तथाहि जीवी देवदत्तो यदि कुत्रचित्स्यात्तदा जीवीनस्यात् तथा यदि बहिर्न स्यात्तदा गृहनिष्ठाभाव
प्रतियोगी स्यादिति तर्कयोर्द्वयोरपि मूलशैथिल्यादि विरहितोणाभासत्वाभावेनाप्रामाण्यनिश्चायकत्वाभावादित्याशयः। वहत्व
स्तु तर्कयोर्विरोधएव स्यान्न तु ततः प्राक् एकाशंका मनिर्वर्त्य शंकान्तरानोचित्यादिति मिथ इति यथा प्रमाणयोर्न विरोधस्तथा सत्ते
[illegible] वानुपपत्तिरित्याशंकार्थं वर्णयति तद्भिन्न युक्तं तथा सति प्रमाणविरोधानुपपत्तिशंकायां विशेषप्रदृष्टत्वे प्रमाणेत्यादिना।

करिष्यमाणायां परत एवास्य ग्रंथस्यारंभः स्यान्न तु तत्प्राक् एकांशे कामनिर्वा न्यशंकांतरानौचित्यादिति भिध इति यथा प्रमा
णयोर्न विरोधस्तथा सत्तर्कयोरप्यतो मिथो विरोधेन तर्कयोरप्याभासत्वादन्यतराप्रामाण्यनिर्णायकत्वमेव सत्प्रतिपक्षवदि
तिभावः प्रमाणयोर्विरोधे इत्यनेन संशयविशेषोभिमत इत्याशयेन शंकते विशेषप्रवृत्तेति विशेषप्रवृत्तं प्रमाणं गृहे सत्व
ग्राहकमनुपलब्धिरूपं तदर्थस्तद्विषयो गृहासत्वे ततू प्रतिक्षेपो गृहसत्वं तद्विषयतत्संशयः स विरोधः कस्येत्यपेक्षायाम
विशेषप्रवृत्तत्तद्विपरीतार्थग्राहि प्रमाणस्येति संबंधः इति सर्वे व्याख्यातारः वस्तुतस्तु संशय एव कारणं बहिःसत्वप्रमायामिति
मतांतरमेवेदं स इति अर्थापत्तिशब्दार्थ इत्यर्थः कैश्चित्तु सत्वग्राहि प्रमाणविरुद्धार्थकं नवेति संशयो बहिःसत्वकल्पनया आन्य
तितदाहि द्वयोर्भिन्नविषयतया विरोधाभाव एव पर्यवस्यतीति भावः विशेषप्रवृत्तप्रमाणार्थी देवदत्तस्य गृहासत्वं ततू प्रतिक्षेपो
देवदत्तस्य सत्वं ततू क्वचिदस्तीति विशेषप्रवर्त्तमानस्य क्वचिदस्तीत्यस्य विषय एव न भवति कुतः पुनर्विरुद्धार्थतयेति कथम
यं संशयः कथं चानुत्पन्नः कारणं स्यादित्याशयवान प्रथमतः प्रमाणयोरेकविषयत्वेनैव नास्ति देवदत्तस्य गृहाभावे निश्चिते
गृहसत्वज्ञानानुत्पत्तेस्ततश्च तयोः सत्वासत्वयोर्विरुद्धत्वेनैव निश्चयात् नूनं तत्र श्च मस्तलग्राहक प्रमाणविशेषप्रवृत्तप्रमा

णविरुद्धार्थकत्वस्यापि निश्चयात्तादृशप्रमाणविरुद्धार्थकत्वाभावकोटिकः संशयो न भवतीत्याह विशेषविषयप्रमाणेनेति गृहे नास्तीति वि
शेषविषयप्रमाणेन बोधिते वैपरीत्ये तस्य विशेषप्रवृत्तप्रमाणविषयतः सत्वसंबंधिनीं गोचरयितुमपि संशयस्यासामर्थ्यादेवेति संबंधः अत्र
हेतुर्दुर्बलस्यानवकाशत्वेनेति स्थाणुरयमिति निश्चिते यथा ऊर्ध्वत्वसामान्यवत्तावानयं स्थाणुः पुरुषो वेति संशयो न जायते तथा विशेष
प्रमाणविरुद्धार्थतारूपो यो शस्तद्विषयसंशयस्यानवकाशः विशेषविषयप्रमाणार्थो नाविशेषविषयप्रमाणविषयतागोचरयि
तुं शक्यते संशयेन दूरत एवाविशेषविषयप्रमाणविरुद्धतयेत्यर्थः गृहसत्वग्राहि प्रमाणस्य विपरीतार्थोपस्थापकं गृहासत्वग्रा
हि प्रमाणमनुपलब्धिस्तद्दर्शनमर्थापत्तिप्रमाणे अविशेषप्रवृत्तस्य प्रमाणस्य तदितरविशेषविषयत्वप्रमा[illegible]फलं विशेषप्रमा
णेन यो विशेषो देवदत्तस्य गृहेऽभावो गृहीतस्तदितरो विशेषो देवदत्तस्य बहिः सत्वरूपोऽविषयः इति यज्ज्ञानं तत्प्रमाणस्य फलमि
त्यर्थः अर्थापत्तिमन्तरेणापि सामान्यप्रमाणस्य विशेषप्रमाणेऽभिन्नविषयत्वसिद्धेर्नार्थापत्तिर्मानमिति परहरति नेति अविशेषप्रवृ
त्तस्य तद्विपरीतार्थं विशेषविषयस्य च प्रमाणस्य च प्रमाणस्याविषयपर्यायवस्याविरुद्धत्वप्रतीतौ धर्मिणो भेदस्यान्यतरस्य प्राप्तेरिति
योग्यता कथं परस्परविरुद्धप्रतीतिरित्यत्राह तद्विपरीतत्वेति तस्माद्विशेषप्रवृत्तप्रमाणाद्विपरीतत्वप्रतीत्यंगीकारेण लब्धा 1

१ विप्रका

भेदस्य स्वरूपमाह विरुद्धधर्माध्यासस्येति विरुद्धयोर्धर्मयोः सत्त्वासत्त्वयोः संबंधो विरुद्धधर्माध्यासः तदाहुराचार्याः अयमेव हि
रा. भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासस्तत्त्वमिति सच भेदः विरोधगर्भे प्रविशतीति तेन विरोधसहकृतेयत्तस्याश्च विरोधप्रतीत्यैव वदि
५ षयभेदस्य विरोधप्रतीतिकाल एव सिद्धेर्वैलक्षण्यापद्येति अर्थभेदस्य विरोधगर्भत्वं तत्र बुद्धयति विरोधेति विरोधस्य एकधर्मिणि
समावेशस्य विवेचनं तस्मिन् स्फुरत्तद्गर्भप्रवेशो यस्य धर्मिभेदस्य न तत्प्रतिसंधानविषयत्वमेव तद्गर्भप्रविष्टत्वं धर्मस्यैक
धर्म्यसमाविष्टत्वमनेकधर्म्याश्रितत्वं एवं संभवतीति धर्मिभेदसिद्धिरन्यत एव विरोधप्रतीतिसाधकतत्त्वतत्सिद्धिः यदि
च धर्मिभेदोऽन्यथाभावस्तदाह तन्नान्तरीयकस्याविरुद्धस्य भिन्नधर्मिकत्वव्याप्यत्वं तन्नान्तरीयकत्वं तदान्यतः सिद्धिः सत्त्वा
सत्त्वे भिन्नधर्मिके विरुद्धत्वादित्यनुमानतः सिद्धेरित्यर्थः। अन्यत्रैवेति घटतद्भावयोर्यथा धर्मिभेदसिद्धिस्तथादृष्टस्य धः
यद्यप्येवमपि सत्त्वासत्त्वं धर्मिभेदेन सिद्ध्यति तच्च देवदत्तस्य गृहसत्त्वेपि संभवन्न देवदत्तस्य बहिःसत्त्वनिर्णयाल्लिंगमित्य
र्थापत्त्या बहिःसत्त्वसिद्धिरिति सकृत् परेण वक्तुं तथाप्यसत्त्वस्य गृहधर्मिकत्वप्रमादशायां सत्त्वं साध्यमानं बहिर्धर्मिक
त्वमादायपर्यवस्यतीति विशेषविषयत्वमित्यस्य प्रमीयत इति क्रियया संबंधः। सामान्यमात्रविषयस्य विशेषविष

यत्त्वज्ञानमर्थापत्तेः फलमिति प्रथमविकल्पः। सामान्यविषयत्वेन विशेषविषयतानियतस्य ज्ञानस्य विशेषविषयत्वज्ञानमिति
द्वितीयः कल्पः। प्रमाणान्तरसिद्धस्य सत्त्वसामान्यस्य विशेषो बहिर्देशत्वमिति तृतीयः कल्पः। सामान्यप्रमाणविषयीकृते विशेषवद्धिः
सत्त्वे प्रतीयमानविरोधव्यतिरिक्तत्वमिति तुरीयस्यार्थः। पूर्वविकल्पद्वयं प्रमाणाश्रयं परं द्वयं प्रमेयाश्रयमिति विशेषः। अर्थापत्ते
भ्रमेति सामान्यमात्रविषयकस्य ज्ञानस्य विशेषविषयत्वज्ञानं भ्रमस्तत्कारणत्वेऽर्थापत्तेः प्रमाणत्वं स्यादिति भावः। विशेषविषयक २
स्य ज्ञानस्य विशेषविषयकत्वेनाज्ञानमेव न संभवति यदा हि तज्ज्ञानस्य विशेषविषयकत्वमर्थापत्त्या प्रमेयं तदा तत्पूर्वज्ञान
स्योपस्थित्यपेक्षायां तज्ज्ञानविषयकानुव्यवसायेनैव विशेषविषयकत्वस्यापि प्रमितेरर्थापत्तिर्निमाने अनुव्यवसायकरणस्य
मनसो ज्ञानानतीन्द्रियत्वे ज्ञाततात्मकस्य लिङ्गस्यैव तत्करणत्वात् ज्ञानस्य स्वप्रकाशत्वे तु ज्ञानकरणस्यैव तत्रापि मानत्वात्
सामान्यमात्रमवबोध्य प्रमाणं निवर्त्तते न तत्सत्त्वस्य सामान्यस्य विशेषोऽर्थापत्तेः प्रमेय इति तृतीयः कल्पः खण्डयति तृतीय
इति जीवी देवदत्तः क्वचिदस्तीति ज्ञानमेव सामान्याश्रयं विशेषमपि विषयीकरोति सामान्यस्य निर्विशेषस्य शब्दानुमाना
विषयत्वात्। यद्यपि विशेषं यं कंचिदादायैव सामान्यप्रतीत्युपपत्तेः सत्त्वस्य बहिर्निर्धृतानामसिद्धेति तथापि गृहनिष्ठ

नाभावप्रमायां सत्यां गृहभिन्नबहिःपदार्थनिष्ठतासिद्धिरिति भावः। प्रागेवेति अर्थापत्तेः सामान्यज्ञानकरणाभि
न्नात् प्रमाणात् पूर्वमेव विशेषसिद्धिरित्यर्थः। वस्तुगत्या बहिःसत्त्वसिद्धावपि बहिःसत्त्वत्वरूपेण न तत्सिद्धमिति गृह
भिन्नवृत्तित्वे सत्त्वाद्याधर्मांतरमर्थापत्तेः प्रमेयमिति तुरीयविकल्पं विकल्प्य पतिमन्यज्ञानहनपरिमाणादीत्याशं
कते न्नादिति धर्मांतरमित्यर्थः। प्रतीयमानो गृहे विरोधी अभावो यस्य तन्न प्रतीयमानविरोधिगृहसत्त्वं तेनो व्यतिरि
क्तत्वं बहिःसत्त्वमिति यावत् बहिर्वृत्तित्वं सत्त्वस्येति निष्कृष्टार्थः। तत्रापि गृहभिन्नत्वे सत्त्वाधिकरणस्येति परम
निष्कृष्टः। अयमाशयः सामान्यप्रवृत्तात् प्रमाणात्कृत्स्नेऽपि भावः प्रतिपन्नो विशेषप्रमाणान्न अभावः प्रमीयते तेन त
श्चभावस्य प्रमीयमानविरोधित्वं प्राप्तं सैतोऽर्थापत्त्या प्रतीयमानविरोधिका रूपाद्यतिरिक्तत्वं धर्मांतरं प्रमीय
ते अर्थापत्त्येति न तत् प्रतीतो न हन्तपरिमाणादिप्रतीतावर्थापत्तेः सामर्थ्यस्य दर्शयितुमशक्यत्वेनार्थापत्तिरियं प्रमेयमिति
निश्चेतुमशक्यतया अर्थापत्तिः संशायकतया अप्रमाणं स्यादित्यर्थः। भट्टनयमनुसृत्येतदुच्यते प्रभाकरमतं वाश्राघ
मभिप्रेत्याहनेति अनुगताचाननुगताचानुगतानानुगते जातिव्यक्तीचानुवीचानुवीचते आदीयासां व्यक्तीनां ताश्चानु २७८

घाचाद्युपादिव्यक्तयस्तदभिन्नायेगंधादयस्ते चाद्युपागंधादिव्यक्त्यस्तासांतादात्म्यवादिनयेतदुभयस्य सामान्यविशे
षप्रमाणार्थयोस्तादात्म्यविषयता निरासं विना विरोधासिद्धार्थापत्तिर्धर्मान्तरगमनिकावलमेव न सिद्ध्यति। विरोधोह्यर्था
पत्तेः सामर्थ्यं तदसिद्धौ धर्मान्तरगमकत्वमेव न सिद्ध्येदेकस्मिन्नेवाधिकरणे भावाभावयोः संभवापत्तेः अथ सामा
न्यविशेषप्रमाणार्थयोः प्रतीतो ज्ञानायां प्रमायास्तादात्म्यविषयत्वाभावोऽवधार्यते न चाह तदुभयाभ्याम एव सामा
न्यप्रमायाविषयः स एव विशेषप्रमाया विषयो न भवतीति प्रमायास्तादात्म्यविषयत्वावधारणं प्रथमत एव प्रतीयमा
नविरोधिकाव्यतिरिक्तत्वस्य प्रतीत्याऽर्थापत्तेरनुवादत्वापत्तेः प्रामाण्यमेव नास्तीत्यर्थः अथ माशयोऽनुगताजातिरन
नुगताव्यक्तिस्तयोस्तादात्म्यविषया प्रतीतिः प्रमा तथा घटस्याद्युपोऽचाद्युपागंधौ र[illegible]नग्राह्यौ रसोनततदाश्र यद्रूपं
तथापि नत्वेनादात्म्यविषया प्रतीतिः प्रमेत्यभ्युपेयते तथादेवदत्तभावाभावयोरपि विरोधासिद्धा एकस्मिन्नेव गृहे संभवापत्ता
विशेषदर्शनस्येव वह्निसत्वगमनिकासामर्थ्यस्यासिद्धेरर्थापत्त्यसंभवः। यदि गु[illegible]ननानुसारिणा व्यतेतदा तदुभयेतिग्रथ्याः वृत्त्या
यो[illegible]तयोर्वि[illegible]शेषाविशेषार्थयोः प्रतीतौ तयोर्विरोधो न वधार्यो अन्यथावधार्यानवधारणे तत्वस्य विरोधस्यावधार

णानुपपत्तेः तथाच तत्रिष्ठासहावस्थानविरोधावधारणएवार्थापत्तिविषयस्यबहिःसत्वस्य[illegible]सिद्धेः सामान्यप्रमाणस्य
तद्विरुद्धार्थविशेषप्रमाणदर्शनरूपार्थापत्तिरनुवादत्वे नाप्रमाणं स्यादित्यर्थः एतेनानुपद्यमानदर्शनादुपपादकेबु
द्धिरर्थापत्तिरितिपरास्तं अनुपपत्तिविषयो ह्यनुपपद्यमानस्तस्यचानुपपत्तिर्दुर्निरूपत्वादुर्निरूपः अत्र मीमांसकाः
भावाभावयोरेकप्रतियोगिकयोर्देवदत्तो गृहेऽस्तिनास्तीत्यप्रतीतेर्विरोधः गंधवद्द्रव्यरसवद्द्रव्ययोस्तादात्म्येपितयो
रसगंधयोस्तादात्म्याप्रतीतिर्नाभेदः नहिरसद्रव्ययोरभेदे अम्लनिष्ठो मधुर[illegible]पन्न इतिवद्रसोम्लो नष्टो मधुर उत्पन्न इति ३५
प्रतीतिरस्तितस्माद्द्वयोर्विरोधः प्रामाणिकस्तयोरेकाधिकरणेऽनुपपन्त्यावेयधिकरण्यमेवेतिदेवदत्तस्यजीवतोऽभावोगृ
हातिरिक्तेतस्यसत्वं तस्यगमयति नचजीवित्वेसति गृहासत्वमेव नहि लिंगं तस्यगमकमितिवाच्यं बहिःसत्वाप्रतीतो गृहा
सत्वस्यैवनिश्चेतुमशक्तेः एकस्यैकावच्छेदेन भावाभावप्रत्ययासंभवात् जीवतो देवदत्तस्य गृहेपि प्रसक्त्या अभावानिर्णयात्
जीवनं गृहातिरिक्तेसत्वायाऽनुपपन्नमितिचेत् सत्यं किंतुतत्प्रतीतिमता नरेण गृहेऽसत्वमेवन प्रतीयते तथाहि जीवतिचेत्
तह्यधुनानास्त्येवेतिप्रतीतो नास्तीतियथान प्रतीयते एकस्मिन ज्ञाने भावाभावयोरवच्छेदभेदं विनाऽप्रतीतेर्देशकालस्यैव

कालेपिवृत्तेर्देशस्यावच्छेदकत्वात्तथाऽभावस्यैकदेशावगमो भावदेशे न भी क्वैव अग्रे वृक्षः कपिसंयोगी न मूल इतिवद्
न्यथा तत्रापि वृक्षो न संयोगी संयोगी चेति प्रतीत्यापत्तिः तथा च जीवतो गृहासत्त्वमनुपलब्ध्या बहिः सत्त्वं चार्थापत्त्या एकदैव
प्रमीयत इति वक्तव्यं तदाहुः तेन जीवित्वसंसृष्टगृहाभावविषयानया गृहादुनूकालिमासत्वावद्दूरेवावतिष्ठत इति । तथा
मूर्तस्यैकत्र सतो देशांतरेऽभावोपि मूर्तत्वान्यथानुपपत्त्या प्रतीयते न च देशांतरेऽनुपलभ्यमानत्वा द्यो यदा यत्रोपलभ्य
ते स तत्रोदेशांतरे नास्ति महत्वादि निवाच्यं विभुपदार्थव्यभिचारात् किं च एकस्मिन् गृहे देवदत्तमुपलभ्य मध्यगतगृहमनुपलभ्यैव
तृतीयगृहगते देवदत्ते पश्यतो मध्यगृहे न तदभावोप्यर्थापत्तिगम्य एवं न च मध्यगृहं देवदत्ताभाववदेतद्गृहातिरिक्तदेशत्वाद्देवदत्ताभाव
वत्तया प्रतीयमानचक्षुःसन्निकृष्टदेशवदित्यनुमानं तस्मान्न सिद्धिर्मध्यगृहं देवदत्ताभाववन्नेदं देवदत्ताभाववत्तया प्रतीयमानो यो
यं चक्षुःसन्निकृष्टदेशस्तद्भिन्नदेशत्वादेतद्गृहवदिति सत्प्रतिपक्षत्वात् किं च यादृशाऽकरत्वान्न लक्षं योगाद्दाहादृष्टः
सति प्रतिबंधके ततो दाहो न जायत इत्यनुभवोपि करत्वेन संयोगनिष्ठं धर्मं विनाऽनुपपद्यमानो धर्मांतरे शक्त्याख्यमर्थापयति
न च प्रतिबंधकादेव तदुपपत्तेः सतिकारणे प्रतिबंधस्यैवानुपपत्तेः प्रतिबंधस्तु न कारणमिति चेन्न कारणतायाः शक्तिभिन्नायाः

शक्तिभिन्नायाश्चान्यकानिर्दहनत्वात्‌ अन्यथासिद्धस्य नियतपूर्वभावविभागेनैवस्यादितिचेन्न किंकरतलानलसंयोगोनत
था॰ अथप्रतिबंधकाभावोपिकारणमितिचेन्न तस्मिन्नसतिदाहइतिचेन्न तस्य कारणत्वेप्रमाणाभावात्‌ तस्य कारणत्वेनपेक्ष्यकारणी
ल भूतः करतलानलसंयोगो नास्तीति कल्पनमेवलघु॰ अनन्यथासिद्धनियतपूर्ववर्तित्वमेव इतिचेत्‌ सत्यं तथापि तस्यादृशायांफलोपध
यकतातस्यनास्तीत्यनुभवसिद्धस्यचशक्तिरेवप्रतिबंधकाभावधर्मद्वयकल्पनापेक्षयागरीयस्त्वात्‌॰ यदिचप्रतिबंधकाभावःफ
लोपधायकस्तदाविनाऽनलसंयोगमपिदाहापातः अथमिलितमेवतथेतिचेन्न मिलितस्यातिरिक्तस्याभावात्‌ भावे
वामिलितैकारणतानप्रत्येकमितिसनिसिद्धातिरिक्तासत्याकल्पनस्याश्चाप्रतिबद्धमेवाश्रयोभूतलंकालविशेषा
वच्छिन्नमिवघटाभावस्येतिप्रतिबंधकेननतस्यानाशानवातदभावेनपुनस्तस्याजन्मेतिवदंति तत्र॰ गृहेनास्तीतिधि
यः संशयात्मकत्वाभावात्‌ नवायोग्यानुपलब्ध्याऽभावगृहेवहिःस्तधीःकारणं घटाभावनिश्चयादुपपत्तेः तत्रापिघटो
देशांतरवर्त्यास्तेवेतिचेन्न विनष्टस्यदेशांतरेऽसत्त्वात्‌ तथाप्रागभावप्रतियोगिनश्चान्यथानयोर्नित्यतापपत्तेः जीवि
त्वेननिश्चितस्यगृहेऽसत्त्वनिश्चयेवहिःसत्त्वधीःकारणमितिचेन्नमानाभावात्‌ एकस्मिन्कालेऽस्तिनास्तीतिधी

न्नौ देनीति चेन्न यापि गृहेऽधुनानास्तीति निधीः स्यादेव क्वचिदस्तीत्यनेन गृहेऽपि सत्त्वं प्रसक्तं सामान्यशास्त्रमिव विशेषशास्त्रेण गृहा
सत्त्वधिया बाध्यते तथापि बहिः सत्त्वसिद्धिः कुत इति चेत् क्वचिदस्तीत्यनुमानादेव तथापि बहिःसत्त्वप्रकारिकाप्तिद्धिर्न स्यादिति चेन्न
क विशेषबाधे सामान्यज्ञानस्य तदितरविशेष [illegible] प्रकारकत्वनियमात् तथापि विशेषस्यानुपस्थितस्य
न प्रकारत्वासंभवादिति चेन्न देवदत्तो गृहातिरिक्तवर्त्ती जीवित्वे सति गृहेऽसत्त्वाद्यो जीवित्वे सति गृहेऽसन्नः स बहिः सन् तथाविधोऽहमिवे
त्यनुमानतस्तत्सिद्धेः एवमेव द्वितीयगृहेऽसत्त्वमप्यात्मदृष्टान्तेनैव साध्यं मूर्त्तत्वेनैव देशान्तरवर्त्तित्वाभावोऽपि निर्णीतव्याप्तस्य त
द्व्याप्यत्वात् नापि शक्तिः पदार्थान्तरं कॢप्तेनानन्यथासिद्धनियतपूर्ववर्त्तित्वेनैव तेवोपपत्तेः यत्तु प्रतिबंधकाभावमात्रादेव फलं स्यादि
ति तन्न युक्तं अनलस्यापि कारणतायाः प्रमितिस्तथा च यावत् कारणतावच्छेदकानामाश्रयादेव फलसिद्धेर्न च नावना कारणता
याव्याघातः यत्तु पार्थसारथिनाभूषिका घ्रातशालिबीजादंकुरोत्पत्त्यदर्शनाद् घ्राणनाश्या शक्तिः कल्प्यते न च घ्रानस्य प्रतिबंधक
तयानदुपपत्तिः सत्यपि घ्राणध्वंसेऽङ्कुरानुत्पत्तेः न च घ्राणप्रागभावो हेतुः प्रागभावस्यातिरिक्तस्याभावादित्युक्तं नन्न घ्रातभि
न्नबीजत्वेनैव स्वरूपयोग्यत्वमिति कल्प्यनम्येव तदुपपत्तेरिति दिक्। प्रमाणाभावोऽपि प्रमाणान्तरं नास्तीत्यस्यार्थस्येति शाबरभा

ष्यं तद्दूषयति योग्यानुपलंभ इति अत्र प्रमाणपदं यदि प्रमापरं तदा शुक्तौ रजतप्रमाभावाद्रजताभावप्रमा स्यादिति रजत
भ्रमो न स्यात् किं च स्वरूपमात्रदृष्टं च वेश्माद्यर्थस्मरन्नथ। तत्रान्यनास्तितां पृष्ठस्तदैव प्रतिपद्यत इति भवतां मतं तेन तद्विन
स्मरणाभावस्य प्रमाणाभावत्वाभावात् यदि च उपलंभस्य निश्चयस्याभावो हेतुस्तदा शंखे पीतभ्रमो न स्यात् पीताभावग्रह ण
सामग्रीसत्त्वात् श्वेतत्वेनानुभवदशायां न भवत्येवेतीष्टापत्तिमाशंक्याह धवलिमप्रतिसंधानवत इति अत्रानुमानिकध
वलिमज्ञानवतः धवलिमस्मरणतो वा पित्तदूषितनयनस्य पीतभ्रमः स्वीक्रियते स न स्यात् पीतानुपलंभे सति पीताभाव
प्रमापात्तादित्याशयः धवलिमज्ञाने पीतत्वान्न निवोधितया पीतानुपलब्धिसंपादकतया कथितं। अथ श्वैत्यस्मरणकाले
पीतानुपलंभोपि तदुत्तरकाले पीतोपलंभसंभवे नानुपलब्धिभावात्र पीताभावप्रमेति भ्रमो नानुपपन्न इति शंकते कालभेदादिति
स्मरणगृहणयोरेकदानुत्पादादिति भावः। पीतभ्रमप्राक्काले ऽभावप्रमासामग्रीसत्त्वात् पीताभावप्रमोत्पादो दुर्वार इति पीतभ्रमोत्पत्तेरसंभवे
न पीतानुपलब्धेरावश्यकत्वमिति भावः। ननु पीतभ्रमात् प्राक् श्वैत्यस्मरणोत्तरकालं पीतोपलंभो नास्त्येवेति शंकेयमत्यनुपपन्ना। नच
पीतगतपीतिमानुभवोऽस्त्येवेति वाच्यं तस्याभावाधिकरणवृत्तितया शंखे पीताभावप्रमाया अप्रतिबंधकत्वादिति चेन्न।

पीताभावप्रमायाः फलस्यादर्शनेन दोषनिष्ठपीतग्रहस्यापि प्रतिबंधकत्वमिति शंकितुराशयात्॥ किंच पीतानुपलब्धिरियं न प्रमाहेतुदो
त षेणास्याः प्रमाजननसामर्थ्यात्तत्कारणादित्युक्तौ का गतिः न च तत्रानजननसामर्थ्यातिरिक्तं न प्रमाजनसामर्थ्यं तस्य प्रतिबंधे भ्रमस्याप्यनु
सत्यापत्तिरतिरिक्तत्वे च प्रमायाः स्वतस्त्वहान्यापत्तिरिति वाच्यं भ्रमेण ज्ञातं किं तत्राभासः सइत्युसकृद्दावेदितत्वादित्युपपन्नमेव शंका
मनुपलब्धेः कारणत्वे व्यभिचारेण दूषयति तथापीति अन्योन्य[illegible]संसृष्ट योगिरिवृक्षयोरन्योन्याभावग्रहो न स्यादित्यर्थः
ननु गिरिवृक्षयोरन्योन्याभावप्रतियोगित्वं येन तदुपलब्धावप्यभावग्रहादनुपलब्धेर्व्यभिचारः स्यात् किंतु तादात्म्यं
न चेह तदुभयत्तादात्म्यज्ञानं भवतीत्याशंक्याह तादात्म्यस्येति॥ प्रतियोगिस्वरूपातिरिक्तं तादात्म्यं निष्प्रमापकं न च प्र
तियोगितावच्छेदको धर्म एव तादात्म्यर्थः तथा सति गिरित्वं वृक्षत्वं च तत्तत्र च न स्यानुपलब्धिरस्ति गिरित्वस्य वृक्षे[illegible] वृत्तितयानु
पलंभोऽस्तीति चेत्तर्हि गिरित्वसंसर्गाभावादस्य विशेषो न स्यात्॥ तस्मात् यत्र संसृष्टतया प्रतियोगित्वं संसर्गस्य वा तत्र संसर्गाभावधीः अ
न्योन्याभावे तु स्वरूपेणैव प्रतियोगित्वं स्वरूपमेव च तादात्म्यं तत्र च तदुपलब्धिरस्तीति व्यभिचारः ननु तथापि गिरित्वात्मना वृक्षोपलं
भो नास्तीति चेन्न तथा सति तस्यापि भावात् तत्रान्योन्याभावग्रहो न भवति परं तु भेदभ्रम एवेति चेत्तर्हि स एव न स्यादन्योन्याभावप्रमासामग्र्या

स्तत्प्राक्काले सत्त्वादित्युपव्याख्यानं । व्यभिचारप्रदर्शनपरत्वादस्य ग्रन्थस्य वस्तुतस्तु गिरिर्वृक्षो नेति प्रतीतौ गिरौ वृक्षाभेदो भासते स च
स्वरूपतो वाधित इत्यभावात्मना भासते भावान्तरमभावो हि कयाचित्तु विवक्षयेति भट्टोक्तेस्तथा च गिरिरेव पटान्योन्याभाव इति स्थिते
पटात्मकोयोन्योन्याभावस्तदभेदोथ दि गिरिस्तदा प्रतियोगितादात्म्योपलब्धेः कथन्न व्यभिचारः अथाभावभाने तादात्म्यं भासतां न तु
तत्र प्रागिति चेन्न कारणीभूतज्ञाने तदभाने फलीभूतज्ञाने तदभानापत्तेः यदि च प्रतियोगितादात्म्यज्ञानं विनान्योन्याभाव
ज्ञानं तदा संसर्गाभावात्को विशेषः स्यात् । अथाहार्यतादात्म्यज्ञानं हेतुरणाहार्यतादात्म्यानुपलब्धिः कारणमिति चेन्ना
न्योन्याभावग्रहात् प्राक्तनज्ञानस्याहार्यत्वनायासिद्धेः ग्राह्याभावनिश्चयेसत्याहार्यत्वमकं दोषाद्यज्ञाने तदेव व्याचार्यः ।
यद्वा यदि तादात्म्यं स्वरूपातिरिक्तं प्रतियोगिस्यात्तदा अभावभाने तत्स्मरेत्त्व चैवं किन्तु गिरिर्वृक्षाभिन्न इत्येव प्रकाशते तथा च ता
त्त्विव तादात्म्यं प्रतियोगिनोतिरिक्तं ततश्च प्रतियोगिन उपलंभात् सिद्धौ व्यभिचारः यद्वा प्रतियोगिनोऽनुपलंभे अभावबु
द्धौ तस्य भानं न स्यात् यतः प्रतियोगिप्रकारकाभावबुद्धौ प्रतियोगिनो विशेषणस्य ज्ञानं कारणमिति सिद्धोऽनुपलब्धेर्व्यभिचा
रः न चाधिकरणे प्रतियोगितानाभावो हेतुः वंशे नायनोरगभ्रमसत्त्वेपि तच्चातदभावग्रहात् तत्रेन्द्रियाणां हेतुत्वेप्यनुप

लत्त्वे व्यभिचारस्य सत्वात् अन्यथाभावग्राहकातिरिक्तप्रतियोग्युपलंभाभावो हेतुः प्रतियोगिस्मृतिरुपलंभसामग्री अधिकरणत्वं च अभावग्राहकमेवे
तिचेत्तर्हि इतरेतराश्रय

पुस्तकमेतद्वै

२८३

283

१५५६४

खण्डनखण्डखाद्य

१०००

खण्डन

ग्रन्थाधपाठकीय